ISSN: 2249-538X

# वाक्यार्थभारती

नवशृङ्खला

अङ्कः – ७ वर्षम् २०१६-१७

**प्रधानसम्पादकः**

**आचार्यः ए. पि. सच्चिदानन्दः**

**सम्पादकाः**

आचार्यः सुब्राय वि. भट्टः

आचार्यः का. इ. मधुसूदनः

डा. चन्द्रकला आर्. कोण्डी

डा. गणेश टि. पण्डितः

## राष्ट्रियसंस्कृतसंस्थानम्

(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'ए' श्रेण्या प्रत्यायितम्

## राजीवगान्धीपरिसरः

शृङ्गेरी – ५७७ १३९

# वाक्यार्थभारती

(नवशृङ्खला, अङ्कः – ७, वर्षम् – २०१६-१७)

**प्रधानसम्पादकः**

प्रो. ए. पि. सच्चिदानन्दः

**सम्पादकाः**

आचार्यः सुब्राय वि. भट्टः

आचार्यः का. इ. मधुसूदनः

डा. चन्द्रकला आर्. कोण्डी

डा. गणेश टि. पण्डितः

योऽनूचानः स नो महान्।
राष्ट्रियसंस्कृतसंस्थानम्

राष्ट्रियसंस्कृतसंस्थानम्

( मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा "A" श्रेण्याङ्कितम्

राजीवगान्धीपरिसरः

शृङ्गेरी-577139

| | | |
|---|---|---|
| Title | : | Vākyārthabhāratī |
| Chief Editor | : | Prof. A.P. Sachidanada |
| Editorial Board | : | Prof. Subray V. Bhatta |
| | | Prof. K. E. Madhusudanan |
| | | Dr. Chandrakala R. Kondi |
| | | Dr. Ganesh T. Pandit |
| ©Copyright | : | Publisher |
| Published by | : | Principal |

RASHTRIYA SANSKRIT SANSTHAN
(Deemed University under MHRD, Govt. of India)
Accredited with A grade by NAAC
RAJIV GANDHI CAMPUS
SRINGERI-577 139 (Karnataka)
www.sringericampus.ac.in

| | | |
|---|---|---|
| E-Mail | : | principal_rgc@hotmail.com |
| Year | : | 2017 |
| ISSN | : | 2249-538X |
| Cover Page | : | Raveesha N. |
| Printed at | : | Sri Siri Enterprises, Sringeri. |

**प्रो. पि. एन्. शास्त्री**
कुलपति
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
( 'ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद् द्वारा मान्यता प्राप्त )

**Prof. P. N. Shastry**
Vice-Chancellor
**RASHTRIYA SANSKRIT SANSTHAN**
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)



# शुभं संदिशामि

"तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ" इति भगवान् श्रीकृष्णः अर्जुनं निमित्तीकृत्य जगतीतले संसरतां सर्वेषां संसारिणां कर्तव्याकर्तव्यविषये शास्त्रमेव प्रमाणं प्रोवाच। शास्त्रानुसारेण प्रवर्तने श्रेयःप्राप्तिः। इतरथा दुर्गतिः। शास्त्राणि समग्राणि संस्कृतभारत्याभूषितानि। अत एव शास्त्रसंस्कृतयोः प्रचुरप्रचारमुखेन **भारतीयसनातनसंस्कृतेः** संरक्षणाय राष्ट्रियसंस्कृतसंस्थानं प्रतिष्ठापितम् यस्य ध्येयं वचः **योऽनूचानः स नो महान्** इति। सम्प्रति त्रयोदशपरिसरैः संवलितं संस्थानं भारते सर्वत्र विदेशेषु च विश्रुतम्। अस्याः संस्थायाः अन्यतमः राजीवगान्धीपरिसरः कर्नाटके पुण्यक्षेत्रे शृङ्गगिरौ विलसति यश्च जगद्गुरु श्री श्री भारतीतीर्थमहास्वामिनां दिव्यानुग्रहेण सर्वेषु परिसरेषु विशिष्टं स्थानं भजते। जिज्ञासवश्छात्राः पठन्ति। अध्यापकाः परिनिष्ठिततया पाठयन्ति।

प्रतिवर्षमिव अस्मिन्नपि वर्षे छात्राणाम् अध्यापकानाञ्च बुद्धिविकासाय समायोजितानां मासिकानाम् अध्यापकवाक्यार्थानां, शारदाविशिष्टव्याख्यानमालायां प्रथितकीर्तिभिः पण्डितैः उपन्यस्तानां व्याख्यानानां च सङ्ग्रहः **"वाक्यार्थभारती"** ग्रन्थरूपेण प्रकाशयिष्यत इति महतः प्रमोदस्य विषयः। सेयं वाक्यार्थभारती समेषां विदुषां हस्ते विलसतु। जिज्ञासून् छात्रान् प्रेरयतु। समेधतां परिसरः।

जीयात् गीर्वाणभारती।

प.ना.शास्त्री

**( आचार्य परमेश्वरनारायणशास्त्री )**
कुलपतिः

56-57, Institutional Area, Janakapuri, New Delhi-110058 Ph.: (O) 28523949 (Fax) 28521948
EPABX : 28524993, 28521994, 28524995, E-Mail: rskspvc@yahoo.com

आचार्यः ए. पि. सच्चिदानन्दः
प्राचार्यः (प्र)
राष्ट्रियसंस्कृतसंस्थानम्,
(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी – 577 139

Prof. A. P. Sachidananda
Principal (I/C)
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University under MHRD Govt. of India)
Rajiv Gandhi Campus, Sringeri - 577 139



# शुभाशंसनम्

अथ प्रसन्नगभीराणि शास्त्राणि । गभीरत्वात् बहुत्वाच्च आन्तं गन्तुमशक्यानि सर्वाणि शास्त्राणि, अथापि 'सत्सन्निकर्षे परिवर्तितव्यं विद्याधिकाश्चापि निषेवितव्याः' इतीदं व्यासवचनं स्मारं स्मारं प्रत्येकमपि संस्कृतज्ञेन शास्त्राभिलाषिणा भाव्यम् । तत्र हि शास्त्राध्ययनाध्यापनपरम्परायाः परिरक्षणायैव परिसरोऽयं प्रतिवर्षं प्रयततेतमाम् । शास्त्रपरम्परायाः परिरक्षणकर्मणि राजीवगान्धी परिसरस्यास्य वाक्यार्थपरिषदोऽपि योगदानं वर्तत एव । परिषदियं प्रतिवर्षं प्रतिमासं प्रतिसत्रं चितान् परिसरपण्डितान् एकत्रीकृत्य वाक्यार्थसत्राणि आबहोः कालात् समायोजयन्ती अस्ति । वाक्यार्थसत्रे वाक्यार्थोपस्थापयितुः अभिप्रायान् परामष्टुं परिसरपरिवारस्य यः कोऽपि सदस्यः स्वतन्त्रो वर्तते । शास्त्रान्तरैः सह स्वशास्त्रस्य साम्यं वैषम्यं च विज्ञातुम् आत्मगतसन्देहान् दूरीकर्तुं च सर्वस्मै अपि जिज्ञासवे अत्र

मुक्तावसरः वर्तते । एवं शास्त्राणि सञ्जीवयत्याः वाक्यार्थपरिषदः अपरं वैशिष्ट्यं नाम वाक्यार्थभारती इत्याख्यायाः शोधपत्रिकायाः प्रतिवर्षं प्रकाशनमेव ।

परिसरीयविदुषां वाक्यार्थान् एकत्रीकृत्य वाक्यार्थभारती इत्येतन्नाम्नि प्रकाशनाय वाक्यार्थपरिषदः संयोजकौ आवर्षं यतेते । तदनु वर्षेऽस्मिन् वाक्यार्थपरिषदः संयोजकस्थाने न्यायविभागाध्यक्षाः आचार्याः का. इ. मधुसूदनवर्याः साहित्यविभागीयाध्यापिकाः डा. चन्द्रकला आर्. कोण्डीवर्याश्च प्रतिष्ठापिताः । एभिः सह भारतस्य नानादिग्भ्यः शास्त्रपण्डितान् समाहूय तेषां वाग्वैभवावलोकनाय परिसरपरिवारस्य अवसरं कल्पयन्त्याः शारदाविशिष्टव्याख्यानमालायाः आयोजिकायाः विशिष्टव्याख्यानपरिषदः संयोजकाः मीमांसाविभागाध्यक्षाः आचार्याः सुब्राय वि. भट्टवर्याः शिक्षाशास्त्रविभागाध्यापकाः डा. गणेशपण्डितवर्याश्च सन्दर्भेऽस्मिन् सानन्दमभिनन्द्यन्ते । एतेषां चतुर्णामपि संयोजकानां परिश्रमेण सांस्थानिकानामपि कुलपतिकुलसचिवादीनां वरिष्ठानां सहयोगेन च इयं वाक्यार्थभारती सज्जीकृताऽस्ति । विशिष्य सुरभारत्यां प्रकाशिता शास्त्रार्थभूयिष्ठा इयं वाक्यार्थभारती अनन्तश्रीविभूषितानां जगद्गुरूणां **श्री श्री भारतीतीर्थमहास्वामिनां** तत्करकमलसञ्जातानां **श्री श्री विधुशेखरभारतीतीर्थमहास्वामिनाञ्च** पदकमलेषु लोकार्पणाय सन्नद्धा अस्तीति मत्वा वयम् अमितानन्दमनुभवामः । सन्दर्भेऽस्मिन् सर्वविधसाहाय्यं कल्पितवद्भ्यः अस्माकं कुलपतिवर्येभ्यः **प्रो.**

**परमेश्वरनारायणशास्त्रि**वर्येभ्यः कुलसचिवेभ्यः **एस्. सुब्रह्मण्यशर्म** वर्येभ्यश्च कार्तज्ञ्यं समर्पयामः। शास्त्रपरम्परापरिवारपरिरक्षणदक्षान् उभयजगद्गुरून् जगदम्बां शारदाम्बां च सभक्तिश्रद्धं प्रणमामः।

ए. पी. सच्चिदानन्दः

आचार्यः ए. पि. सच्चिदानन्दः

(प्राचार्यः)

हेमलम्बिसंवत्सरस्य

श्रावणशुक्लपञ्चमी, शुक्रवारः

२८-०७-२०१७

# सम्पादकीयम्

प्रसिद्धमेवेदं यत् भारतदेशस्थितासु संस्कृतसंस्थास्वनितरसाधारणं स्थानं भजते शृङ्गगिरिक्षेत्रस्थः राष्ट्रियसंस्कृतसंस्थानस्य राजीवगान्धीपरिसरोऽयमिति। गीर्वाणवाण्या शास्त्राध्यापनचणाः विद्वांसः तत्तद्विद्यासाधनपटीयांसोऽन्तेवासिनश्चास्य कीर्तिममलां प्रथयन्तो विद्यन्ते । शास्त्रेषु तलस्पर्शिपाण्डित्यं न केवलमध्यनेनाध्यापनेन वा सुसम्पादम् , किन्तु तत्तद्विषयाभिज्ञतल्लजैस्सह विमर्शनमपि नितान्तमपेक्ष्यत इत्याशयेन हायनेभ्यो बहुभ्यः "वाक्यार्थपरिषत्" नाम्नी सङ्गोष्ठी काचिदुपाध्यायानामायोज्यमाना वरीवर्ति यत्र मासि मासि कतिपये विद्वांसः समवेताः सन्तः स्वस्वशास्त्रीयविचारानुपस्थापयन्ति। परुदपि परिसरीयप्राध्यापकाः नैकान् शास्त्रार्थानुपातिष्ठिपन् । तांश्च निशम्य छात्राः विद्वांसश्च सममुपकृता अभवन् । तेषां वाक्यार्थविचाराणां बहुतरजनसम्बन्धं चिरन्तनानुशीलनयोग्यत्वं च सम्पादयितुकामैः परिसरप्राचार्यैः आचार्यसच्चिदानन्दवर्यैः पुस्तकरूपेणाविष्करणं समकल्पि । तदनुसारेण विचारान् लेखबद्धान् कर्तुमभ्यर्थितैः विद्वद्भिः प्रचिकाशयिष्यमाणानां स्वस्वविषयाणां सम्यक्टङ्कितानां समर्पणेन महदुपाकारि।

एवमेव विख्यातवैभवैः तत्तच्छास्त्रकृतभूरिपरिश्रमैः बह्वर्थगर्भितानि विशिष्टव्याख्यानानि विभिन्नेषु समयेषु परिसरे

व्यधायिषत । व्याख्यानपरम्परेयं शारदाविशिष्टव्याख्यानमालानाम्ना प्रथमाना ज्यौतिषे मद्रपुरीसंस्कृतकलाशालायाः प्रांशुपालानाम् आचार्याणां ता . पे . राधाकृष्णन् नम्पूतिरिवर्याणाम् , साहित्ये नागार्जुनविश्वविद्यालये संस्कृतविभागाध्यक्षाणां प्रो. वरप्रसाद राव् वर्याणाम्, वेदान्ते तिरुपतिस्थे राष्ट्रियसंस्कृतविद्यापीठे अद्वैतवेदान्ते आचार्यकमातिष्ठमानानां प्रो . एम् .एल्. नरसिंहमूर्तिवर्याणाम् , व्याकरणे राजमहेन्द्रपुरस्थस्य संस्कृतमहाविद्यालयस्य प्राचार्यचराणां श्रीमताम् एस्. टि. के.एस्. रङ्गाचार्याणाञ्च वाक्कुसुमैः ग्रथिता । तदीयविचारा अपि पाठकलोकालोकनाय प्रबन्धेऽस्मिन् न्यवेशिषत ।

शास्त्रशः विभक्तानां विषयाणां मुद्रणं विधाय सज्जीकृतोऽयं वाक्यार्थभारतीनामप्रबन्धः दक्षिणाम्नायशृङ्गेरीपीठाधीश्वराणाम् अनन्तश्रीविभूषितानां **श्री श्री भारतीतीर्थमहास्वामिनां** तत्करकमलसञ्जातानां **श्री श्री विधुशेखरभारतीमहास्वामिनां** च निर्व्याजेन निरवग्रहेणानुग्रहेण प्राकाश्यं नीयत इति माहानयं प्रमोदस्य भागधेयस्य चावसरः । तेषामुभयेषां श्रीचरणानां पदपङ्कजसन्निधौ सश्रद्धं प्रणतिततयः समर्प्यन्ते ।

पदे पदे मार्गदर्शनं व्यवस्थां च विहितवतां प्राचार्याणां विषये आधमर्ण्यमाबिभृमः । विशिष्टव्याख्यानं प्रस्तुतवद्भ्यः पण्डितप्रवरेभ्यः विततशास्त्रार्थविचारेभ्यः च परिसरीयप्राध्यापकेभ्यः आस्माकं कृतवेदित्वमावेदयामः । तथा सुन्दराक्षरविन्यासैः आवरणपृष्ठादिपुरस्सरं

निबन्धमेनं सज्जीकृतवद्भ्यः परिसरे सङ्गणकप्राध्यापकेभ्यः श्री रवीश एन्. वर्येभ्यः टङ्कणकर्मणि साहाय्यमाचरितवद्भ्यः विद्यार्थिभ्यश्च सर्वेभ्यः धन्यवादाः हार्दाः समर्प्यन्ते । शास्त्रार्थविचारनिचयक्रोडीकरणात्मकोऽयं वाक्यार्थभारतीनवशृङ्खलायाः सप्तमोऽङ्कः पाठककरकमले नूनं भूषयिष्यतीति शम् ।

इत्थं विद्वज्जनविधेयाः

**सम्पादकाः**

**आचार्यः सुब्राय .वि.भट्टः**

**आचार्यः का .इ. मधुसूदनः**

**डा . चन्द्रकला .आर्. कोण्डी**

**डा. गणेश .टि.पण्डितः**

**हेमलम्बिश्रावणशुक्लतृतीया, बुधवासरः**

**दिनाङ्कः २६-०७-२०१७**

# संयोजकाः

## वाक्यार्थभारती



आचार्यः का. इ. मधुसूदनः



डा . चन्द्रकला आर्. कोण्डी

## शारदाविशिष्टव्याख्यानमाला



आचार्यः सुब्राय .वि.भट्टः



डा. गणेश .टि.पण्डितः

# विषयानुक्रमणिका


## अद्वैतवेदान्तः

पूर्वमीमांसान्यायानामद्वैते उपयोगः
आचार्य. एम्. एल्. नरसिंहमूर्तिः 01

आकाशस्तल्लिङ्गात्
आचार्यः महाबलेश्वर पि. भट्टः 25

परिभाषाकाराणां मिथ्यात्वानुमानविमर्शः
डा. गणेश ईश्वर भट्टः 29

सद्विविक्तत्वं मिथ्यात्वम्
डा. श्रीकरः जि. एन्. 37

स्मृत्यधिकरणम्
डा. गणपति वि. हेगडे 41

## व्याकरणम्

बहुव्रीहिसमासः
डा. एस्. टि. के. श्री रङ्गाचार्यः 46

कर्मप्रवचनीयाः
डा. सि. एस्. एस्. नरसिंहमूर्तिः 52

आद्यन्तवदेकस्मिन्
डा. चन्द्रशेखरभट्टः 61

मुखनासिकावचनोऽनुनासिकः
डा. सि. एच्. कृष्णानन्तपद्मनाभम् 66

सम्प्रदानविचारः

डा. प्रमोद भट्टः 71

कर्मवत् कर्मणा तुल्यक्रियः

एल्. सविता आर्या 77

मीमांसा

उपमानम्

आचार्यः सुब्राय वि. भट्टः 84

विध्यर्थविवेचनम्

डा. सूर्यनारायणभट्टः 94

अपूर्वसद्भावनिरूपणम्

डा. एस्. वेङ्कटेशताताचार्यः 104

न्यायः

नञर्थविमर्शः

आचार्यः का. इ. मधुसूदनः 111

उद्भिद्-प्राणसम्बन्धस्य विमर्शः

डा. नवीनहोळ्ळः 123

प्रतिबध्यप्रतिबन्धकभावविचारः

विद्वान् श्यामसुन्दरः ए 130

तत्त्वचिन्तामणौ आकाङ्क्षास्वरूपविचारः

डा. आर्. नवीनः 136

साहित्यम्


ध्वन्यात्मभूते शृङ्गारे शब्दालङ्कारविनिवेशः (रसगङ्गाधरानुसारम्)
आचार्यः वरप्रसाद राव् 142

पण्डितराजजगन्नाथोक्तः काव्यकारणसिद्धान्तविशेषः
आचार्यः वरप्रसाद राव् 149

साहित्यशास्त्रे तात्पर्यवृत्तिविचारः
आचार्या पि. इन्दिरा 156

उपमादोषाणां पदादिदोषानतिरिक्तत्वनिरूपणम्
डा. राघवेन्द्रभट्टः 173

अदोषावित्यत्र नञर्थः कः ?
डा. चन्द्रकला आर्. कोण्डी 184

करुणादिरसस्थायिनः शोकादेः सुखजनकता
डा. कोम्पेल्लि विनयकुमारः 189


ज्यौतिषम्


जननसमयनिर्णयस्यावश्यकता अस्ति वा ?
ता. पे. राधाकृष्णन् नम्पूतिरिः 200

सप्तर्षिचारः
डा. मुरलीकृष्णः टि. 205

फलनिर्णये संज्ञायाः प्रयोजनम्
डा. प्रसाद भट्टः 213

गोचरफलचिन्तनक्रमः
डा. रमानन्द भट्टः 220

वास्तुशास्त्रानुसारं निर्मितं गृहं पुरुषार्थसाधकम्
डा. सुधांशुकुमारनन्दः 237

शिक्षाशास्त्रम्

शिक्षायां चिन्तनस्य सर्वोच्चस्थितिविशेषस्तर्कः
डा. चन्द्रकान्तः 245

व्यवहारः (Behavior)
डा. रामचन्द्रलबालाजि 250

मुक्तसाहचर्यम्
डा. हरिप्रसादः के. 258

मनोमयं जगत्सर्वम्
डा. गणेश ति. पण्डितः 264

भाषाशिक्षणसिद्धान्ताः
डा. वेङ्कटरमणभट्टः 268

अधिगमप्रक्रियाविवेचनम्
डा. नारायण वैद्य 272

छात्रशिक्षणम्
डा. अरविन्दकुमारसोमदत्तः 277

# पूर्वमीमांसान्यायानामद्वैते उपयोगः

**आचार्य. एम्. एल्. नरसिंहमूर्तिः**

कुलपतिः

राष्ट्रियसंस्कृतविद्यापीठम्,तिरुपतिः

सुविदितमेवैतत् समेषामास्तिकविदुषां यत् भारतीयदार्शनिकसम्प्रदायः सर्वोऽपि वेदाधारित इति। स च वेदोऽपौरुषेयः। वेदार्थप्रपञ्चनायैव शास्त्राणि प्रवृत्तानि। वेदस्य प्रतिपाद्यो भवति धर्मः। तदुच्यते "वेदोऽखिलो धर्ममूलम्" इति। स च धर्मः प्रवृत्तिनिवृत्त्युभयात्मकः। प्रवृत्तिधर्मः यागादिरूपः। तत्सर्वं विचार्यते पूर्वमीमांसायाम्। निवृत्तिधर्मस्तु मोक्षोपयोगी सन्यासादिरूपः। तत्सर्वं विचार्यते वेदस्यान्तिमे भागे अर्थात् उपनिषत्सु। उपनिषद् एव वेदान्तशब्देनाभिधीयन्ते। अतः वेदान्तः साक्षान्मोक्षशास्त्रमित्युच्यते। वेदान्ते प्रस्थानत्रयमिति सुमहत्प्रसिद्धम्। तच्च उपनिषदः, भगवद्गीता बादरायण-प्रणीतशारीरकसूत्राणीति। एतत्त्रितयस्य भगवत्पादीयं भाष्यं प्रसन्नगम्भीरं च सुप्रथितम्। एवं प्रस्थानत्रितयं तद्भाष्यं चाधारीकृत्य व्याख्योपव्याख्यानानि बहुभिराचार्यैः आरचितानि। तथा अन्येऽपि ग्रन्थाः विरचिताः। वेदान्ते प्रतिपाद्यं तु जीवब्रह्मैक्यमेव। इतरे चानुषङ्गिकरूपेण प्रमेयाः विचार्यन्ते यथा, जीवः, जगत्, ईश्वरः, माया, अविद्या, जगत्कारणम्, जगन्मिथ्यात्वम् इत्यादयः। एतादृशप्रमेयाणां विवरणावसरे सिद्धान्तानां प्रतिपादनावसरे बहवः मीमांसान्यायाः सहकारितया स्वीक्रियन्ते। विशिष्य भामतीकार-कल्पतरुकार-परिमलकार-न्यायरक्षामणिकारप्रभृतिभिः वेदान्तसिद्धान्त-

समर्थनाय पूर्वमीमांसान्यायाः उपयुक्ताः। यद्यपि बहवः न्यायाः वेदान्ते सञ्चारिताः, ते सर्वे न इह प्रतन्यन्ते, किन्तु स्थालीपुलाकन्यायेन केचन पूर्वमीमांसान्यायाः अत्र विचार्यन्ते यथामति।

**1. उपक्रमाधिकरणन्यायः –**

स चेत्थम् – ”उच्चैर्ऋचा क्रियते” इत्यादिविधिवाक्यगताः अपि ऋगादिशब्दाः “त्रयो वेदा अजायन्त” इत्युपक्रमवाक्ये अर्थवादगतत्वेन स्थितमपि वेदशब्दं एकवाक्यतासम्पत्तये अनुसृत्य ऋगादिजातिवाचकत्वं त्यजन्तः लक्षणया वेदपरा भवन्ति इति “वेदो वा प्रायदर्शनात्” (जै.सू.-6-3-2) इत्यत्र प्रतिपादितम्।

अत्र सूत्रे वाशब्दः एवकारार्थकः। वेद इति सामान्याभिप्रायेणैकवचनम्। “उच्चैर्ऋचा क्रियते” इत्यादिविधिवाक्ये ऋगादिशब्दानां लक्षणया वेदपरकत्वं विवक्षितम्, न तु ऋगादिर्मन्त्रः। कुत इत्युक्तौ प्रायदर्शनात् इति हेतुः। अत्र प्रेत्युपसर्गपूर्वकेण्धातोः भावे घञि निष्पन्नः प्रायशब्दः उपसर्गमहिम्ना उपक्रमवाचकः। उपक्रमे वेदशब्दश्रवणादित्यर्थः। सूत्रस्थदर्शनशब्दः श्रवणपरः।

**अस्य न्यायस्योपयोगः –**

“आकाशस्तल्लिङ्गात्” इत्याकाशाधिकरणे (ब्र.सू.1.1.22) छान्दोग्यवाक्यं "अस्य लोकस्य का गतिरिति आकाश इति होवाच” इति वाक्यं विचारितम्। अत्राकाशशब्दार्थः किं भूताकाशः उत परमात्मा इति आकाशश्रुतिब्रह्मलिङ्गाभ्यां संशय्य भूताकाश इति पूर्वपक्षं प्रदर्श्य आकाशः

 ISSN – 2249-538X

अत्र परमात्मा इति सिद्धान्तितम् । अत्रायं पूर्वोक्तन्यायः स्वीकृतः। तद्यथा ”अस्य लोकस्य का गतिरिति आकाश इति होवाच, सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति आकाशो ह्येवेभ्यो ज्यायानाकाशः परायणम्” इति सर्वकारणत्वावरुद्धायां बुद्धौ आकाशशब्देन तद्विरुद्धभूताकाशस्वीकारे वाक्यशेषेण सह एकवाक्यता न भवेत्। ”सम्भवत्येकवाक्यत्वे वाक्यभेदस्तु नेष्यत” इति न्यायानुसारेण एकवाक्यतासम्पत्तये ”सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते” इत्यादिलिङ्गमहिम्ना उपक्रमस्थ आकाशशब्दः परमकारणे ब्रह्मणि प्रयुक्त इति पूर्वोक्तमीमांसान्यायमनुसृत्य सिद्धान्तितः।

**(2) अपच्छेदन्यायः**

अद्वैतसिद्धान्तानुसारेण ब्रह्मैकमेव सत्यं जगन्मिथ्या इति हि प्रतिपाद्यते । “नेह नानास्ति किञ्चन” इत्यादिश्रुतिभिः जगतः मिथ्यात्वं प्रतिपाद्यते । परं प्रत्यक्षप्रमाणेन घटपटादिप्रपञ्चस्य सत्यत्वं गृह्यते । यद्बाध्यं तन्मिथ्या इति व्याप्तिः । यत्सत् तन्न बाध्यमिति च । एवं प्रत्यक्षेण ‘सन् घटः, सन् पटः’ इति सत्वग्रहणात् श्रुत्या अभिधीयमानं जगतः मिथ्यात्वं सत्वग्राहिप्रत्यक्षेण विरुध्यते । एवमनयोः प्रत्यक्षश्रुतिप्रमाणयोः परस्परविरोधे किं प्रत्यक्षस्य प्रामाण्यमुत श्रुतेः इति निर्णयार्थं श्रुतिप्रत्यक्षयोः प्राबल्यदौर्बल्यविचारः क्रियते । अवसरेऽस्मिन् आगमप्रत्यक्षयोः कतरस्य प्राबल्यमिति निर्णयाय पूर्वमीमांसाप्रतिपादितः अपच्छेदन्यायः आश्रीयते । न्यायेनानेन श्रुतेः प्राबल्यमिति विनिर्णीय जगन्मिथ्यत्वसिद्धान्तः प्रतिपाद्यते । तद्यथा – पूर्वस्य प्रत्यक्षस्य परेणागमेनापच्छेदन्यायेन बाध इति ब्रह्मसिद्धिकारः

मण्डनमिश्रः । वाचस्पतिना मण्डनपृष्ठसेविनापि आगमस्य प्रत्यक्षबाधकत्वे अपच्छेदन्यायः उदाहृतः । तथा च पारमर्षं जैमिनीयं सूत्रम् – "पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्" इति।

पूर्वात् परबलीयस्त्वं तत्र नाम प्रतीयताम् ।

अन्योन्यनिरपेक्षाणां यत्र जन्मधियां भवेत् । इति ।

परिमले चायमर्थः विवृतः । किञ्च श्रुतिप्रत्यक्षयोः मिथ्यात्वसत्यत्वग्राहिणोः परस्परविरोधेऽपि दोषदूषितात् प्रथमप्रवृत्तात् प्रत्यक्षात् निर्दोषा श्रुतिरेव बलीयसी । "प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम्" इति स्मरणाच्च । ननु प्रत्यक्षस्य ज्येष्ठत्वेन पूर्वत्वात् उपजीव्यत्वाच्च श्रुतिबाधकत्वमेव युक्तमिति चेन्न, तत्र पूर्वस्य परोपजीव्यत्वं अर्थात् प्रत्यक्षस्य आगमोपजीव्यत्वाभावात् न श्रुतिबाधकत्वमिति । किञ्च भामतीकारानुसारेण न श्रुतिमात्रस्य प्रत्यक्षापेक्षया प्राबल्यमुच्यते किं तर्हि, तात्पर्यवती श्रुतिः प्रत्यक्षात् बलवती । यत्र तु प्रत्यक्षादिविरोधः प्रसज्यते तत्र विरोधपरिहाराय लक्षणा अंगीकार्या । यथा "कृष्णलं श्रपयेत्" इति श्रपणस्य कृष्णलार्थत्वेऽपि कृष्णले रूपरसपरावृत्तिप्रादुर्भाव-पर्यन्तमुख्यश्रपणसम्बन्धः प्रत्यक्षविरुद्ध इति तदविरोधाय श्रपणशब्दस्य उष्णीकरणमात्रे लक्षणाभ्युपगमात्, एवं तत्त्वमसिवाक्येऽपि जीवब्रह्मैक्यप्रतिपादने तात्पर्येऽपि त्वंतत्पदवाच्ययोरभेदः प्रत्यक्षविरुद्ध इति तदविरोधाय निष्कृष्टचैतन्ये लक्षणाभ्युपगमाच्च, एवं ज्येष्ठप्रमाणप्रत्यक्षविरुद्धस्थले यथा लक्षणाश्रयणादिना विरोधपरिहारः क्रियते एवं सत्यत्वमिथ्यात्वग्राहकयोः प्रत्यक्षश्रुतिप्रमाणयोः विरोधपरिहारः कथमिति जिज्ञासा ।

 ISSN – 2249-538X

अत्रोच्यते, अनयोर्विरोधपरिहाराय प्राबल्यदौर्बल्यविचारः कर्तव्यत्वेनापतितः। स चात्रापच्छेदन्यायमाश्रित्य। तदनुसारेण श्रुतिप्राबल्यं निर्णीयते । अपच्छेदन्यायश्च इत्थम् – ज्योतिष्टोमे बहिष्पवमानार्थमन्योन्यं सम्बध्य यज्ञशालातो बहिर्विनिर्गच्छतां ऋत्विजां गमनं श्रूयते – अध्वर्युं विनिष्क्रामन्तं प्रस्तोता सन्तमीयात्, तं प्रतिहर्ता, तमुद्गाता, तं ब्रह्मा, तं यजमान इत्यध्वर्युप्रभृतीनां कच्छं धृत्वा प्रस्तोत्रादीनां गमनमुक्तम् (सन्तमीयात् – कच्छं धृत्वा अनुगच्छेत्) एवं गच्छतां विच्छेदे श्रूयते प्रायाश्चित्तं – यदि प्रस्तोता अपच्छिन्द्यात् ब्रह्माणि वरं दद्यात्, यदि प्रतिहर्ता सर्ववेदसं दद्यात्, यद्युद्गाता अदक्षिणं यज्ञमिष्ट्वा तेन पुनर्यजेत तत्र तत् दद्यात् यत् पूर्वस्मिन् दास्यन् स्यादिति । (सर्ववेदसं सर्वस्वं दद्यात् दक्षिणारुपेणेत्यर्थः) तत्र क्रमेण प्रतिहर्त्रुद्गात्रोरपच्छेदे किं पूर्वनिमित्तकं सर्वस्वदक्षिणारूपं प्रायश्चित्तमनुष्ठेयम्, अथवा उत्तरनिमित्तकोऽदक्षिणाकयागानुष्ठानरूपं प्रायश्चित्तमनुष्ठेयमिति संशयः। तत्र पूर्वस्य तावत् असंजातविरोधित्वेन प्रबलत्वात् प्रतिहर्त्रपच्छेदनिमित्तकं सर्वस्वदाक्षिणारूपं प्रायाश्चित्तमनुष्ठेयमिति पूर्वपक्षे पारमर्षं सूत्रम् – पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत् । इति । नानुपमृद्य पूर्वं तद्विरोध्युत्तरमुत्पत्तुमर्हति इति न्यायेन पूर्वोपमर्देन परप्राबल्यस्यैव न्याय्यत्वात् उद्गात्रपच्छेदनिमित्तकप्रायाश्चित्तानुष्ठानस्यैव कर्तव्यत्वात् परेण पूर्वस्य बाध इति सिद्धान्तितः। (द्वयोर्युगपदुच्छेदे तु प्रायश्चित्तानुष्ठाने विकल्पः)

तात्पर्यस्यैव प्राबल्यप्रयोजकत्वमिति भामतीकारपक्षः विवरणानुसारिभिः (विवरणवार्तिककारैः) नाङ्गीकृतः। यतो हि यदि तात्पर्यवती श्रुतिः प्रबला तर्हि प्रत्यक्षविरोधपरिहाराय "कृष्णलं श्रपयेत्"

"यजमानः प्रस्तरः" इत्यादिषु लक्षणा नाश्रयणीया भवेत् परन्तु आश्रीयते इत्येतदेव तात्पर्यस्य प्राबल्यप्रयोजकत्वनियमं बाधत इत्यर्थः। तर्हि कथं श्रुतेः प्राबल्यमिति चेत्,

अत्रोच्यते – "प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतम्" इति वचनेन श्रुतिमात्रस्य प्राबल्यं प्रत्यक्षाद्यपेक्षया आगमत्वादेव सिद्धत्वात् । तन्मात्रस्य प्राबल्ये अन्यदपि हेतुद्वयं निर्दोषत्वात्, परत्वात् इति । श्रुतिमात्रस्य निर्दोषत्वात् परत्वात् च प्राबल्यमित्युत्सर्गः, श्रुतितदितरप्रमाणयोर्विरोधे सति श्रुतिरेव बाधिका भवति, यत्र च श्रुतिबाधितं प्रत्यक्षादि कथंचित् स्वोचितविषयोपहारेण सम्भावनीयम् । अन्यथा श्रुतिबाधितं प्रत्यक्षं निरवकाशं भवति, तेन श्रुतिरेव बाध्यते, "सावकाशनिरवकाशयोर्निरवकाशं बलवत्" इति न्यायात् । यतो हि निर्विषयज्ञानानङ्गीकारात् । अत एव प्रत्यक्षस्य निर्विषयत्वपरिहारायैव श्रुतिविरोधस्थले "कृष्णलं श्रापयेत्" इत्यादिषु लक्षणा आश्रयणीया।

एवमपच्छेदन्यायेन परत्वात् श्रुतेः प्राबल्येन मिथ्यात्वग्राहकश्रुत्या सत्वग्राहिप्रत्यक्षस्य बाधः। द्वैतप्रपञ्चे प्रतीयमानस्य सत्वस्य श्रुत्या बाधे सति तत्र सत्वान्तराभावात् सत्वप्रत्यक्षं निर्विषयं स्यात् , न चैतद्युज्यते, प्रत्यक्षज्ञानस्य निर्विषयत्वादर्शनात् तदनभ्युपगमाच्च। परं द्वैतप्रपञ्चे पारमार्थिकसत्वस्य श्रुत्या अपहृतत्वेऽपि व्यावहारिकस्य सत्वस्य तया अनपहृतत्वात् सत्वप्रत्यक्षस्य न निरवकाशत्वम् । पूर्वं दृष्टमपि रजतं आप्तोपदेशेन पश्चाद् बाध्यते , तावता न सर्वथा पूर्वदर्शनस्य निर्विषयत्वं, किन्तु प्रातिभासिकरजतविषयकत्वमितिवत् पूर्वप्रमाणस्यापि प्रत्यक्षस्य परेण

 ISSN – 2249-538X

अपच्छेदन्यायोक्तरीत्या प्रबलेन प्रमाणेन बाधः, तथा च मिथ्यात्वश्रुत्या सत्वग्राहिप्रत्यक्षस्य बाधः, प्रत्यक्षस्य व्यावहारिकसत्वग्राहितया न सर्वथा निर्विषयत्वमिति।

**3. उक्थ्याग्निष्टोमाधिकरणन्यायः –**

स चेत्थम् – उक्थ्याग्निष्टोमसंयोगादस्तुतशस्त्रः स्यात् सति हि संस्थाऽन्यत्वम् (जै.सू.10.5.12) इति दाशमिकाधिकरणे "अप्यग्निष्टोमे राजन्यस्य गृह्णीयादप्युक्थ्ये ग्राह्यः" इति वचनात् राजन्यनिमित्तेनोक्थ्याग्निष्टोमयोः कर्तव्यः षोडशिग्रहयागाभ्यासः किं स्तोत्रशस्त्ररहितः उत तत्सहित – इति संशय उद्भावितः। ततश्च उक्थ्यस्याग्निष्टोमस्य च सतः षोडशियागाभ्यासविधानात् तदङ्गस्य षोडशिस्तोत्रस्यानुष्ठाने क्रतोरुक्थ्यस्तोत्रान्तत्वरूपस्योक्थ्यत्वस्य अग्निष्टोमस्तोत्रान्तत्वरूप-स्याग्निष्टोमत्वस्य चोपमर्दप्रसङ्गात् स्तोत्रशस्त्ररहितः स्यादिति पूर्वपक्षं प्रदर्श्य षोडशियागाभ्यासविधिना साङ्गस्य तस्य विधानेन तदङ्गभूतयोः स्तोत्रशस्त्रयोरनिवार्यत्वात् विधेयेन संस्थान्तरेणानुवाद्ययोः उक्थ्याग्निष्टोमसंस्थयोरुपमर्दो न्याय्य इत्यतः स्तोत्रशस्त्रसहित एव षोडशिग्रहयागाभ्यासः स्यात्। एवञ्चोक्थ्यसंस्थोऽग्निष्टोमसंस्थो वा यः क्रतुः प्राप्तः स राजन्यस्य न तथा, किन्तु प्राप्तसंस्थोपमर्देन षोडशिसंस्थः कर्तव्य इति। तदुक्तं च –

उक्थ्यसंस्थो हि यः प्राप्तस्तथाऽग्निष्टोमसंस्थिकः।
राजन्यस्य तथा नासौ किन्तु षोडशिसंस्थिकम्॥ इति।

अयं च न्यायः वेदान्ते प्रमिताधिकरणसिद्धान्तप्रतिपादनाय स्वीकृतः। तथाहि- "अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति' (क. 2.1.12) इति "अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः। ईशानो भूतभव्यस्य स एवाद्य स उ श्वः; एतद्वै तत्" (क.2.4.13) इति च कठवल्लीमन्त्रे श्रुतः पुरुषः किं जीवः उत ब्रह्म इति संशयः। संशयबीजं तु अल्पपरिमाणलिङ्गं तथा ईशानश्रुतिश्च। तत्र जीव इति पूर्वपक्षः, ब्रह्मेति सिद्धान्तः।

तत्र अङ्गुष्ठमात्र इति जीवलिङ्गस्यैव प्राथम्येन श्रवणात्, चरमश्रुतेशानश्रुत्यपेक्षया जीवलिङ्गश्रुतेः प्राथम्येन प्रबलत्वात्, स्वभावबलादपि प्राथम्यस्य बलाधिक्यात् पुरुषोऽत्र जीव एवेति पूर्वपक्षः।

सिद्धान्तस्तु – अङ्गुष्ठप्रमितः परमात्मा, तदभिधानश्रुतिरूपादीशानशब्दात्। ननु ईशानश्रुत्यनुरोधे प्रथमश्रुतं हृदयोपाधिकमङ्गुष्ठमात्रत्वं प्रतिष्ठितं जीवलिङ्गं कथं नेतव्यमिति चेदित्थम् – जीवस्यैव सतोऽङ्गुष्ठमात्रस्याङ्गुष्ठपरिमाण जीवभावोपमर्देन "तत्त्वमसि" वाक्यवत् ब्रह्मभाव उपदिश्यते इति नेतव्यम्। यतो हि प्रथमश्रुतस्याप्यनुवाद्यस्य तात्पर्यवता विधेयेन विरोधे सत्युपमर्दो युक्त एव, उक्थ्याग्निष्टोमाधिकरणन्यायात्। साङ्गस्य षोडशियागाभ्यासविधिना विधानेन तदङ्गभूतस्तोत्रशस्त्र-योरप्यनिवार्यत्वेन विधेयसंस्थान्तरेणानुवाद्ययोः उक्थ्याग्निष्टोमसंस्थोयोरुपमर्दो न्याय्य इति स्तोत्रशस्त्रसहित एव स्यात्। तथा च उक्थ्यसंस्थो अग्निष्टोमसंस्थो वा यः क्रतुः प्राप्तः स राजन्यस्य न तथा, किन्तु प्राप्तसंस्थोपमर्देन षोडशिसंस्थः कर्तव्य इति। तद्वदिहापि अन्तःकरणो-पाधिपरिकल्पितरूपतया योऽङ्गुष्ठमात्रः प्राप्तो जीवः स न तथा, किन्तु असङ्कुचितसकलभूतभविष्यद्वर्तमानवस्तुनियन्तृत्वप्राप्तसकलान्तरावस्थानत

या व्यापकः परमात्मैव इति जीवभावोपमर्देन परमात्मनः प्रतिपादकोऽयं मन्त्रः इति ।

**4. निषादस्थपतिन्यायः –**

जैमिनीये षष्ठाध्याये चिन्तितम् – स्थपतिर्निषादः स्यात् शब्दसामर्थ्यात् (जै.सू.6.1.51) रौद्रीमिष्टिं विधायानन्तरमुच्यते "एतया निषादस्थपतिं याजयेत्" इति । तत्र निषादस्थपतिः त्रैवर्णिकानामन्यतमः उतान्य इति सन्देहः। अग्निविद्यावत्वेन समर्थत्वात् अनिषादेऽपि निषादानां स्थपतिः स्वामीति शब्दप्रवृत्तिसम्भवात् त्रैवर्णिकानामन्यतमः निषादस्थपतिः इति पूर्वपक्षः।

अत्रोच्यते – निषाद एव स्थपतिः, तथा च निषादश्चासौ स्थपतिश्चेति कर्मधारयसमासः। निषादशब्दस्य श्रौतार्थलाभेन शब्दसमार्थ्यात् षष्ठीसमासे तु सम्बन्धो लक्ष्येत, षष्ठ्यश्रवणात् समासस्थषष्ठीलोपोऽपि शब्दाभावत्वात् नैव षष्ठ्यर्थबोधी द्वितीयायाश्च प्रत्येकं निषदस्थपतिशब्दाभ्यां सम्बन्धसम्भवे सति नाश्रुतषष्ठी कल्पनीया। षष्ठीसमासात् कर्मधारयो बलीयान् । यतो हि ऐक्ये लाघवं सम्बन्धे भेदकल्पनागौरवम् इति सार्वत्रिकः कर्मधारयबलीयस्त्वे हेतुः। तथा च निषाद एव स्थपतिरिति कर्मधारयाश्रयणेन सामानाधिकरण्येन निषादस्थपत्यौरेक्यमेव न भेद इति सिद्धान्तितम् ।

**अस्य न्यायस्योपयोगः –**

शारीरकमीमांसायां दहराधिकरणे (ब्र.सू.1.3.14) दहरकाशः किं भूताकाशः, विज्ञानात्मा उत परमात्मेति संशय्य दहरकाशः भूताकाशः, अथवा विज्ञानात्मा इति पूर्वपक्षं प्रदर्श्य दहराकाशः परमात्मा, उत्तरेभ्यः वक्ष्यमाणेभ्यः

हेतुभ्यः इति सिद्धान्तितम्। तत्र उत्तरत्र वक्ष्यमाणाः हेतव क इति जिज्ञासायां उत्तरहेतुनिरूपणार्थमुक्तेषु सूत्रेषु श्रूयते सूत्रं "गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च" (ब्र.सू.1.3.15) इति। दहरशब्दार्थः परमात्मा, कुतः, यस्माद्दहरवाक्यशेषे परमेश्वरप्रतिपादकौ गतिशब्दौ भवतः – "ईमाः सर्वाः प्रजाः अहरहर्गच्छन्त्यः एतं ब्रह्मलोकं न विन्दन्ति" (छा.8.3.2) इति। अस्यां श्रुतौ तावत् प्रकृतं दहरमेव ब्रह्मलोकशब्देनाभिधाय तद्विषया गतिः प्रजाशब्दवाच्यानां जीवानामभिधीयमाना दहरस्य ब्रह्मतां गमयति। जीवानां चाहरहः ब्रह्मविषयं गमनं श्रुत्यन्तरे श्रूयते – " सता सोम्य तदा सम्पन्नो भवति" (छा.6.8.1) इति। अतः दहरे ब्रह्मलोकशब्दप्रयोगदर्शनात् दहरस्य ब्रह्मतां गमयति इति।

ननु ब्रह्मलोकशब्दः दहर इत्येव कथं ब्रवीति, यावता कमलासनलोकः अर्थात् सत्यलोकः अपि ब्रह्मलोकशब्देनाभिधीयते, कथं तर्हि ब्रह्मलोकशब्दः दहरस्य ब्रह्मतां गमयति इति प्रश्नः। अत्रोच्यते, गमयेद्यदि ब्रह्मणो लोकः इति षष्ठीसमासाश्रयणं स्यात्। न तु तथा, अपि तु निषादस्थपतिन्यायेनात्र कर्मधारयसमासाश्रयणमेव कर्तव्यम्। तथाहि – ब्रह्मैव लोकः इति कर्मधारयसमासाश्रयणेन सामानाधिकरण्येन ब्रह्मलोकयारैक्येन ब्रह्मलोकः दहरस्य परमात्मतां ग्राहयति इति सिद्धान्तः। कुतोऽत्र षष्ठीसमासं परित्यज्य कर्मधारय आश्रीयत इत्युक्तौ तत्र कर्मधारयसमासास्थापनाय लिङ्गमप्यधिकमस्ति इत्युक्तं सूत्रकारेण "तथा हि दृष्टं लिङ्गं च" (ब्र.सू.1.3.15) इति। लोकवेदप्रसिद्धाहरहर्ब्रह्मलोकप्राप्त्यभिधानमेव लिङ्गं, कमलासन-लोकप्राप्तेरदर्शनात् तद्व्यावर्तयन् षष्ठीसमासशङ्कां उक्तनिषादस्थपतिन्यायेन

 ISSN – 2249-538X

ब्रह्म च तल्लोकश्चेति कर्मधारयः सिद्धो भवति । तेन ब्रह्मैव लोक इति सामानाधिकरण्येनैक्ये सिद्धे सति दहरस्य ब्रह्मतां गमयति इति ।

**5.प्रमाणस्य स्वरूपप्रयुक्तबलादपि प्रमेयाश्रयबलाधिक्यन्यायः**

प्रायशः श्रुत्योः परस्परविरोधे तात्पर्यवत्याः श्रुतेः प्राबल्यम्, स्मृत्योरेव परस्परविरोधे क्लृप्तश्रुतिमूला स्मृतिः प्रबला, कल्प्यश्रुतिमूला स्मृतिः दुर्बला इति । एवं श्रुतिस्मृत्योः परस्परविरोधे श्रुतेरेव प्राबल्यमिति सामान्यनियमः। परमस्य नियमस्यापवादः प्रदर्शितः शिष्टाकोपाधिकरणे (जै.सू.1.3.4)। तथाहि – "क्षुत आचामेत्" इत्यादिस्मृतिः दृश्यते। सा प्रधानभूताचमनादि-पदार्थाश्रया। "वेदं कृत्वा वेदिं करोति" इत्यादिश्रुतिः पदार्थगुणभूतक्रम-विषया श्रूयते । अनयोः श्रुतिस्मृत्योः मध्ये "क्षुत आचामेत्" इत्यस्याः स्मृतेरेव प्राबल्यं, प्रधानभूताचमनादिपदार्थाश्रितत्वेन प्रबलप्रमेयाश्रितत्वात् । "वेदं कृत्वा वेदिं करोति" इति तु श्रुतिः पदार्थगुणभूतक्रमबोधिका सती दुर्बलप्रमेयाश्रया इत्यतः दुर्बला इति ।

अयं च न्यायः प्रातर्दनाधिकरणे संचारितः। तथाहि – कौषीतक्यां हि एवं श्रूयते – "प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण च" इत्यारब्धा आख्यायिका । तत्र प्रदर्दनं प्रति इन्द्रवचनं श्रूयते - "प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्स्व" इति । अत्र प्राणशब्दार्थः क इति जिज्ञासा। कुत इति चेत् "प्राण एव प्रज्ञात्मा आनन्दोऽजरोऽमृत" इति ब्रह्मलिङ्गस्य, "प्राणोऽस्मि मामुपास्व, मामेव विजानीहि" इतीन्द्रलिङ्गस्य , इदं शरीरं परिगृह्योत्थापयति इति प्राणलिङ्गस्य तथा "न वाचं विजिज्ञासीत वक्तारं विद्यात्" इति च जीवलिङ्गस्य श्रवणात् संशयः । एवं लिङ्गेषु परस्पराहत्या

स्वयमकिञ्चित्करेषु प्राणश्रुतिप्रसिद्धिपरित्यागे कारणाभावात् वायुरेव प्राण इति पूर्वपक्षः। प्राणोऽत्र परमात्मा, तत्रैव उपक्रमोपसंहारैः प्रकरणस्यानुगमात् इति सिद्धान्तितम् । तदुपरि पुनः मा भूदिहेन्द्रः उपास्यः प्रतिपाद्यः, तथापि जीवप्राणब्रह्माणि त्रीणि उपास्यानि प्रतिपाद्यानि स्युः न तु ज्ञेयं ब्रह्मैव प्रतिपाद्यम् इत्याशङ्का । अत्रैवं समाधिः। उपक्रमोपसंहारैक्यरूपेण प्रबलेन तात्पर्यशालिना आताद्दृगन्यश्रुत्यादिबाधः। श्रुत्यादिषु उत्तरमपि तात्पर्य-लिङ्गवत् प्रबलम्, पूर्वमपि तद्रहितं दुर्बलमिति हि वस्तुगतिः। एवमत्रापि उपक्रमोपसंहारावगमिततात्पर्येण ब्रह्मेतरबोधकश्रुत्यादिबाधः। अतः येनोपक्रम्यते येन चोपसंह्रियते स वाक्यार्थ इति रीत्या उपक्रमोपसंहारप्रतिष्ठितं ब्रह्म तात्पर्यविषयतया ताभ्यामवगमितमिति ब्रह्म तावदतथाभूताज्जीवात् मुख्यप्राणाच्च प्रबलम्। अतः पूर्वोक्तमीमांसान्यायरीत्या प्रबलप्रमेयाश्रयं ब्रह्मवाक्यं दुर्बलप्रमेयाश्रितात् जीवमुख्यप्राणविषयश्रुत्याद्यपेक्षया प्रबलम्। तथा च उपक्रमोपसंहारैकरूप्यावगमिततात्पर्यवता तद्विषयभावब्रह्माश्रयेण वाक्येन ज्ञेयं ब्रह्मैकमेवात्र प्रतिपाद्यमित्यभ्युपगन्तव्यम् ।

**6.तद्व्यपदेशन्यायः –**

तद्व्यपदेशं च (जै.सू.1.4.5) इति सूत्रे तद्व्यपदेशमिति पदं हेतुसमर्पकम् । "श्येनेनाभिचरन् यजेत" इत्यत्र श्येनपदं गुणसमर्पकम् उत नामधेयपरम् इति संशये श्येनपदं कर्मनामेति सिद्धान्तितम् । अत्रार्थे तद्व्यपदेशपदस्य हेतुसमर्पकत्वम् । तस्मात् विधेयत्वेनाभिमतात् श्येनात् व्यपदेशः भेदेनाभिधानं यत्र तत् तद्व्यपदेशमिति बहुव्रीहिः। तादृशमभिधानं च "यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यं निपात्यादत्त" इति। अत्र

अयमिति निर्दिष्टस्य विधेयस्य प्रतीयमानं श्येनसादृश्यं गुणविधौ न घटत इति कृत्वा श्येनपदं कर्मनामधेयमिति निर्णीतम् । एवं च तद्व्यपदेशशब्दस्य विधेयत्वाभिमतगुणत्वविरोधिसादृश्यप्रतिपादनपरत्वं "यथा वै श्येन" इत्यादिवाक्यानुसारेण निश्चितम्। अयं च न्यायः आनन्दमयाधिकरणे विवक्षितार्थप्रतिपादनाय समादृतः। तथाहि –

सूत्रार्जवं मन्यमानानां वृत्तिकृतां मतानुसारेण आनन्दमयस्य ब्रह्मत्वं प्रदर्श्य श्रुतितात्पर्यविरोधात् तत्रास्वारस्यं मन्यमानैः भगवत्पादैः आनन्दमयस्य जीवपरत्वमेव इति प्रतिपादनपुरस्सरं पुच्छब्रह्मैवात्र प्राधान्येन प्रतिपाद्यमिति सिद्धान्तितम् । तदनुगुणतया सूत्राणि व्याख्यातानि । तन्मध्ये दृश्यते "भेदव्यपदेशात् " (ब्र.सू. 1.1.17) इति सूत्रम् । सूत्रार्थस्त्वेवम् – भेदविरोधी अपदेशः भेदव्यपदेशः। भेदप्रपञ्चमिथ्यात्वपर्यवसायी उपदेश इत्यर्थः। स चोपदेशः "यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह" इत्यादिरूपः । तद्विरोधात् उपस्यो जीवः न प्रतिपाद्यः। कुत इत्यक्तौ निर्विशेषस्य ज्ञेयस्य ब्रह्मणः उपास्यं सविशेषं प्रति विशेषणत्वं न युज्यते। किन्तु ज्ञेयं निर्विशेषं ब्रह्मैव पुच्छशब्देन प्रतिपाद्यते इति सूत्रार्थः। अत्र भेदव्यपदेशात् इति सूत्रपदस्य भेदविरुद्धार्थप्रतिपादनात् इत्यर्थकल्पनमयुक्तं व्यपदेशशब्दस्य तादृशार्थे प्रयोगाभावात् इत्याक्षेपे पूर्वोक्तन्यायेन अत्र सः अर्थः सम्भवतीति प्रतिपाद्यते । अस्यार्थस्योन्नयनाय पूर्वतन्त्रोक्तः पूर्वक्तन्यायः दृष्टान्तीकृतः। तद्यथा – यथा श्येनो वै निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्त" इत्यत्र अयमिति निर्दिष्टस्य विधेयस्य प्रतीयमानं श्येनसादृश्यं गुणविधौ न घटत इति कृत्वा श्येनपदं कर्मनामधेयपरमिति पूर्वतन्त्रनिर्णयरीत्या तद्व्यपदेशशब्दस्य

विधेयत्वाभिमतगुणत्वविरोधिसादृश्यप्रतिपादनपरत्वं “यथा वै श्येन” इत्यादिवाक्ये निश्चितं तद्वत् प्रकृतेऽपि “भदेव्यपदेशात्” इति सौत्रपदस्य तद्व्यपदेशन्यायानुसारेण भेदविरुद्धार्थप्रतिपादनपरत्वं निर्णीतम्।

**7. वाक्यशेषन्यायः**

पूर्वतन्त्रे तावत् एवं विचारो दृश्यते। ”अक्ताः शर्करा उपदधाति” इत्यत्र अर्थवादरूपेण “तेजो वै घृतम्” इति श्रूयते। क्षुद्रपाषाणरूपाणां शर्कराणामञ्जनं कृत्वा वेद्यामुपधानं कर्तव्यम्। अञ्जनं च द्रवद्रव्येण कर्तव्यम्। घृततैलादिरूपेण नानाविधानि द्रवद्रव्याणि भवन्ति। एवं स्थिते केनापि द्रवद्रव्येण अञ्जनं करणीयम् उत घृतेनैवेति संशयः। प्रधानविधौ केनापि द्रवेण अञ्जनमात्रमनुमतम्। अतः अर्थवादरूपे उपसर्जनवाक्ये श्रूयमाण-घृतशब्दः द्रवद्रव्यमात्रलक्षकत्वेन नेयमिति पूर्वपक्षः। विधौ विशेषद्रवद्रव्यं विहितं चेत् अर्थवादेन तस्य बाधः कर्तुं न शक्यते। अर्थवादस्य एकवाक्यत्वमर्यादामनुरुध्य विधेयस्तावकत्वे तात्पर्यवत्वात्। अत्र विधिवाक्येन अञ्जनसाधनत्वेन घृतमपि सामान्यरूपेणानुमतमेव भवति। एवं सामान्यरूपेणानुमतमेव घृतद्रव्यं एकवाक्यतापन्नः अर्थवादः स्तौति इत्येव निश्चीयते। अपि च विधिः सामान्ये प्रवर्तको न भवति। यतो हि सामान्यप्रवर्तकेन विधिना लोके न कश्चिदपि प्रवर्तितुं शक्नोति। अतोऽत्र अर्थवादः अञ्जनसाधनत्वेन घृतं समर्पयन् विधिनिष्ठप्रवर्तकत्वमुपष्टम्भयति। अतः अञ्जनसामान्यविधिः वाक्यशेषबलात् घृतरूपविशेषे पर्यवस्यतीति सिद्धान्तः।

 ISSN – 2249-538X

अस्य न्यायस्योपयोगः अत्त्रधिकरणे इत्थं कृतो दृश्यते – "अत्ता चराचरग्रहणात्" (ब्र.सू.1.2.9) इति बादरायणीयं सूत्रम् । "यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः। मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः" इति कठवल्लीवाक्यमधिकरणस्यास्य विषयः। अत्र ओदनोपसेचनसूचितः कश्चिदत्ता प्रतीयते । स किं जीव उत परमेश्वर इति संशयः। ओदनप्रतिसम्बन्धित्वेन अत्ता खलु जीवरूपो भोक्ता भवतीति हेतोः जीव एवात्र अत्ता, न परमात्मा, पूर्वाधिकरणे परमात्मनः भोक्तृत्वनिषेधात् इति पूर्वपक्षसंक्षेपः। अत्र मन्त्रे प्रतीयमानः अत्ता परमात्मैव न तु जीवः। कुतः? यतो हि कृत्स्नं हि चराचरं अत्र ओदनत्वेन गृह्यते। अतः अत्तृत्वं सर्वसंहर्तृत्वरूपम्। जीवस्य तु कृत्स्नचराचरसंहर्तृत्वं न सम्भवति।

ननु मन्त्रे न चराचरशब्दः श्रूयते । अतः चराचरसंहर्तृत्वरूपमत्तृत्वमिति कथं निर्णीयते ? ओदनशब्देन भोग्यं लक्ष्यते। तत्प्रतिसम्बन्धी अत्ता संहर्तेति कथं युज्यते ? इति चेदत्रैवं समाधीयते । ब्रह्मक्षत्रयोः ओदनत्वेन, मृत्योश्च उपसेचनत्वेन रूपणं दृश्यते। तेन अदनीयान्नादिवत् अत्तुः सम्बन्धः प्रतीयते। मृत्युमिश्रणप्रतीतिबलेन ब्रह्मक्षत्रशब्दयोः चराचरात्मके विनाश्यवस्तुमात्रे लक्षणा स्वीक्रियते। मृत्योः उपसेचनत्वरूपणेन ओदनशब्दोऽपि विनाश्ये लाक्षणिकः । अत्र बुद्धिलाघवयुक्तिरपि जागर्ति। पदान्तरार्थोपस्थापित-गुणग्रहणम् एकवाक्यताबलात् बुद्धिलाघवेन युक्तियुक्तं भवति। अपेक्षितार्थस्य युक्त्यनुसारेण योजनापि युक्ततरा भवति। अत्रार्थे वाक्यशेषन्यायः उपयुज्यते। प्रकृते स्वबुद्धिपरिकल्पितविलम्बोपस्थिति-कार्यापेक्षया एकवाक्यतापन्नपदान्तर-प्रतीतार्थस्वीकारः युक्ततरः। अतः

मृत्युमिश्रणप्रतीतिमनुसृत्य ब्रह्मक्षत्रशब्दयोः चराचरात्मके विनाश्यवस्तुमात्रे लक्षणा स्वीक्रियते। अतः एकवाक्यतामर्यादया संसूचितः अत्ता परमात्मा इति निश्चयः।

**8.गुणमुख्यव्यतिक्रमन्यायः**

"जमदग्निः पुष्टिकामश्चतूरात्रेणायजत" इत्युत्पन्ने जामदग्न्ये अहीने चतूरात्रे क्रतौ पुरोडाशिन्य उपसदः भवन्तीति पुरोडाशासाध्या इष्टयः तैत्तिरीयके विहिताः। उपसदिति काचिदपूर्वा इष्टिः। पुरोडाशयुक्तासु इष्टिषु पुराडाशप्रदानमन्त्राः उद्गातृवेदोत्पन्नाः श्रूयन्ते । अतस्तेषां मन्त्राणामुद्गात्रा प्रयोगः कर्तव्य इति प्राप्नोति । परन्तु विनियोगविधिना अध्वर्युकर्तृकप्रदानकः पुरोडाशो विहितः। एवमुत्पत्तिविनियोगविध्योः विरोधे सति उत्पत्तिविध्यपेक्षया विनियोगविधेः प्राधान्यात् तदनुरोधेन तेषां मन्त्राणां प्रयोगः अध्वर्युणैव कार्यः नोद्गात्रा इति पूर्वतन्त्रनिर्णयः । अत्र दृष्टान्तदार्ढ्या पूर्वतन्त्राधिकरणसूत्रमुदाह्रियते "गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः" (जै.सू.3.3.8) इति। उत्पत्तिविधिः गुणः विनियोगविधिर्मुख्यः । याजुर्वेदिकेऽग्न्याधाने "य एवं विद्वानग्निमाधत्ते" इति श्रुतेस्तदङ्गत्वेन "य एवं विद्वान् वारवन्तीयं गायति, य एवं विद्वान् यज्ञायज्ञीयं गायति" " य एवं विद्वान् वामदेव्यं गायती "ति तत्रैव सामगानं श्रुतं, तत्र किमेतानि वारवन्तीयादीनि सामावेदोत्पन्नत्वात् "उच्चैःसाम्ना " इत्युच्चैष्ट्वेन स्वरेणाधाने प्रयोक्तव्यानि किं वा यत्र विनियुज्यन्ते तत्रोत्पन्नोपांशुत्वेन "उपांशु यजुषा" इति रीत्या इति सन्देहः। वेदान्तरे उत्पत्तिविधिः, वेदान्तरे च विनियोगविधिः। तयोर्विरोधे अध्वर्युप्रयोगे वारवन्तीयादौ कः स्वरः इति चिन्तायां पूर्वोत्पन्नः उत्पत्तिविधिः

 ISSN – 2249-538X

असञ्ज्ञातविरोधीति तत्प्रयुक्तः स्वरो बलीयान् इति पूर्वपक्षे प्राप्ते सिद्धान्तः आम्नानमात्रेण मन्त्रस्य प्रयोजनं नावगम्यते । विनियोगोत्तरकालमेव स्वरसम्बन्धः चिन्त्यते ।"उच्चैः ऋचा क्रियते" "उपांशु यजुषा" "उच्चैः साम्ना" इत्यत्र क्रियते इत्यस्य पूर्वपक्ष्यभिमतः उत्पाद्यते इत्यर्थः न साधुः, किन्तु क्रियते प्रयुज्यते इत्यर्थः एव साधुर्भवति। प्रयोगश्च विनियोगाधीनो भवति। तस्मात् विनियोगस्यैव पुरस्फूर्तिकत्वं भवति, तथा च उत्पत्तिविधिः प्रयोगविधेः शेष भवति। प्रयोगस्य यजुर्वेदे कृतत्वात् याजुर्वेदिकः अध्वर्युरेव मन्त्रप्रयोक्ता प्रधान इति अध्वर्युकर्तृके वारवन्तीयादिप्रयोगे यजर्वेदसम्बन्धी उपांशुस्वर एवानुष्ठेय इति।

**अस्य न्यायस्योपयोगः –**

शारीरकमीमांसायां अक्षरध्यधिकरणे इदं सूत्रम् – "अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम्" (ब्र.सू.3.3.20) इति । अधिकरणेऽस्मिन् अक्षरब्रह्मप्रमापकाः निषेधशब्दाः विषयः। "एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनवण्वह्रस्वमदीर्घमलोहित-मस्नेहम्" इत्यादि श्रूयते । एवमेव "अथ परा यया तदक्षरमधिगम्यते । यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णम्" इति चाथर्वणे श्रूयते । एवमन्यत्रापि विशेषनिषेधद्वारेण अक्षरं ब्रह्म श्राव्यते। सति चैवं अक्षरब्रह्मप्रमापकेषु तेषु यत्र यावन्तः श्रुताः तावतामशेषद्वैतनिषेधकत्वसम्भवा-सम्भवाभ्यां संशयः। अर्थात् विशेषप्रतिषेधबुद्धीनां सर्वासां सर्वत्र प्राप्तिः उपसंहारः उत व्यवस्था इति संशयः। तत्र श्रुतानामेव निषेधशब्दानामुपलक्षणत्वेनाशेषेद्वैतनिषेधद्वारा श्रुतिविभागात् व्यवस्था इति पूर्वपक्षः। अस्य समाधानम्-अक्षरविषयाः

विशेषनिषेधश्रुतयः सर्वाः सर्वत्रोपसंहर्तव्याः कुतः ? सामान्यतद्भावाभ्याम्। ब्रह्मप्रतिपादनावसरे सर्वत्र विशेषनिषेधप्रकारः समानो दृश्यते। प्रतिपाद्यं च ब्रह्म सर्वत्र एकत्वेनैव प्रत्यभिज्ञायते। अतस्तत्सम्बद्धानां शब्दप्रत्ययानां सर्वत्रोपसंहारः कर्तव्यो भवति। ततश्च शाखाभेदेन शब्दप्रत्ययभेदे प्रतीयमानेऽपि कृत्स्नश्रुत्युपसंहारेण सर्वविधद्वैतनिषेधे तात्पर्यमवगम्यते। "आनन्दादयः प्रधानस्य (ब्र.सू.3.3.11) इत्यधिकरणे आनन्दादयः प्रधानस्य ब्रह्मणो धर्माः सर्वे सर्वत्रोपसंहर्तव्या इति व्यवस्थापितम्। तत्र भावरूपाणि विशेषणानि विचारितानि। अस्मिन्नधिकरणे तु निषेधरूपाणि विशेषणानि विचार्यन्त इत्यतः न पौनरुक्त्यम्। अथापि सर्वशाखासु शेषिभूतं ब्रह्मैकमेव प्रमीयत इति तदनुरोधेन सर्वेषां शेषणामुपसंहारः कर्तव्य इति न्यायः समानः। तेन पुनरुक्तिदोषस्तदवस्थ एवेति चेत् तदधिकरणार्थस्यैवात्र प्रपञ्च इत्यतः न पुनरुक्तिः। प्रधानब्रह्मसम्बन्धिनां शाखान्तरोक्तानामपि उपसंहारः कर्तव्य इत्यत्र औपसदवत् इति दृष्टान्तः।

तथा च प्रकृतब्रह्ममीमांसाधिकरणेऽपि अद्वितीयाक्षरब्रह्मतन्त्रत्वात् तद्विशेषणानां विविधासु शाखासु उत्पन्नानामपि अक्षरब्रह्मणा सर्वत्र अभिसम्बन्धेन उक्तदृष्टान्तमाश्रित्य प्रतिपादितपूर्वमीमांसा-न्यायानुसारेण उपसंहारः प्रत्येतव्य इति निश्चीयते।

**9. व्यवहितोपमानाश्रयणन्यायः –**

शारीरकमीमांसायां द्वितीयाध्याये चतुर्थपादे प्रथमं प्राणोत्पत्त्यधिकरणम्। "तथा प्राणाः" (ब्र.सू.2.4.1) इति प्रथमं सूत्रम्। श्रुतौ उत्पत्तिप्रकरणेषु प्राणानामुत्पत्तिः नाम्नायते। क्वचिदनुत्पत्तिः प्राणानामाम्नायते "प्राणा वाव

 ISSN – 2249-538X

ऋषयः" इति। परं क्वचित् प्राणानामप्युत्पत्तिः श्रूयते। एवं श्रुतिविप्रतिषेधात् प्राणविषये अप्रतिपत्तिः अथवा प्रागुत्पत्तेः सद्भावश्रवणात् गौणी प्राणोत्पत्तिः इति पूर्वपक्षः प्राप्नोति। अत इदं सूत्रम् "तथा प्राणा" इति। अत्र तथेति सादृश्यप्रतिपादकवचनेन किंचिदुपमानं न प्रतीयत इति हेतोः तथेति वचनमसम्बद्धमिव प्रतिभातीति आक्षेपः। तत्रोदाहरणोपात्तेनापि उपमानेन सम्बन्धोपपत्तिर्भवतीति समाहितं च।

पूर्वतन्त्रन्यायमनुसृत्य समाधानान्तरमुच्यते। तथाहि- "पान व्यापच्च तद्वत्" (जै.सू.3.4.15) इति जैमिनीयं सूत्रम्। तत्र व्यवहितोपमानस्यापि आश्रयणं कृतम्। तथाहि –सोमपाने क्रियमाणे व्यापद्वमनं यदि स्यात्तदा " एतं सौमेन्द्रं श्यामाकं चरुं निर्वपेत्" इति श्रूयते। तत्र तद्वत् इति वचनेन किंचिदुपमानं विवक्षितं भवति। तत्तु सन्निहितपूर्वसूत्रे उपात्तं किंचिन्न प्रतीयते। अथापि तृतीयाध्यायोक्ताश्वप्रतिग्रहेष्ट्यधिकरणपूर्वपक्षन्यायः बहुसूत्र-व्यवहितोऽपि बुद्धिस्थत्वात् तद्वदित्यनेन परामृश्यते। तद्वल्लौकिके धातुसाम्यार्थं पीतसोमस्य वमनेऽयं चरुः स्याद्वमननिमित्तेन्द्रिय-शोषाख्यदोषस्य "दृष्टस्य इन्द्रियेण वीर्येण व्यृध्यते यः सोमं वमति" इत्यनुवादादिति पूर्वपक्षसूत्रार्थः। वैदिके तु सोमपाने शेषप्रतिपत्ते-र्जातत्वाद्वमनेऽपि न दोष इति प्राप्ते सिद्धान्तः – लोके वमनकृते-न्द्रियशोषस्य धातुसाम्यकरत्वेन गुणत्वान्न दोषता। वेदे तु " मा मे वाङ्नाभिमतिगाः" इति सम्यग्जरणार्थमन्त्रलिङ्गाद्वमने कर्मवैगुण्यात्तस्य दोषता। तस्मात् वैदिक-सोमपाने क्रियमाणे वमने जाते सौमेन्द्रश्चरुरिति स्थितमित्यर्थः।

तद्वत् प्रकृतेऽपि यथा अतीतान्तरपादाद्युक्ता वियादादयः परस्य ब्रह्मणो विकाराः समधिगताः तथा प्राणा अपि परस्य ब्रह्मणो विकारः इति व्यवहितोपमानाश्रयणेन विवक्षितार्थसिद्धिरिति पूर्वतन्त्रन्यायानुसारेण प्रदर्शितम् ।

**10. पात्नीवताधिकरणन्यायः –**

स चेत्थम् - "त्वाष्ट्रं पात्नीवतमालभेत" इति प्रकृत्य "पर्यग्निकृतं पात्नीवतमुत्सृजति आज्येन शेषं संस्थापयति" इति श्रूयते । तत्र किं "आज्येन शेषम्" इत्यनेन पात्नीवतयाग एव पशोरुत्सृष्टस्य स्थाने प्रतिनिधित्वेन आज्यं विधीयते, कर्मान्तरं वेति संशयः। तत्र पात्नीवतयागस्य पशुनोपक्रमेऽपि पशोः पर्यग्निकृतावस्थायां वचनबलेन त्यक्तत्वात् द्रव्यसाकाङ्क्षस्य तस्य आज्येन शेषसमापनं विधीयते न कर्मान्तरम्, देवताऽभावात्, शेषसंस्था-शब्दानुपपत्तेचेति पूर्वपक्षः।

सिद्धान्तस्तु, पात्नीवतयागस्य मुख्येन पशुद्रव्येण निर्वृत्तस्य प्रतिनिधेरनपेक्षितत्वात् कर्मान्तरविधानम् इति । तथाहि-यदि पशोस्त्यागमात्रं क्रियते तदा तस्य देवतासम्बन्धो नानुष्ठितः स्यात् । तथात्वे "त्वाष्ट्रं पात्नीवतम्" इति यच्छ्रूयते तस्य देवतासम्बन्धविधेरप्रामाण्यं स्यात् । विना च देवतासम्बन्धं न यागसिद्धिः, द्रव्यदेवतासम्बन्धस्य यागानुमापक-स्याभावात्। असति यागे कस्य शेषसमापनं विधीयेत । तस्मात् 'पर्यग्निकृतं पात्नीवतमुत्सृजति' इति पशोः पर्यग्निकृतावस्थायां न त्यागविधिः, किन्तु पर्यग्निकरणान्ताङ्गरीतिविधानमिदम्। एवं च तयैव निराकांक्षस्य पात्नीवत-यागस्य समाप्तत्वात् न शेषमस्ति यस्याज्येन संस्थानमुच्येत। तस्मात् आज्येन


ISSN – 2249-538X

शेषम् इत्याज्यद्रव्यकयागान्तरविधानम् । तत्र च देवताकांक्षायां प्रकृत-पात्नीवतपदानुषङ्गेण सा लम्भनीया। शेषसंस्थाशब्दौ च सादृश्येनोप-पादनीयौ। पशुयागे हि पर्यग्निकरणान्ततया देवतोद्देशेन मानसपशुत्यागवानपि हविः प्रक्षेपाद्यभावात् सशेष इव। आज्ययागस्तद्देवत्य एव हविः प्रक्षेपादिमान् तस्य शेष इव च भवतीति। एवं शेषसंस्थाशब्दसद्भावेऽपि पूर्वयागस्य निरपेक्षत्वात् कथञ्चिद्देवतालाभेन यदि कर्मान्तरविधिः, तदा इहापि कर्मान्तरविधिरिति तु स्पष्टमेव इति।

अन्तराधिकरणे (ब्र.सू.1.2.13) च न्यायस्यास्योपयोगः पूर्वपक्षप्रतिपादनाय उपयुक्तो दृश्यते। तथाहि –छान्दोग्ये एवं श्रूयते – " य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्मेति" (छा.4.15.1) किमयमक्ष्याधारः छायापुरुषः परमात्मा वेति सन्देहे छायापुरुष इति पूर्वपक्षः परमात्मेति सिद्धान्तः। इदं च ब्रह्मप्रकरणमित्यत अक्ष्याधारः परमात्मा इति सुखविशिष्टाभिधानादेव च (ब्र.सू.1.2.15) इति सूत्रेण प्रतिपाद्यते। छान्दोग्ये "प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म" (छा. 4.10.5) इति श्रूयते। उपकोसलनामा सत्यकामाचार्यमुपसृत्य तत्र द्वादशवर्षाणि अग्नीन् परिचरन् आसीत्। तस्मै ब्रह्मोपदेशमकृत्वा आचार्ये प्रोषिते खिन्नमाचार्याग्निपरिचर्यारतं तं गार्हपत्यदक्षिणाग्न्याहवनीयास्त्रयोऽग्नयः करुणया "कं ब्रह्म खं ब्रह्म" (छा.4.10.5) इति ब्रह्मविद्यामुपदिश्य प्रत्येकं स्वस्वविषयां विद्यां "य एष आदित्ये पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मि" (छा.4.1.1) "य एष चन्द्रमसि पुरुषो दृश्यते" (छा.4.12.1) "य एष विद्युति पुरुषो दृश्यते" (छा.4.113.1) इत्यादिना चोपदिदिशुः। ततः सर्वेऽग्नयः सम्भूय "एषा सोम्य

तेऽस्मद्विद्या चात्मविद्या च" (छा.4.14.1) इति स्वस्वविषयां विद्यां सुखाकाशात्मकब्रह्मविद्यां च उपदिश्य तत्प्राप्यगतिविषये "आचार्यस्तु ते गति वक्ता" इत्यवोचन्। ततः प्रत्यागतो आचार्यः शिष्यमुखात् सर्वं ज्ञात्वा "अहं तु ते तद्वक्ष्यामि यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवंविदि पापं कर्म न श्लिष्यते" (छा.4.14.3) इति स्ववक्तव्यशेषमुक्त्वा संयद्वामत्वादिगुणकं अक्षिस्थमुपदिश्य तदुपासकस्य अर्चिरादिमार्गमुपदिदेश इत्याख्यायिका। अत्र पूर्वपक्षः आख्यायिकामुपलभ्य अक्षिपुरुषविद्या अग्निविद्यावत् सुखाकाशब्रह्मविद्यातो भिद्यते इति । तथाहि- "एषा सोम्य ते अस्मद्विद्या चात्मविद्या च" इत्यग्निभिः स्वविद्यानामात्मविद्यायाश्च भेदेन कीर्तितत्वात् तत्र सर्वनाम्नां प्रकृतपरत्वं त्यक्तव्यमासीदिति चेत् तर्हीहापि गतिमात्र-स्याशेषितत्वात् तस्यापि प्रकृतपरत्वं त्यक्तव्यमिति समानम्। यदि अग्निभिः 'एषा सोम्य' इत्यादिना स्वविद्यामात्मविद्यां च निरपेक्षमुपदिष्टतया उपसंहृत्याचार्येण उपदेष्टव्यतया गतिमात्रेऽवशेषिते आचार्योऽपि अग्न्युपदिष्टब्रह्मणोऽक्षिस्थानं संयद्वामत्वादिगुणजातं चोपदेष्टव्यमालो-च्योपदिशेत्, तदा अग्नीनां मृषावादित्वमनभिज्ञत्वं वा स्यात् । अतः अक्षिपुरुषविद्याऽप्यग्निविद्यावत् सुखाकाशब्रह्मविद्यातो भिन्नैव निरपेक्षतयो-पदिष्टत्वात् उक्तपात्नीवताधिकरणन्यायात् इति पूर्वपक्षप्रपञ्चनाय च मीमांसान्यायस्योपयोगः दृश्यते।

**(11) यजमानपञ्चमा इडां भक्षयन्ति –**

अद्वैतसिद्धान्ते चैतन्यमनादि, प्रत्यक्षप्रमेति चैतन्यमेव व्यवह्रियते। तत्करणत्वेन चक्षुरादीनां प्रमाणत्वम्। ननु, चैतन्यस्यानादित्वात् चक्षुरादीनां

 ISSN – 2249-538X

तत्करणत्वेन प्रमाणत्वं कथम् ? अत्रोच्यते, चैतन्यस्य अनादित्वेऽपि तदभिव्यञ्जिका वृत्तिः चक्षुरादीन्द्रियसन्निकर्षादिना जायत इति वृत्तिविशिष्टचैतन्यस्यादिमत्वम् । अत एव ज्ञानावच्छेदकत्वात् वृत्तौ ज्ञानत्वोपचारः । अन्तःकरणं चक्षुरादिद्वारा विषयेण सम्बध्य विषयात्मना विपरिणम्य तत्तज्ज्ञानं जनयति। अयं परिणाम एव वृत्तिः, वृत्त्यनुविद्धं चैतन्यं यद् भासते तस्यैव जन्यज्ञानत्वेन व्यवहारः। वृत्तिरूपज्ञानस्य मनोधर्मत्वेन व्यवहारः, धीशब्देन तदभिधीयते। अत्राहंकारतादात्म्यापन्नस्य आत्मन एव ज्ञानशब्देन व्यवहारः। परमहपदार्थोऽन्यः, आत्मा अन्यः । एवमात्माहं-कारयोर्भेदेऽपि नाहंकारमिश्रस्यात्मनः अहंप्रत्ययविषयत्वं, अन्तःकरणस्यो-न्द्रियतया अतीन्द्रियत्वात् प्रत्यक्षविषयत्वं कथम् इति प्रश्नः। अहंकार-विशिष्टस्यात्मनोऽपरोक्षाहंप्रत्ययविषयत्वे विशिष्टवृत्तिधर्मस्य विशेषणवृत्तित्व-नियम इति न्यायेनाहङ्कारस्यापि प्रत्यक्षत्वं वक्तुं न शक्यते इत्यर्थः। अन्तःकरणस्य इन्द्रियत्वे किलायमाक्षेपः। अन्तःकरणमिन्द्रियमिति नाभ्युपगम्यते प्रमाणाभावात् इति चेत् न, अन्तःकरणस्य इन्द्रियत्वे "मनःषष्ठानीन्द्रियाणि " इति गीतावचनं मनसः इन्द्रियत्वं प्रमाणयति इति वदतां पक्षं निराकर्तुं पूर्वमीमांसोक्तयजमानपञ्चमन्यायोऽत्र उदाहृतः।

**इत्थमस्यात्रोपपयोगः –** उक्तगीतावचनं न मनसः इन्द्रियत्वे प्रमाणं किन्तु इन्द्रियगतवषट्त्वसंख्यापूरणे एव प्रमाणम्। इन्द्रियसंख्यापूरणमिन्द्रियेणैवेति न नियमः। अर्थात् इन्द्रियसंख्यापूरणेन मनसोऽपि इन्द्रियत्वमनुमीयते इति पक्षं अप्रयोजकत्वात् तथानुमानं न युक्तमित्याह अनिन्द्रियेणापि मनसा षट्त्वसंख्यापूरणविरोधात् इति। न हि इन्द्रियगतसंख्यापूरणमिन्द्रियेणैवेति न

नियमः । ”यजमानपञ्चमा इडां भक्षयन्ति” इत्यत्र ऋत्विग्गतपञ्चत्वसंख्यायाः अनृत्विजापि यजमानेन पूरणदर्शनात् । यजमानः पञ्चमः येषां ऋत्विजां ते यजमानपञ्चमा इति। होता, अध्वर्युः, उद्गाता, ब्रह्मा चेति यागे चत्वारः ऋत्विजः। यजमानस्तु न ऋत्विक्। यागे योऽयं पुरोडाशविशेषः इडाशब्दाभेधेयः तस्य भक्षणं विधीयते। चतुर्भिः ऋत्विग्भिः तथा ऋत्विग्भिन्नेन च यजमानेन तद्भक्षणीयतया विधीयते। अत्र ऋत्विग्गतपञ्चत्वसंख्या ऋत्विग्भिन्नेन यजमानेन पूरिता दृश्यते । अतः यो यद्गतसंख्यापूरकः स तज्जातीय इति नियमोऽत्र व्यभिचरितः। अतः व्यभिचारस्थलप्रदर्शनाय ”यजमानपञ्चमा इडां भक्षयन्ति” इति पूर्वमीमांसादृष्टान्तः प्रदर्शितः। तद्वत् ”मनःषष्ठानीन्द्रियाणि” इत्यत्रापि इन्द्रियगतषट्त्व संख्यापूरणमपि इन्द्रियेणैव भवितव्यमिति नास्ति नियमः । अनिन्द्रियेण मनसापि षट्त्वसंख्या पूरयितुं शक्यत इत्यत उक्तस्मृतिवचनबलेन मनसः इन्द्रियत्वं न स्थापयितुं शक्यत इत्यलमतिविस्तरेण।

***************

 ISSN – 2249-538X

# आकाशस्तल्लिङ्गात्

**आचार्यः महाबलेश्वर पि. भट्टः**

वेदान्तविभागाध्यक्षः

राजीवगान्धीपरिसरः, शृङ्गेरी

**शङ्कारूपेण मच्चित्तं पङ्कीकृतमभूद्यया।**
**किङ्करी यस्य सा माया शङ्कराचार्यमाश्रये ॥**

अथ चतुरध्यायात्मके शारीरकमीमांसाशास्त्रे प्रथमाध्यायस्य प्रथमपादे अष्टमम् अधिकरणमवलम्ब्य किञ्चित् प्रस्तूयते – "आकाश-स्तल्लिङ्गात्" इत्येकसूत्रि इदमधिकरणम् । आकाशशब्दार्थं ब्रह्मेति सिद्धान्तयिष्यते।

'अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायान् आकाशः परायणम्' (छा. १-९-१) इत्यादि वाक्यं विषयः । अत्र आकाशशब्दार्थः कः? भूताकाशो वा ब्रह्म वा इति संशयः। उभयत्र लोके वेदे च प्रचुरप्रयोगदर्शनात् संशयः । आकाशपदस्य भौतिकाकाशपरत्वं सार्वजनीनम् । "आत्मन आकाशः सम्भूतः"(तै. २-१) इत्यादिषु वेदेषु भूताकाशपरत्वम् इष्टमेव। ब्रह्मण्यपि आकाशतत्पर्यायपदानां प्रयोगः श्रुतौ विश्रुतः । "यदेष आकाश आनन्दो न स्यात्"(तै. २-७), "आकाशो वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म"(छा. ८-१४-१) इत्येवमादिनैगमवचस्सु प्रकरणपर्यालोचनया असाधारणधर्मदर्शनेन च आकाशशब्दस्य ब्रह्मपरत्वं

निर्विवादम् । “ऋचो अक्षरे परमे व्योमन्”(ऋ. सं. १-१६४-३९), “खं ब्रह्म कं ब्रह्म”( छा. ४-१०-५) इत्यादिश्रुतिषु गगनपर्यायपदानामपि ब्रह्मणि प्रयोगः दृश्यते । अतः किंपरः आकाशशब्दः इति सन्देहः । आकाशपदश्रुत्या भूताकाश एव ग्राह्यः । तत्रैव वेदे लोके च प्रयोगप्राचुर्यं वरीवर्ति । विभुत्वनिरवयवत्वादि धर्मसाम्यात् ब्रह्मणि गौणप्रयोगः । न चैकस्य पदस्य उभयार्थत्वं मुख्यतया उररीकर्तुं शक्यते । अनेकार्थत्वस्य अन्याय्यत्वात् । अपि च गौणमुख्ययोः मुख्ये सम्प्रत्यय इति न्यायेन भूताकाशपरः आकाशशब्दः । ननु वाक्यशेषविरोधः यतः “सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते” इति सर्वभूतकारणत्वं श्रूयते । इदं च ब्रह्मण एव सिद्धमिति चेत् अत्रोच्यते वाय्वादिभूतकारणत्वम् आकाशस्य समस्त्येव । सर्वे ब्रह्मणा भोजनीयाः इत्युक्तौ गृहे आहूताः सर्वे इत्येवार्थः न तु भूमण्डले वर्तमानानां सर्वेषां ब्राह्मणानां भोजनं तदशक्यत्वात् । विभुत्वादिना ब्रह्मतुल्यत्वात् आकाशस्य उत्पत्यसम्भवात् सर्वपदस्य अर्थं सङ्कोचयित्वा वाय्वादिभूतानि सर्वाणि इत्येवार्थो ग्राह्यः । “आकाशाद्वायुः वायोरग्निः” (तै. २-१) इति हि तैत्तिरीयके श्रूयते । ज्यायस्त्वं परायणत्वमपि इतरभूतापेक्षया आकाशस्य युज्यत एव । लिङ्गापेक्षया श्रुतेः प्रबलत्वात् , आकाशशब्दार्थः भूताकाश एव । तदुक्तं भामतीनिबन्धे –

**प्रथमत्वात् प्रधानत्वात् आकाशं मुख्यमेव नः ।**

**तदानुगुण्येनान्यानि व्याख्येयानीति निश्चयः ॥** पूर्वपक्ष संक्षेपः इति ।

अत्रोच्यते राद्धान्तः – “आकाशस्तल्लिङ्गात्” आकाशशब्देन ब्रह्मणो ग्रहणं युक्तम् । तस्य ब्रह्मणः जगत्कारणत्वरूपासाधारणलिङ्गदर्शनात्” । “यतो

 ISSN – 2249-538X

वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभि संविशन्ति" इत्यादीनि श्रुतिवाक्यान्यवलम्ब्य "जन्माद्यस्य यतः"(ब्र. सू. १-२-१) इति सूत्रेण जगज्जन्मस्थितिलयकारणत्वं ब्रह्मणो लक्षणम् अभिन्ननिमित्तोपादानरूपं प्रत्यपादि सूत्रकृता। सुव्यक्तं व्याख्यातं भाष्यकृता। अत्रापि "सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते" इत्यादिकं सर्वभूतकारणत्वं विवक्षितं, स च ब्रह्मण एव असाधारणो धर्मः श्रुतियुक्तिसम्मतः। अत आकाशशब्दार्थं ब्रह्म तस्य ब्रह्मणोलिङ्गदर्शनात्। तथा च पारमर्षं सूत्रम् "आकाशस्तल्लिङ्गात्"।

यत्तु आकाशस्यापि वाव्यादिभूतकारणत्वं दर्शितं तन्न साधु आकाशादेव इत्येवकारेण केवलस्य ब्रह्मण एव कारणत्वं विवक्षितम्। शब्दतन्मात्रं गगनं वाव्यादिकारणं न भवितुमर्हति। किञ्च सर्वाणि भूतानि इति आम्नातः श्रुतौ। तस्य आकाशेतरभूतार्थविषयस्वीकारे अर्थसङ्कोचे हेत्वभावात् अपार्थः स्यात्। 'सर्वे ब्राह्मणा भोजनीया' इत्यत्रापि जगतीतलवर्तिनां सर्वेषां ब्राह्मणानां बोधकं 'सर्व'पदम्। किन्तु प्रकरणपर्यालोचनया आहूतानामेव विषये सङ्कोचः क्रियते। भूमण्डलवासिनां समेषां भूदेवानाम् एकेन भोजयितृत्वासम्भवात्। प्रकरणपर्यालोचने क्रियमाणे अस्य लोकस्य का गतिः इति नामरूपात्मकस्य समग्रस्य द्वैतप्रपञ्चस्य गतिः, कारणम् आश्रयाधिष्ठानमिति यावत् दृष्टम्। तत्र जगदन्तःपातीभूताकाश न गतिर्भवितुमर्हति। स्वस्य स्वयमेवाश्रयः न दृष्टचरः। उत्तरं प्रश्नानुसारि भवेत्। न च अनुन्मत्त आम्रान्पृष्टः कोविदरानाचष्टे। अतः भूताकाशस्य गतित्वकल्पना प्राज्ञं मन्यानाममते। तथाचोक्तं कल्पतरौ –

**पूर्वापरपरामर्शरहितैः प्राज्ञमानिभिः ।**

**कल्पितेयं गतिर्नैषा विदुषामनुरञ्जिका ॥** इति ।

ननु बलाबलाधिकरणन्यायेन लिङ्गापेक्षया श्रुतेः प्रबलत्वात् ब्रह्मलिङ्गबाधिका भूताकाशपरा आकाशश्रुतिः इति चेत् अत्रोच्यते सत्यं लिङ्गापेक्षया श्रुतिः प्रबला, तथापि प्रकरणवाक्यशेषादिसंवलितबलिष्ठं लिङ्गं श्रुतिं दुर्बलीकरोति । बहु बाधापेक्षया एकस्य बाधः न्याय्यः । तथाचोक्तं –

**त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।**

**ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥** इति ।

अतः प्रथमतः आकाशपदं श्रुत्वा भूताकाशबुद्धिं मनसि समागतां बाधित्वा प्रकरणलिङ्गादिना ब्रह्मपराधीः स्थिरा भवति ।

“आकाशं प्रत्यस्तं यन्ति” इति सर्वलयाधारत्वं ब्रह्मलिङ्गम् । ज्यायस्त्वं न भूताकाशस्य युज्यते, ज्यायान् दिवः ज्यायान् अन्तरिक्षात् इति ब्रह्मणः ज्यायस्त्वश्रवणात् । अपि च परायणत्वमपि निरुपाधिकं ब्रह्मण एव युज्यते सर्वकारणत्वात् । तथा च श्रुतिः – “विज्ञानमानन्दं ब्रह्म रातेर्दातुः परायणम्” (बृ. ३-९-२८) इति । न भूताकाशस्य । आकाशतत्पर्यायपदानां ब्रह्मणि प्रचुरप्रयोगदर्शनात् गौणार्थोऽपि मुख्यत्वं भजते । श्रुतिशिरो वचसां विचारावसरे प्राधान्यं, प्रथमगण्यतां चाप्नोति ॥ तथा च भामत्यां सिद्धान्तसारः समग्राहि -

**सामानाधिकरण्येन प्रश्नतत्प्रतिवाक्ययोः ।**

**पौर्वापर्यपरामर्शात् प्रधानत्वेऽपि गौणता ॥**

तस्मात् आकाशशब्द ब्रह्मपर इति सिद्धम् ।

 ISSN – 2249-538X

# परिभाषाकाराणां मिथ्यात्वानुमानविमर्शः

**डा. गणेश ईश्वर भट्टः**

सहायकाचार्यः, वेदान्तविभागः

राजीवगान्धीपरिसरः, शृङ्गेरी

प्रत्यक्षानुमानागमोपमानार्थापत्त्यनुपलब्ध्याख्यानि षट् प्रमाणानि वेदान्तशास्त्रे अङ्गीकृतानि इति परिभाषाकारैः सलक्षणं सप्रभेदं च निरूपितम्। तत्र सर्ववादिसम्मतप्रत्यक्षनिरूपणानन्तरम् अनुमाने निरूपिते, वेदान्तवाक्यार्थविचारिणाम् वेदान्तवाक्यैरेव अद्वितीयब्रह्मावगत्या पुरषार्थसिद्धौ अनुमानप्रमाणनिरूपणस्य आवश्यकता का इति जिज्ञासा जायते । तत्रेदं ग्रन्थकाराणां वाक्यम्- **एवमनुमाने निरूपिते तस्मात् ब्रह्मभिन्ननिखिलप्रपञ्चस्य मिथ्यात्वसिद्धिः**[1] इति । अस्यायमर्थः- शास्त्रे प्रतिपदम् अनुमानप्रमाणस्य उपयोगो वर्तते । तत्र द्वैतमिथ्यात्वसिद्धिः एकं मुख्यं प्रयोजनम् । **अद्वैतसिद्धेः द्वैतमिथ्यात्वपूर्वकत्वात्, द्वैतमिथ्यात्वमेव आदौ उपपादनीयम्**[2] इति सिद्धिवाक्यम् । अत्र उपपादनीयम् इत्यस्य उपपत्त्या अनुमानेन साधनीयम् इत्यर्थः । अपि च उपपत्तिर्हि तात्पर्यलिङ्गम् । तात्पर्यज्ञानं च शाब्दबोधे कारणम् । अतः **वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना**[3] इति भाष्यानुसारं वेदान्तवाक्यार्थज्ञानोत्पत्तौ अस्ति अनुमानस्य उपयोगः ।

---

[1]वेदान्तपरिभाषा पृष्ठम् ११२

[2] अद्वैतसिद्धिः पृष्ठम् २

[3] ब्रह्मसूत्रभाष्यम् १-१-२

तत्र जगन्मिथ्यात्वे एवमनुमानप्रयोगः- ब्रह्मभिन्नं सर्वं मिथ्या ब्रह्मभिन्नत्वात् यदेवं तदेवं यथा शुक्तिरूप्यम् इति । शुक्तिरूप्ये ब्रह्मभिन्नत्वमस्ति, तच्च मिथ्या इति प्रसिद्धमेव । अतः यत्र ब्रह्मभिन्नत्वं तत्र मिथ्यात्वम् इति व्याप्तिग्रहः सम्भवति । तेन ब्रह्मभिन्नस्य सर्वस्यापि मिथ्यात्वं सिद्ध्यति । अत्र ब्रह्मणः पक्षत्ववारणाय ब्रह्मभिन्नपदम् । सिद्धसाधनवारणाय सर्वमिति पदम् । यद्यपि अत्र पक्षतावच्छेदकं ब्रह्मभिन्नत्वम्, तद्विशिष्टपक्षैकदशभूतशुक्तिरूप्यादौ मिथ्यात्वरूपं साध्यं सिद्धम्, तथापि निखिलेऽपि प्रपञ्चे तस्य असिद्धत्वात् न सिद्धसाधनम् । एवमपि शुक्तिरूप्यस्य दृष्टान्तत्वं कथम्, तस्यापि पक्षत्वात् इति चेत्- निश्चितसाध्यकत्वेन पक्षत्वम् अविरुद्धम् । पक्षभिन्नत्वं तु तत्र अप्रयोजकम् । तथापि दृष्टान्तस्य शुक्तिरूप्यादेः मिथ्यात्वं कथं सिद्ध्यति इति चेत् पुरोवर्तिन्यां शुक्तौ प्रतिपन्नस्य रजतस्य तत्रैव निषिध्यमानत्वं रजतस्य सत्यत्वे अनुपपन्नम् । अतः तस्य मिथ्यात्वं कल्प्यते । अत्र प्रपञ्चस्य ब्रह्मभिन्नत्वम् अस्तु, मिथ्यात्वं मास्तु इति अप्रयोजकशङ्का स्यात् । तत्रोच्यते- शुक्तिरूप्यरज्जुसर्पादेः मिथ्यात्वं तु निर्विवादम् । तस्य मिथ्यात्वे किं प्रयोजकमिति विचारणीयम् । तत्र शुक्तिरूप्यस्य मिथ्यात्वे शुक्तिरूप्यत्वं प्रयोजकम्, रज्जुसर्पस्य मिथ्यात्वे रज्जुसर्पत्वम्, मरुमरीचिकायाः मिथ्यात्वे मरुमरीचिकात्वम् इति यद्युच्यते, तर्हि अननुगमः। अविद्यातिरिक्त-दोषजन्यत्वम् अनुगतम् इति यद्युच्यते, तथापि सः धर्मः मिथ्यापदार्थेषु ब्रह्मभिन्नत्वापेक्षया गुरुभुतः । अत्र च जन्यत्वघटितस्य प्रयोजकत्वे तस्य अनादिपदार्थेषु अविद्यातत्सम्बन्धादिषु मिथ्यात्वं न सिद्ध्येत् । अतः सम्भवति

 ISSN – 2249-538X

साधारणधर्मे विशेषे तदभावात् इति न्यायात्, सम्भवति लघौ गुरौ तदभावात् इति न्यायाच्च सर्वानुगतं ब्रह्मभिन्नत्वमेव मिथ्यात्वप्रयोजकम् इति युक्तम् ।अतः लाघवाख्यः तर्क एवात्र अप्रयोजकशङ्कानिवर्तकः । किञ्च **अतोऽन्यदार्तम्**[1] इति श्रुतिः। अतः अस्माद् ब्रह्मणः अन्यत् आर्तं विनाशशालि इति तदर्थः । अत्र ब्रह्मभिन्त्वोद्देशेन आर्तत्वं बोधयन्ती श्रुतिः उद्देश्यतावच्छेदकार्तत्वापरपर्यायमिथ्यात्वं गमयति।

अस्मिन्ननुमाने साध्यभूतमिथ्यात्वस्य लक्षणं किम् इति जिज्ञासायां स्वाश्रयत्वेन अभिमतयावन्निष्ठात्यन्ताभावप्रतियोगित्वं मिथ्यात्वम् इत्युक्तम् । स्वं मिथ्याभूतः पदार्थः रजतदिः, तादात्म्यसम्बन्धेन स्वाश्रयत्वेन अभिमतं यावत् शुक्त्यादिकम्, तन्निष्ठः यः रजताद्यत्यन्ताभावः तत्प्रतियोगित्वं रजतादौ वर्तत इति लक्षणसमन्वयः। दार्ष्टान्तिके तु, स्वं घटादिः वियदादिर्वा पदार्थः, तदाश्रयत्वेन अभिमतं यावत् ब्रह्म, तन्निष्ठः यः अत्यन्ताभावः **नेह नानाऽस्ति किञ्चन**[2] इत्यादिश्रुतिसिद्धः अभावः, तत्प्रतियोगित्वं सर्वस्यापि प्रपञ्चस्य वर्तत इति दार्ष्टान्तिके लक्षणसमन्वयः। लक्षणे अभिमतपदम् असम्भववारणाय। यतः स्वाश्रये स्वात्यन्ताभावस्य असम्भवः। अतः वस्तुतः रजताद्यनाश्रयोऽपि शुक्त्यादिः रजताद्याश्रयत्वेन अभिमतो भवति । तस्मिन् वर्तमानस्य रजताद्यत्यन्ताभावस्य प्रतियोगित्वं रजतादेः अस्तीति असम्भवपरिहारकतया अभिमतपदं सार्थकम्।

---

[1] बृहदारण्यकोपनिषत् ३-४-२

[2] बृहदारण्यकोपनिषत् ४-४-१९

अत्रेदं ज्ञातव्यम्- ब्रह्मभिन्नस्य प्रपञ्चस्य निषेधः द्वेधा कर्तुं शक्यः स्वरूपेण पारमार्थिकत्वाकारेण चेति । तत्र स्वरूपेण अर्थात् यः तत्तत्पदार्थगतासाधरणधर्मः तेन रूपेण निषेधे क्रियमाणे प्रतियोग्यभावयोः एकाधिकरणत्वं विरुद्ध्यते। अस्मिन् पक्षे अभिमतपदम् उक्तरीत्या सार्थकम्। प्रपञ्चस्य स्वरूपेण निषेधे शन्यवादापत्तिः इति शङ्का तु न कार्या । यतः सदधिकरणकत्रैकालिकनिषेधः अस्माभिः विवक्षितः । प्रपञ्चस्य निषेधप्रतियोगित्वेन मिथ्यात्वेऽपि तदधिकरणं तु सत्यमेव । एवं च अयं स्वरूपेण निषेध इति पक्षः । यदि तु मिथ्यात्वघटकीभूतः अभावः पारमार्थिकत्वावच्छिन्नप्रतियोगिताकः, तदा तु प्रतियोग्यभावयोः नास्ति विरोधः, यथा कपाले घटसत्त्वेऽपि पटत्वेन घटाभावः वक्तुं शक्यते, तथैव शुक्तौ रजतसत्त्वेऽपि पारमार्थिकत्वावच्छिन्नरजतात्यान्ताभावो विद्यते । अयमेव व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभाव इत्युच्यते। अत एव सत्त्वं त्रिविधम्। तत्र त्रिकालाबाध्यत्वं पारमार्थिकसत्त्वम्, व्यवहारकाले अबाध्यत्वं व्यावहारिकसत्त्वम्, प्रतिभासकाले अबाध्यत्वं प्रातिभासिकसत्त्वम् इति तेषां लक्षणम्। अस्मिन् पक्षे अभिमतपदं शक्यं त्यक्तुम्, विरुद्धयोरपि प्रतियोग्यभावयोः भिन्नसत्ताकयोः अविरोधात् । व्यावहारिकसत्त्वविशिष्टप्रपञ्चाधिकरणे पारमार्थिकसत्ताकप्रपञ्चाभावः सिषाधयिषितः इति विवेकः।

लक्षणे यावत्पदम् अर्थान्तरवारणाय । अन्यथा कपिसंयोगाद्याश्रयत्वेन अभिमते वृक्षे मूलावच्छेदेन वर्तमानात्यान्ताभावप्रतियोगित्वं शाखावच्छेदेन स्थितकपिसंयोगादेः अस्तीति सत्यत्वाविरोधिप्रतियोगितदभावसामानाधिकरण्यरूपम् अर्थन्तरं स्यात् । यावत्पदसत्त्वे तु, यावन्ति

कपिसंयोगाश्रयत्वेन अभिमतान्यधिकरणानि इत्यर्थलाभात् कपिसंयोगादेः स्वाश्रयत्वेन अभिमते शाखादावेव अत्यन्ताभावप्रतियोगित्वसिद्धेः उद्दिष्टत्वलाभात् न अर्थान्तरप्रसङ्गः । अथवा घटस्य कपालनिष्ठा-त्यन्ताभावप्रतियोगित्वेऽपि अधिकरणान्तरे घटो वर्तेत इत्याशङ्का स्यात् । यावत्पदनिवेशे तु येन येन सम्बन्धेन यद्यदधिकरणं स्वश्रयत्वेन अभिमतम् तेन तेन सम्बन्धेन तत्तन्निष्ठात्यान्ताभावप्रतियोगित्वम् इत्यर्थो लभ्यते । तेन अन्याश्रितत्वरूपम् अर्थान्तरं न प्रसज्यते । इदं यावत्पदस्य साकल्यार्थमादाय उक्तम् । पक्षन्तरे यावत्पदस्य व्यापकत्वमर्थः । तदा स्वाश्रयत्वेन इत्यादिवाक्यस्य एवमर्थः- स्वप्रकारकधीविशेष्यतव्यापकात्यन्ताभाव-प्रतियोगित्वम् इति लक्षणम् । स्वं- रजतादिमिथ्यापदार्थः, स्वप्रकारकधीविशेष्यता रजतवदिदम् इत्यादिप्रतीतिविशेष्यता तद्व्यापकः अत्यन्ताभावः नात्र रजतम् इति प्रतीतिसिद्धात्यन्ताभावः, तत्प्रतियोगि रजतम् इति लक्षणसमन्वयः ।

इदं लक्षणं चित्सुखाचार्यैः एवं श्लोकरूपेण सङ्ग्हीतम्-

**सर्वेषामपि भावानां स्वाश्रयत्वेन सम्मते ।**

**प्रतियोगित्वमत्यन्ताभावं प्रति मृषात्मता**[1] ॥ इति ।

मृषात्वं मिथ्यात्वम् । इदानीम् अनुमानान्तरम् प्रदर्श्यते-

**अंशिनः स्वांशगात्यान्ताभावस्य प्रतियोगिनः ।**

**अंशित्वादितरांशीव दिगेषैव गुणादिषु**[2] ॥ इति ।

[1] तत्त्वप्रदीपिका १-७

[2] तत्त्वप्रदीपिका १-८

अत्र अंशिनः अवयविनः स्वंशगात्यन्ताभावस्य स्वायवनिष्ठात्यन्ताभावस्य स्वोपादाननिष्ठत्यन्ताभावस्य प्रतियोगिनः इति प्रतिज्ञा । अंशित्वात् अवयवित्वात् अवयवित्वेन सम्मतत्वात् इति हेतुः । इतरावयवी दृष्टान्तः । अत्र काञ्चिदेकां व्यक्तिं पक्षीकृत्य तत्र साध्यं साधनीयम् । यथा - विमतः पटः एतत्तन्तुनिष्ठात्यन्ताभावस्य प्रतियोगी पटत्वात् पटान्तरवत् इति । यः पटः एतत्तन्तुसमवेतत्वेन प्रतीतः सः विमतपटशब्देन विवक्षितः । पटान्तरे पटत्वस्य सत्त्वे एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वमपि दृष्टम् । न हि पटान्तरम् एतत्तन्तुनिष्ठम् । जगतीतले इमं पटं विहाय सर्वे पटत्वविशिष्टाः पटाः एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगिनः । अयमपि पटः पटत्वविशिष्टः । अतः अयमपि पटान्तरवत् एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी इति सिद्ध्यति । गुणिष्वपि अयमेव न्यायः । यथा एतद्रूपम् एतद्घटनिष्ठात्यन्ताभावप्रतियोगी, रूपत्वात् रूपान्तरवत् इत्येवम् । तथा च अनेनानुमानेन उपादाननिष्ठात्यन्ता-भावप्रतियोगित्वं मिथ्यात्वम् इति लक्षणमपि उक्तं भवति ।

अत्र कश्चन प्रश्नः स्यात्- **तदनन्यत्वमारम्भणशब्दादिभ्य**[1] इति सूत्रानुसारम्, उपादानोपादेययोः अभेदात् उपादाननिष्ठात्यन्ताभावप्रतियोगित्वं कार्यस्य प्रागेव सिद्धत्वात् सिद्धसाधनं स्यात् इति । उच्यते- अत्यन्ताभेदे कार्यकारणभावस्यैव असम्भवात् कथञ्चित् भेदोऽपि वक्तव्यः । तदेव तादात्म्यम् इत्युच्यते । तदनन्यत्वसूत्रस्यापि कार्यं कारणव्यतिरेकेण नास्ति इत्येव अर्थः । अत एव **अनन्यत्वं व्यतिरेकेण अभावः**[2] इति भाष्यम्, **न**

[1] ब्रह्मसूत्रम् २-१-१४

[2] ब्रह्मसूत्रभाष्यम् २-१-१४

 ISSN – 2249-538X

**खल्वनन्यत्वमित्यभेदं ब्रूमः, किन्तु भेदं व्यासेधामः**[1] इति च भामती । अतः कार्यस्य उपादानाश्रितत्वस्यैव सिद्धत्वेन उपादाननिष्ठात्यन्ताभावप्रतियोगित्वं न सिद्धमिति न दोषः । तथापि इह तन्तुषु पटः इति प्रत्यक्षेण पटस्य तन्तुवृत्तित्वावगमात्, तन्तुनिष्ठाभावीयप्रतियोगित्वानुमानस्य बाध इति । उच्यते- प्रत्यक्षं तु भ्रमसाधारणतया चन्द्रप्रादेशिकत्वप्रत्यक्षवत् अप्रामाण्यशङ्कास्कन्दिततत्वेन अबाधकम् । अतो न दोषः । वस्तुतः प्रतिवादि-जयार्थमेव एतादृशम् अनुमानं प्रयुज्यते, न तु वेदान्तवाक्यार्थनिरूपणाय इत्यपि अत्र न विस्मर्तव्यम् ।

एतादृशमिथ्यात्वे स्वीकृते सन् घट इति प्रत्यक्षबाध इति शङ्का स्यात् । यतः ब्रह्मभिन्नत्वादिना येन केनचित् हेतुना मिथ्यात्वे सिषाधयिषिते, पक्षे साध्यस्य अभावात् हेतुः बाधितः । तत्रोच्यते- घटादिषु प्रतीयमाना सत्ता स्वाधिष्ठानभूतब्रह्मसत्तैव । अनुमानेन तु घटे मिथ्यात्वं साध्यते । एकयैव सर्वानुगतसत्तया सर्वपदार्थगतसत्ताप्रतीतिनिर्वाहे सति प्रत्येकं सत्ता घटादिषु नाभ्युपेयते । तर्हि घटादिसत्ता ब्रह्मसत्ता इत्यङ्गीक्रियमाणे ब्रह्मणः नीरूपत्वेन अप्रत्यक्षत्वात् तद्धर्मभूतसत्तायाः घटादौ कथं प्रत्यक्षविषयता इति चेत् नीरूपमपि रूपं यथा प्रत्यक्षम्, तथा ब्रह्मापि । नीरूपं यद्द्रव्यं तदप्रत्यक्षम्, रूपं गुणः, ब्रह्म तु द्रव्यम्, अतः नीरूपस्य द्रव्यस्य ब्रह्मणः कथं प्रत्यक्षत्वम् इति चेत् ब्रह्मणः द्रव्यत्वमेव असिद्धम्, द्रव्यगुणादिपरिभाषायाः अनङ्गीकारात् । तत्र गुणाश्रयत्वं समवायिकारणत्वं वा द्रव्यलक्षणम् अभिमतं नैयायिकानाम् ।

[1] ब्रह्मसूत्रभामती २-१-१४

ब्रह्मणः निर्गुणत्वात् समवायस्य चानङ्गीकारात् ब्रह्म न द्रव्यम्। अस्तु वा द्रव्यत्वं ब्रह्मणः, तथापि नीरूपस्य कालस्येव ब्रह्मणः प्रत्यक्षत्वं सम्भवति। न हि द्रव्यसामान्यं रूपवदेव चाक्षुषप्रत्यक्षविषय इति नियमः, किन्तु प्रतिनियतेन्द्रियग्राह्यमेव तथा । अत एव धारावाहिकज्ञानस्थले द्वितीयादि-ज्ञानानां पूर्वपूर्वज्ञानतत्तत्क्षणविशेषविशिष्टविषयत्वेन अनधिगतविषयकत्वं प्रमात्वं च भवति । कालस्तु सर्वेन्द्रियग्राह्यः, "न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासते" इत्युक्तिः प्रसिद्धा । अतः ब्रह्मापि काल इव नीरूपमपि प्रत्यक्षम् । अथवा त्रिविधसत्त्वाङ्गीकारपक्षे ब्रह्मणि विद्यमाना सत्ता पारमार्थिकी । प्रपञ्चे विद्यमाना तु व्यावहारिकी । अतः पारमार्थिक-सत्ताविशिष्टब्रह्मणः अप्रत्यक्षत्वेऽपि व्यावहारिकसत्तावतः प्रपञ्चस्य प्रत्यक्षत्वं न विरुद्ध्यते । अस्मिन् पक्षे अर्थात् प्रपञ्चे व्यावहारिकसत्ताङ्गीकारपक्षे पारमार्थिकत्वावच्छिन्नप्रतियोगिताक-स्वात्यन्ताभावसामानाधिकरण्यम् इति मिथ्यात्वलक्षणम्।

***************

 ISSN – 2249-538X

# सद्विविक्तत्वं मिथ्यात्वम्

**डा. श्रीकरः जि. एन्.**
संविदाध्यपकः, वेदान्तविभागः
राजीवगान्धीपरिसरः, शृङ्गेरी

मधुसूदनसरस्वतीभिः अद्वैतसिद्ध्याख्ये ग्रन्थे पञ्च मिथ्यात्वलक्षणानि निरूपितानि । एकस्यैव मिथ्यात्वलक्षणस्य निरूपणेन प्रपञ्चमिथ्यात्वस्य ब्रह्माद्वैतस्य च सिद्धिसम्भवेऽपि सर्वेषामेव वेदान्तपूर्वाचार्याणां प्रपञ्चमिथ्यात्वे सम्मतिप्रदर्शनाय भिन्नानि मिथ्यात्वलक्षणानि उपपादितानि।

तत्र न्यायदीपावलीकाराणाम् आनन्दबोधभट्टारकानां सम्मतं मिथ्यात्वलक्षणं सद्विविक्तत्वमिति । लक्षणेऽस्मिन् विवेकशब्दः भेदार्थकः । सद्विविक्तत्वमित्यस्य सत्प्रतियोगिकभेद इत्यर्थः विवक्षितः। सद्रूपात् ब्रह्मणः भिन्ने प्रपञ्चे लक्षणसमन्वयः।

अत्र लक्षणोक्तं सत्त्वं त्रिधा विकल्प्य दूषयति पूर्ववादी यथा – सद्विविक्तत्वमित्यत्र सत्त्वं नाम सत्ताजात्यधिकरणत्वं वा अबाध्यत्वम् उत ब्रह्मरूपत्वं वा इति।

तत्र सत्ताजात्यधिकरणत्वं सत्त्वमित्यङ्गीकारे प्रपञ्चे लक्षणस्य असम्भवः स्यात् । यतः सिद्धान्ते घटादौ घटाद्युपहिता अनाद्यविद्या घटादिसामान्यरूपा इत्यङ्गीकारात् तादृश आविद्यकसत्ताजात्यधिकरणे घटादौ सत्प्रतियोगिकभेदस्य असम्भवः।

अबाध्यत्वं सत्त्वमिति द्वितीयविकल्पे अबाध्यभिन्नत्वं मिथ्यात्वमित्युक्तं भवति । अबाध्यभिन्नत्वञ्च बाध्यत्वम् । तथा च बाध्यत्वं मिथ्यात्वमिति पर्यवसितम् । एवं च लाघवात् बाध्यत्वमित्येव लक्षणं स्यात् ।

सत्त्वं नाम ब्रह्मरूपत्वमिति तृतीयविकल्पे ब्रह्मभिन्नत्वं मिथ्यात्वमिति फलितं भवति । तथा च अचेतनादिरूपे प्रपञ्चे चेतनादिरूपब्रह्मवैलक्षण्यस्य पूर्वमेव सिद्धत्वात् अस्मिन्ननुमाने सिद्धसाधनापत्तिः । एवं च लक्षणमिदं अयुक्तमिति ।

अत्रोच्यते – लक्षणेऽस्मिन् सत्त्वं नाम प्रमाणसिद्धत्वम् । तर्हि प्रपञ्चस्यापि प्रत्यक्षादिप्रमाणसिद्धत्वेन तस्य प्रमाणसिद्धत्वावच्छिन्न-प्रतियोगिताकभेदस्य अभावात् मिथ्यात्वानुपपत्तिरिति न च वाच्यम् । यतः प्रमाणसिद्धत्वमित्यत्र प्रमाणत्वमित्यनेन दोषासहकृतज्ञानकरणत्वं विवक्षितम्। दोषासहकृतमित्यस्य दोषाजन्यत्वमित्यर्थः । दोषाजन्यं यत् प्रमारूपं ज्ञानं तत्करणत्वं प्रमाणत्वम्, तादृश प्रमाणजन्यज्ञानविषयो यः सः प्रमाणसिद्धः । स चात्र लक्षणघटितसत्पदेन विवक्षितः । तथा च दोषाजन्य-ज्ञानकरणजन्य-ज्ञानविषयभिन्नत्वं मिथ्यात्वमिति ।

अत्र पुनः शङ्का – आकाशादिप्रपञ्चविषयकान्तःकरणवृत्तिरूपज्ञानस्य सादृश्यादिदोषजन्यशुक्तिरजतादिज्ञानवत् दोषजन्यत्वाभावात् दोषाजन्यज्ञानकरणजन्यविषयत्वस्यैव सम्भवात् विवक्षित सद्भिन्नत्वाभावात् लक्षणसमन्वयः न स्यात् । यदि अत्र अन्तःकरणस्य अविद्योपादानकत्वेन उपादानोपादेययोश्च अभेदात् अन्तःकरणस्य अविद्याभिन्नत्वम्, अविद्यायाश्च दोषरूपत्वेन अविद्यापरिणाम्यन्तःकरणरूपस्य प्रपञ्चज्ञानस्य

 ISSN – 2249-538X

अविद्यारूपदोषजन्यत्वम् । न तु दोषाजन्यज्ञानकरणजन्यज्ञानविषयत्वमिति चेत् – तर्हि तत्त्वमस्यादिमहावाक्यजन्याखण्डाकारान्तःकरणवृत्तेरपि अविद्यारूपदोषजन्यत्वात् दोषाजन्यज्ञानमेव अप्रसिद्धम् इति चेत् , अत्रोच्यते – दोषासहकृतमित्यत्र दोषपदेन विवक्षितायाः अविद्यायाः दोषविधया कारणत्वं विवक्षितम् । न तु परिणाम्युपादानविधया । दोषविधया कारणत्वं न उपादानकारणत्वं किन्तु निमित्तकारणत्वम् । तथा च दोषासहकृतमित्यस्य दोषविधया दोषाजन्यमित्यर्थः । तेन तत्त्वमस्यादिमहावाक्यजन्याखण्डा-कारान्तःकरणवृत्तेः परिणाम्युपादानतया अविद्याजन्यत्वेऽपि दोषविधया अविद्यारूपनिमित्तकारणजन्यत्वाभावात् दोषाजन्यज्ञानाप्रसिद्धिः नास्ति ।

प्रपञ्चज्ञाने यथा अविद्यायाः परिणाम्युपादानविधया कारणत्वं तथा दोषविधया निमित्तकारणत्वमपि अङ्गीकर्तव्यम् । यतः प्रपञ्चज्ञानस्य 'नेह नानास्ति किञ्चन' इत्यदिश्रुत्या बाधात् भ्रमत्वम् । तथा च शुक्तिरजतादिभ्रमे अविद्यायाः दोषविधया कारणत्ववत्, प्रपञ्चभ्रमेऽपि तस्याः दोषविधया कारणत्वम्। तत्त्वमस्यादिमहावाक्यजन्यज्ञानस्य तु अबाधितब्रह्मात्म-विषयकत्वेन प्रमात्वात् न अविद्यायाः दोषविधया कारणत्वम् ।

अत्र पुनः आक्षेपः – उक्तमिथ्यात्वलक्षणस्य असति शशविषाणादौ शुद्धब्रह्मणि च अतिव्याप्तिरिति । तद्यथा – शशविषाणादीनां ज्ञानाविषयत्वेन दोषाजन्य-ज्ञानकरणजन्य-ज्ञानविषयभिन्नत्वस्य मिथ्यात्वलक्षणस्य अलक्ष्ये शशविषाणादौ सम्भवात् अतिव्याप्तिः । शुद्धं ब्रह्म न वृत्तिविषय इति पक्षेऽपि तादृशज्ञानविषयभेदस्य शुद्धब्रह्मणि सम्भवात् अतिव्याप्तिरिति ।

ISSN – 2249-538X 

अत्रोच्यते – असति शुद्धब्रह्मणि च अतिव्याप्तिवारणाय लक्षणे सत्त्वेन प्रतीयमानत्वमिति विशेषणं देयम् । तथा च सत्त्वेनप्रतीयमानत्वे सति सद्भिन्नत्वं मिथ्यात्वमिति लक्षणं सम्पन्नम् । एवञ्च क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यनर्हत्वम् असत्त्वमित्यङ्गीकारात् शशविषाणादौ नातिव्याप्तिः । एवमेव शुद्धं ब्रह्म न वृत्तिविषय इति पक्षे शुद्धब्रह्मणः तत्त्वमस्यादि-महावाक्यजन्यनिर्विकल्पकवृत्तिविषयत्वेऽपि सत्त्वप्रकारकप्रतीतिविषयत्वा-भावात् शुद्धब्रह्मणि नातिव्याप्तिः ।

अत्र पुनः आक्षेपः – सत्त्वेन प्रतीयमानत्वे सति सद्विविक्तत्वमिति प्रकृतलक्षणे अंशतः सिद्धसाधनमिति । तद्यथा साध्यविशेषणांशस्य सत्त्वेन प्रतीयमानत्वस्य प्रपञ्चे सिद्धत्वात् सिद्धसाधनापत्तिः इति चेत् उच्यते - सत्त्वेन प्रतीयमानत्वे सति सद्विविक्तत्वमित्यत्र मिलितसिद्धेरुद्धेश्यत्वात् न सिद्धसाधनापत्तिः । यथा गुणादिकं गुण्यादिना भिन्नाभिन्नं समानाधि-कृतत्वादिति भेदाभेदवादिप्रयोगे साध्यांशस्य गुणगुण्याद्योः तार्किकादिमते सिद्धावपि भेदाभेदोभयवत्वप्रतीतेः उद्धेश्यत्वेन न सिद्धसाधनम् । एवं प्रकृतेऽपि न सिद्धसाधनापत्तिरिति शम् ।

****************

 ISSN – 2249-538X

# स्मृत्यधिकरणम्

**डा. गणपति वि. हेगडे**
संविदाध्यपकः, वेदान्तविभागः
राजीवगान्धीपरिसरः, शृङ्गेरी

**श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।**
**नमामि भगवत्पादशङ्करं लोकशङ्करम्॥**

प्रथमाध्याये **'जन्माद्यस्य यतः'** इति सूत्रेण ब्रह्मजगज्जन्मादिकारणमित्युक्त्वा , तस्मिन् एव ब्रह्मणि **"तत्तु समन्वयात्"** इति सूत्रेण सर्वेषां वेदान्तानां समन्वयः प्रदर्शितः। **"ईक्षतेर्नाशब्दम्"** इत्यादि सूत्रेण साङ्ख्योक्तप्रधानादि पक्षाश्च श्रुत्यप्रतिपाद्यत्वेन निरस्ताः। इदानीं द्वितीयाध्याये प्रथमपादे वेदान्तानां ब्रह्मणि समन्वयस्य स्मृतिविरोधं परिहर्तुं प्रधानादिपक्षाणां न्यायाभासमूलत्वं प्रतिपादयितुं च यत्नः क्रियते । स्मृत्यादिविरोधमाशङ्क्य परिह्वियते इति प्रथमद्वितीयाध्याययोः विषयविषयीभाव सङ्गतिः।

अस्मिन्नधिकरणे ब्रह्मणि उक्तवेदान्तसमन्वयः विषयः। सः समन्वयः साङ्ख्यस्मृत्या विरुध्यते न वा इति सन्देहः । अत्र पूर्वपक्षे स्मृतिविरोधादुक्तसमन्वयासिद्धिः फलं । सिद्धान्ते समन्वयसिद्धिरिति फलभेदः । यद्यपि ईक्षत्यधिकरणे एव साङ्ख्यस्मृतेः विरोधः परिहृतः तथापि मन्दधियः कपिलादिप्रख्यातृप्रणेतृकाः स्मृतीः अवलम्बेरन् इत्यतः पुनः अस्मिन्नधिकणे विचारः क्रियते।

वस्तुतः श्रुतिभिः अवगन्तव्यं ब्रह्म । यद्यपि श्रुत्यैव अपेक्षितार्थस्य अवगमनं तथापि स्मृतेः प्रकारान्तरेण श्रुत्यर्थप्रतिपादकत्वाभ्युगमात् क्वचित्

स्थले अपेक्षितायाः श्रुतेरभावे स्मृतिरपि स्वीकर्तव्या । श्रुतेरिव स्मृतेरपि प्रामाण्यं पूर्वमीमांसायां निर्धारितम् । स्मर्यते वेदधर्मः अनेन इति स्मृतिशब्दस्य व्युत्पत्तिं कथयन्ति प्राज्ञाः । **वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्** (मनुस्मृतिः २-६) इति वेदस्येव स्मृतेरपि धर्मे प्रामाण्यम् अभिहितम् । उक्तं हि –

**श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः ।**
**ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ ॥**(मनुस्मृतिः २-१०)
**दुर्बोधा वैदिकाः शब्दाः प्रकीर्णत्वाच्च येऽखिलाः ।**
**तत्रैत एते दृष्टार्थाः स्मृतितन्त्रे प्रतिष्ठिताः ॥**(स्मृतिमुक्ताफलम्) इति ।

एवञ्च स्मृतेः प्रामाण्यं वेदान्तिभिरपि अवश्यमङ्गीकर्तव्यत्वात् साङ्ख्यस्मृत्या विरोधः इति पूर्वपक्षी शङ्कते । **"ऋषिप्रसूतं कपिलं यस्तमग्रे ज्ञानैर्विभर्ति जायमानं च पश्येत्"** इति वेदे एव कथितत्वात् कपिलप्रभृतीनां आर्षं ज्ञानम् अप्रतिहितं स्मर्यते । अत्र कपिलशब्दमात्रेण साङ्ख्यकर्ता श्रौतः इति भ्रान्तिः सम्भवति । यद्यपि तेषु उल्लिखितः कपिलः न साङ्ख्यमतप्रवर्तकः, तथापि साधारणजनानाम् अयमर्थो न ज्ञायते । ते तु कपिलेतिनामश्रवणेन अयं साङ्ख्यमतप्रवर्तक इत्येव मन्यन्ते । यतः साङ्ख्यमतप्रवर्तकः कपिलः सर्वज्ञः महात्मा सिद्धः इत्येवं साङ्ख्या आघोषयन्ति । तथा च कस्मिंश्चित् काले साङ्ख्यानां तथा आघोषः आसीत् यथा सर्वेऽपि आस्तिकाः मुमुक्षवः साधारणाः जनाश्च एवममन्यन्त यत् कपिलः महापुरुषः, तेन प्रणीता स्मृतिः सर्वात्मना प्रमाणम्, श्रुत्योर्थोऽपि तदनुसारं निर्णेतव्य इति ।

द्वैतवादिनः साङ्ख्यस्य सर्वज्ञत्वायोगात् भ्रान्तिः अयुक्ता । वेदे श्रुतः कपिलो वासुदेवांशः न तु साङ्ख्यकर्ता । किञ्च **कपिलं ज्ञानैर्बिभर्ति तमीश्वरं पश्येदिति** विधीयते । तस्मात् कपिलस्य सर्वज्ञत्वप्राप्तिः । तथा हि

 ISSN – 2249-538X

कपिलप्रणीतया साङ्ख्यस्मृत्या वेदान्तानां ब्रह्मणि समन्वयः विरुध्यते इति भ्रमः स्यात् । तस्मात् तादृशभ्रमनिरासाय इदम् अधिकरणमारभ्यते । अत्र प्रकटार्थविवरणे स्वारस्यं - श्रौतः चेदपि बृहस्पतिवत् व्यामोहार्थतया सम्भवात् इति ।

अत्रायं पूर्वपक्षः – यथा मन्वादिस्मृतयः अनुष्ठानापेक्षितमर्थं बोधयन्त्यः प्रमाणानि भवन्ति तथा अचेतनं प्रधानं स्वतन्त्रं जगत्कारणम् । प्रधानस्य कर्तृत्वमेव, पुरुषस्य भोक्तृत्वमेव, प्रकृतिपुरुषविवेकात् संसारः, तयोः विवेकात् अपवर्गः इति मोक्षसाधनं सम्यग्दर्शनं प्रतिपादयन्ती साङ्ख्यस्मृतिः प्रमाणं भवितुमर्हति । तस्मात् प्रमाणभूतया साङ्ख्यस्मृत्या वेदान्तानां समन्वयः विरुध्यते इति प्रधानानुगुण्येनैव श्रुतयः नेतव्याः इति ।

एवं प्राप्ते सिद्धान्तसूत्रमुच्यते – **"स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशप्रसङ्गात्"** इति । ब्रह्मकारणवादस्वीकारे प्रधानकारणवादिनां साङ्ख्यानां स्मृत्यनवकाशप्रसङ्गः इति न भवति । कुत इति चेत् **"यद्वै किञ्च मनुरवदत् तद्भेषजम्"** इत्यादि श्रुतिभिः मन्वादीनां स्मृतेः प्रामाण्यम् उच्यते । **"सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि । संपश्यन्नात्मयाजी वै स्वाराज्यमधिगच्छति"॥(मनुस्मृतिः – १२-९१)** सर्वात्मत्वं दर्शनं प्रशंसता मनुना अपि ब्रह्मकारणवादः स्वीक्रियते । यदि साङ्ख्यस्मृतिः प्रमाणं तर्हि मन्वादिप्रणीतस्मृतीनां विरोधः स्यात् । मन्वादिप्रणीतस्मृतिस्तु श्रुतिसम्मता । स्मृत्योः परस्परविरोधे श्रुतिसम्मतस्मृतेः प्रामाण्यमभ्युपगन्तव्यम् । तस्मात् मन्वादिप्रणीतस्मृतेः प्रामाण्यं सिद्धं भवति ।

एवमेव मीमांसकाः श्रुतिस्मृत्योः विरोधस्थले अपौरुषेयत्वात् श्रुतेः एव प्रामाण्यम् अभ्युपगच्छन्ति । तदुक्तं प्रमाणलक्षणे **"विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्" (जै. सू. १-३-३)** इति । यथा – **"औदुम्बरी स्पृष्ट्वोद्गायेत्"** इति प्रत्यक्षश्रुतेः विरुद्धा **" सा सर्वा वेष्टयितव्या"** इति स्मृतिः मानं वा न वा इति

सन्देहे मूलश्रुतिः प्रमाणमित्युच्यते । यदि साङ्ख्यः प्रधानानुगुण्येन एव ब्रह्मकारणवादिन्यः श्रुतयः नेतव्याः इति कथयति तर्हि श्रुतिस्मृत्योः विरोधे श्रुतेः एव प्राबल्यत्वात् न वेदान्ताः साङ्ख्यपरतया नेतुं शक्यन्ते । तस्मात् वेदान्तानां ब्रह्मणि समन्वयसिद्धिः इति सिद्धान्तः।

सूत्रार्थस्तु - स्मृत्यनवकाशदोषप्रसङ्ग इति चेत् – कपिलमहर्षि-प्रणीतप्रधानकारणत्ववादिस्मृतीनाम् अनवकाशरूपदोषप्रसङ्ग इति चेत् न । अन्यस्मृत्यनवकाशप्रसङ्गात् – मन्वादिप्रणीतस्मृतीनां चेतनकारणवादिनाम् अनवकाशदोषस्य प्रसक्तेः इति । चेतनकारणवादिन्यः स्मृतयः - **"अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा"(भ. गी. ७-६) "यत्तत्सूक्ष्ममविज्ञेयम्"(ब्र. पु. – ३०-५८) स ह्यन्तरात्मा भूतानां क्षेत्रज्ञश्चेति कथ्यते (ब्र. पु. – ३०-५९) "तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम" इति ब्रह्मजन्मत्वस्मृतिः** इति । अत्र सूत्रकारेण स्मृतिरित्येव पदं प्रयुक्तम्, न तु साङ्ख्यस्मृतिरिति । प्रथमतस्तु समग्रं साङ्ख्यमतं कापिलस्मृतिमेव आश्रित्य तिष्ठति । स्मृतिश्च स्मृतित्वमात्रेण प्रमाणं न भवति, किन्तु श्रुतिमूलकत्वेन इति द्वितीयोऽर्थः सूचितः।

इतश्च साङ्ख्यस्मृतेः विरोधः अनवकाशदोषो वा नास्ति इत्युच्यते **"इतरेषां चानुपलब्धेः"** इति द्वितीयसूत्रेण । सूत्रार्थस्तु – कपिलस्मृतिसिद्धानां महदादितत्त्वानां लोके वेदे च अनुपलब्धेः अप्रामाण्येन साङ्ख्यस्मृतेः अनवकाशदोषो न भवति । सर्वव्याख्यानाधिकरणे पूर्वं प्रधानस्य इव अण्वादीनाम् अशब्दत्वमुक्तम् । अधुना प्रधानस्य श्रुत्यप्रतिपाद्यत्वेऽपि स्मृतिप्रतिपाद्यत्वमाक्षिप्य परिह्रियते इति पूर्वाधिकरणेन अस्य अधिकरणस्य आक्षेपसङ्गतिः।

शारीरकन्यायसङ्ग्रहे तुल्यबलयोः प्रमाणयोः अन्यतरस्य अप्रामाण्यानुपपत्तौ सावकाशनिरवकाशन्यायेन प्रामाण्यमुपस्थाप्यते ।

 ISSN – 2249-538X

प्रबलदुर्बलयोस्तु प्रमाणयोर्विरोधे प्रबलेन दुर्बलस्य बाधः एव न्यायः न व्यवस्था । अथवा क्लृप्तमूलया स्मृत्या कल्प्यमूलास्मृतिः बाध्या । मूलकल्पनायां बुद्धिगौरवात् । तस्मात् प्रत्यक्षस्मृतिमूलमन्वादिस्मृत्या साङ्ख्यस्मृतिः बाध्यते ।

***************

# बहुव्रीहिसमासः

**डा. एस्. टि. के. श्री रङ्गाचार्यः**

राजमण्ड्री

"वृतु वर्तने" इत्यस्माद्धातोः "स्त्रियां क्तिन्" (३-३-९४) इति सूत्रेण भावार्थे क्तिन्प्रत्यये वृत्तिरिति शब्दः निष्पद्यते। वर्तनं नाम व्यापारः। लोकेऽपि स एवार्थः प्रसिद्धः । शास्त्रेऽपि व्यापारार्थक एव । परन्तु शब्दशास्त्रे परार्थाभिधानरूपः व्यापारः वृत्तिरिति "समर्थः पदविधिः" (२-१-१) इति भगवतः पाणिनेराचार्यस्य सूत्रादवगम्यते। स्पष्टीकृतमेतत् फणिभाष्ये भगवता पतञ्जलिना। परार्थाभिधानं नाम विग्रहवाक्यावयवपदार्थेभ्यः परः अन्यः योऽयं विशिष्टैकार्थः तत्प्रतिपादिका वृत्तिरित्यर्थः। तथा च प्रक्रियादशायां प्रत्येकं समासघटकपदानामर्थवत्त्वेन प्रथमविगृहीतानां पदानां समुदायशक्त्या विशिष्टैकार्थप्रतिपादिका वृत्तिरिति यावत् । समुदायशक्तिबोधकं सूत्रं समर्थः पदविधिरिति । एतादृशवृत्तिशब्दबोधितव्यापारस्यैव एकार्थीभाव इति शास्त्रीयव्यवहारः।

"एकार्थीभावः" इति समस्तपदं च्विप्रत्ययान्तम् । कृभ्वस्तियोगे संपद्यकर्तरि च्विः" (५-४-१०) इति सूत्रेण अभूततद्भावे विहितः । समुदायेनाभूततद्भावे ज्ञायमाने एवायं च्विप्रत्ययः। यथा – अकृष्णः कृष्णः संपद्यते तं करोति कृष्णीकरोति, अब्रह्म ब्रह्म संपद्यमानं भवति ब्रह्मीभवति। अशुक्लं शुक्लं भवति शुक्लीभवतीतिवद् एवम् "एकीभूत" इत्यत्रापि

च्विप्रत्ययबलेन इतः पूर्वमनेकार्थस्य इदानीमेकार्थत्वमित्यर्थो लभ्यते ।यद्यपि भिन्नप्रवृत्तिनिमित्तकत्वेन द्वयोर्वा बहूनां वा शब्दानामेकार्थत्वमनेकार्थत्वञ्च एकस्यामवस्थायां न सम्भवति तथापि "समर्थः पदविधिः" (२-१-१) इति भगवतः पाणिनेराचार्यस्यानुशासनमनुस्मृत्यैकस्यामनेकार्थत्वमन्यस्यामवस्थायामेकार्थत्वञ्च सम्भवत्येव । भिन्नज्ञानविषयत्वमनेकार्थत्वमेकज्ञानविषयत्वमेकार्थत्वम् । एवमेकार्थबोधकत्वमेव सामर्थ्यमिति ।

"कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः । कृत्प्रत्ययान्ताः तद्धितप्रत्ययघटिताः तत्पुरुषादिसमासा एकशेषश्च सनादिप्रत्ययान्तधातवश्चेति वृत्तयः पञ्चविधा इत्यर्थः । एतासु पञ्चसु वृत्तिषु अन्यतमा समासवृत्तिः । अतः समासवृत्तिविषये चातुर्विध्यं प्रोक्तं प्राचीनवैयाकरणैः । तस्यैव लोके शास्त्रीयप्रसिद्धिर्जाता । यथा – अव्ययीभावतत्पुरुषद्वन्द्वबहुव्रीहिभेदात् । तत्र पूर्वपदार्थप्रधानोऽव्ययीभावः यथा अपदिशम् । उत्तरपदार्थप्रधानः तत्पुरुषः । कर्मधारय-द्विगु-नञ्-कुगतिप्राद्युपपदसमासाः तत्पुरुषविशेषा एव । अन्यपदार्थप्रधानो बहुव्रीहिः । यथा पीताम्बरः चित्रगुरित्यादौ । उभयपदार्थप्रधानो द्वन्द्वसमासः । यथा-हरिहरौ शीतोष्णमित्यादि ।

एषु अन्यतमः बहुव्रीहिसमासः ।

तद्विधायकं सूत्रम् "अनेकमन्यपदार्थे" (२-२-२५) इति । "सुबामन्त्रिते पराङ्गवत्सरे (२-१-२) इति सूत्रात् सुबिति प्रथमान्तमनुवर्तते । सह सुपा (२-१-४) इति सूत्रात्सहेत्यनुवर्तते । सुपा इति तु नानुवर्तते । तथा च अन्यपदार्थे वर्तमानमनेकं सुबन्तं सह समस्यते । स च समासः बहुव्रीहिसंज्ञको भवतीति

सूत्रार्थस्सम्पद्यते । उक्तादन्यश्शेषः, द्वितीयाश्रितातीतपतितगतात्यस्त-प्राप्तापन्नैः (२.१.२४) तृतीया तत्कृतार्थेन गुणवचनेन (२.१.३०) इत्यादिसूत्रैः द्वितीयादीनां सुबन्तेन समासो विहितः। तेभ्य अन्या विभक्तिः प्रथमा। तस्याः सुबन्तेन समासो नोपदिष्टः सूत्रकारेण भगवता पाणिन्याचार्येण । यद्यपि “विशेषणं विशेष्येण बहुलम्” (२.१.५७) इति सूत्रेण नीलञ्च तत् उत्पलञ्च नीलोत्पलम्, वासुश्चासौ देवश्च वासुदेव इत्यादौ प्रथमान्तयोस्समासो विहितः। तथापि - सप्तसु विभक्तिषु यस्य त्रिकस्य शृङ्गग्राहिकतया समासो नोक्तस्तस्याः प्रथमायाः स शेषशब्दार्थः । उक्तञ्च भट्टोजीदीक्षितेन- “द्वितीयाश्रितेत्यादिना यस्य त्रिकस्य विशिष्य समासो नोक्तः स शेषः प्रथमान्तमित्यर्थः” इति । सूत्रेऽनेकपदसामर्थ्यात् न केवलं तत्पुरुषादिष्विव द्वयोरेव समास अपितु बहूनामपि सिद्ध्यति बहुव्रीहिः। यथा – पीतमम्बरं यस्य सः पीताम्बरः। भुजगशयनः, चित्रगुः, चित्राजरतीगुः(चित्रा जरती गौः यस्येति) इत्यादि। वस्तुतः- उत्तरपदे परतः “तद्धितार्थोत्तरपदसमाहारे च”(२.१.६) इति सूत्रेण समास-विधानात् अनेकसुबन्तानां बहुव्रीहिस्सिध्यत्येव। अतो न तदर्थं सूत्रेऽनेकग्रहणमावश्यकम् । किन्तु सह सुपा (२.१.४) इति सूत्रात्सुपेति तृतीयान्तपदस्यानुवृत्तिनिवृत्त्यर्थमेव । सूत्रेऽर्थग्रहणाभावेऽपि अन्यपदेऽनेक-पदानां वृत्त्यसम्भवात्सामर्थ्येनैवान्यपदार्थे इत्येव सिद्धे “पुनरर्थग्रहणं” द्रव्यलिङ्गसंख्यायुक्तान्यपदार्थबोधकपदानामेव बहुव्रीहिर्भवतीत्यर्थं ज्ञापयति।

**व्यधिकरणपदबहुव्रीहिः**

“अनेकमन्यपदार्थे” (२.२.२.४) इति सूत्रेण विधीयमानः बहुव्रीहिसमासः “समानाधिकरणानाम् इति वक्तव्यमिति” भगवता

 ISSN – 2249-538X

कात्यायनमहर्षिणा नियमनमकारि । फणिभाष्येऽपि भगवता पतञ्जलिमहर्षिणापि "समानाधिकरणानां बहुव्रीहिर्वक्तव्यः किं प्रयोजनम् । व्यधिकरणानां मा भूदिति" इत्यादिना स्पष्टीकृतम् ।

नह्येतावता समानाधिकरणानामेव बहुर्व्रीहिर्भवतीति नियमो नास्ति व्यधिकरणानामपि बहुव्रीहिः भवति । शास्त्रबोधितत्वात्प्रामाणिकत्वाच्च । यद्यपि समानाधिकरणपदबहुव्रीहिः सार्वत्रिकः स्वारसिकश्च व्यधिकरणपदबहुव्रीहिस्तु क्वाचित्कः नत्वनार्षः प्रमाणबाहुल्यात् । यथा -

१. षष्ठी स्थानेयोगा (१.४.४९) अत्र स्थानेयोगेति समस्तं पदम् । न तु व्यस्तं नाम भिन्नपदे ।अत्र च "स्थाने योगः यस्या" इति व्यधिकरणपदबहुव्रीहिः ।अत्र सप्तम्या अलुक् निपात्यते ।यद्वा स्थानेन योग यस्याः सा स्थानेयोगेति । अत्र सामासिकलुकि एदन्तत्वञ्च निपात्यते । उक्तञ्च महाभाष्ये स्थानेयोगोऽस्याः सेयं स्थानेयोगा सप्तम्यलोपो निपात्यते । तृतीयाः वा एत्वम् । स्थानेन योगोऽस्याः सेयं स्थानेयोगे"ति ॥

२. सूपस्य गन्धः लेशः यस्मिन् तत्सूपगन्धीति व्यधिकरणपदबहुव्रीहिः । अत्र गन्शब्दान्तस्य "अल्पाख्यायाम्" (५.१.१३६) इति सूत्रेणाल्पत्वे द्योत्ये इत्वं विधीयते सूत्रकृता । "समानाधिकरणानामेव बहुव्रीहि" रिति नियमस्य नाम वार्तिकस्य सार्वत्रिकत्वे सूत्रकारेणानुशिष्टस्येत्वविधानस्य वैयर्थ्यं दुर्वारमेव स्यात् । यद्यपि "गन्धः सूपः यस्मिन्निति" समानाधिकरण-बहुव्रीहेरप्यरकाशोऽस्ति । तथापि तदा गन्धशब्दस्यैवपूर्वनिपातनात् गन्धशब्दान्तबहुव्रीहेरभावात् इत्वविधानस्य निर्विषयत्वापत्तिस्स्यात् ।

३."अप्सु योनिः उत्पत्तिर्यस्य स अप्सुयोनिरिति" व्यधिकरणपदबहुव्रीहिः। अत्र "अपो योनियन्मतुषु" इति वार्तिकेनालुक् विहितः । अयमत्र विशेषः – बहुव्रीहिस्स्मनाधिकरणानामिति वदन् वार्तिककार एवात्र सप्तम्या अलुकं शास्ति।

४."आकडारादेका संज्ञा " (१.४.१) इति सूत्रे "वीराः पुरुषाः यस्मिन् ग्रामे स वीरपुरुषको ग्राम" इत्यत्र कर्मधारयबहुव्रीह्योरुभयोरपि प्राप्तयोः एकसंज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिरिति तत्पुरुषबाधकत्वमुक्त्वा ' तत्पुरुषस्य इति चेदन्यत्र क्तार्थात्प्रतिषेधः इति वार्तिककारः । निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः इत्यत्रापि अन्यपदार्थस्य सत्त्वात् बहुव्रीहिणा तत्पुरुषस्य बाधकत्वमिति दोषोद्भावनं प्रदर्शितम् । व्यधिकरण-पदबहुव्रीह्यनङ्गीकारे वार्तिककारेण दोषोद्भावनमसङ्गतं स्यात्।

५. "प्रहरणार्थेभ्यः परे निष्ठसप्तम्यौ" इति वार्तिकेन प्रहरणार्थेभ्यः परयोः निष्ठासप्तम्योः परनिपातो विधीयते। यथा दण्डः पाणौ यस्य सः दण्डपाणिः, चक्रं पाणौ यस्य सः चक्रपाणिः इत्यादि । व्यधिकरणपदबहुव्रीहेरभावे सप्तम्यन्तस्य परनिपातनं वार्तिककारस्य परनिपातनमसङ्गतं स्यात्।

६. "वृद्धिरादैच्" (१.१.१) अत्र सूत्रे वृद्धिपदेन आदैच्मात्रग्रहणे दोषवारणाय भगवता भाष्यकारेण वृद्धिनिमित्तस्येत्यस्य "वृद्धेः निमित्तं यस्मिन् सोऽयं वृद्धिनिमित्त" इति व्यधिकरणपदबहुव्रीहिरुक्तः ।

७. "स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु"

 ISSN – 2249-538X

(६.३.३०) इति सूत्रे भाषितः पुमान् येन तद्भाषितपुंस्कं तदस्यास्तीति अर्श आदित्वादच्प्रत्ययः । पुंस्त्वे स्त्रीत्वे च एकप्रवृत्तिनिमित्तकत्वमित्यर्थः । अत्राप्येवं व्यधिकरणपदबहुव्रीहिरेव महाभाष्ये प्रदर्शितः।

८. "सप्तमीविशेषणे बहुव्रीहौ" (२.२.३५) इति सूत्रेण बहुव्रीहौ सप्तम्यन्तस्य विशेषणस्य च पूर्वनिपातो विधीयते । यथा – कण्ठे कालः यस्य सः कण्ठेकालः, चित्राः गावः यस्य सः चित्रगुः। अत्र सप्तम्यन्तस्य कर्तृकर्मद्वारैव क्रियान्वयात्तस्यापि विशेषणत्वसंभवेन सूत्रस्थ विशेषणपदेनैव पूर्वनिपाते सिद्धे सप्तमीग्रहणं व्यर्थीभूय व्यधिकरणपदबहुव्रीहिं ज्ञापयति । उक्तञ्च शब्देन्दुशेखरे "सप्तम्यन्तस्य कर्त्राद्यन्वयद्वारैव क्रियान्वयाद्विशेषणत्वेन सिद्धे वैयधिकरण्येऽपि समासज्ञापनार्थं सूत्रस्य" सप्तमीग्रहणमिति।

९. "कर्मण्यण् (३.२.१) इति सूत्रे महाभाष्ये – शीलिकामिभक्ष्याचरिभ्यो णः पूर्वपदप्रकृतिस्वरत्वञ्च" इति कात्यायनवचनव्याख्यानावसरे "भवति हि बहुव्रीहेरपि मांसे कामोऽस्य मांसकाम" इति व्यधिकरणपदबहुव्रीहिं स्पष्टीचकार । एवं समानाधिकरणपदबहुव्रीहिः यथा शास्त्रे उपदिष्टस्तथैव व्यधिकरणपदबहुव्रीहिरपि शास्त्रे उपदिष्टः । समानाधिकरणबहुव्रीह्याश्रयणे यथा मुनित्रयस्य सम्मतिः वर्तते तथैव व्यधिकरणपदबहुव्रीहिविषयेऽपि मुनित्रयसम्मतिरस्तीति पूर्वोक्तरीत्या सुस्पष्टमेवेति अवगम्यते।

**आबाहुपुरुषाकारं शङ्खचक्रगदाधरम्।**
**सहस्रशिरसं श्वेतं पतञ्जलिमुपास्महे॥**

***************

# कर्मप्रवचनीयाः

**डा. सि. एस्. एस्. नरसिंहमूर्तिः**

व्याकरणविभागाध्यक्षः

राजीवगान्धीपरिसरः, शृङ्गेरी.

इदमधिकारसूत्रम् । अस्मिन्नधिकारे पञ्चदशसूत्राणि सन्ति । तानि -

१) अनुर्लक्षणे

२) तृतीयार्थे

३) हीने

४) उपोऽधिके च

५) अपपरी वर्जने

६) आङ्मर्यादावचने

७) लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः

८) अभिरभागे

९) प्रतिः प्रतिनिधिप्रतिदानयोः

१०) अधिपरी अनर्थकौ

११) सुः पूजायाम्

१२) अतिरतिक्रमणे च

१३) अपिः पदार्थसम्भावनाऽन्ववसर्गगर्हासमुच्चयेषु

१४) अधिरीश्वरे

१५) विभाषा कृञि इति।

 ISSN – 2249-538X

एतैः सूत्रैः केषुचिदर्थेषु अनु, उप, प्रति, परि, अभि, अधि, सु, अपि, अप, आङ् ,(१०) इत्येतेषां कर्मप्रवचनीयसंज्ञा प्रोक्ता। एतां संज्ञां निमित्तीकृत्य कर्मप्रवचनीययुक्ते द्वितीया(२-३-८) इत्यनेन द्वितीयाविभक्तिः, पञ्चम्यपाङ्परिभिः(३-३-१०),प्रतिनिधिप्रतिदाने च यस्मात्(२-३-११) इत्याभ्यां पञ्चमी, यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी(२-३-९) इत्यनेन सप्तमीविभक्तयश्च विधीयन्ते। एतेषां दशानां गत्युपसर्गसंज्ञे स्तः, तदपवादतया विशिष्टेष्वर्थेषु कर्मप्रवचनीयसंज्ञा पाणिनिना कथिता। संज्ञेयमाकडाराधिकारे वर्ततेऽतः कर्मप्रवचनीयसंज्ञया गत्युपसर्गसंज्ञयोः बाधो भवति।

लक्षणे, तृतीयाविभक्त्यर्थे, हीने, आधिक्ये, लक्षणेत्थम्भूताख्यान - भागवीप्सार्थेषु च अनोः कर्मप्रवचनीयसंज्ञा प्रतिपादिता, तयाऽत्र कर्मप्रवचनीययुक्ते द्वितीया इत्यनेन द्वितीयाविभक्तिः भवति।

भागार्थे एव अभेः कर्मप्रवचनीयसंज्ञा प्रोक्ता, तयाऽत्र कर्मप्रवचनीययुक्ते द्वितीया इत्यनेन द्वितीयाविभक्तिः भवति। हरिमभि वर्तते। जयः क्वेति प्रश्ने इदमुत्तरम्। हरिलक्ष्यो जयः इत्यर्थः।

अधि-पर्योः अनर्थकत्वे कर्मप्रवचनीयसंज्ञा कथिता, तयाऽत्र कुतोऽध्यागच्छति(कस्मात्प्रदेशादागच्छतीत्यर्थः), कुतो पर्यागच्छति इत्यत्र अधि+आ, परि+आ इत्यत्र गतिर्गतौ(८-१-७०) इत्यनेन निघातो न भवति।

सुः इत्यस्य पूजायामेव कर्मप्रवचनीयसंज्ञा प्रबोधिता। अतः सुसिक्तम्, सुस्तुतम् इत्यत्र उपसर्गात्सुनोति---(८-३-६५) इत्यादिना षत्वं न भवति। निन्दायाम् - सुसिक्तम्, सुस्तुतम् इति रूपे भवतः।

अपेः पदार्थसम्भावनाऽन्ववसर्गगर्हासमुच्चयेष्वर्थेषु कर्मप्रवचनीय-संज्ञा भणिता। अतः सर्पिषोऽपि स्यात्, अपि स्तुयाद्विष्णुम्, अपि स्तुहि, अपि स्तुयाद् वृषलम्, अपि सिञ्च, अपि स्तुहि इत्यत्र तत्तदर्थेषु अपेः कर्मसंज्ञायाः कथनाद् उपसर्गत्वाभावात् उपसर्गप्रादुर्भ्यामस्तिर्यच्परः(८-३-८७) इति षत्वं न भवति।

वर्जनार्थे अप-पर्योः योगे, मर्यादायामाङ् योगे, प्रतिनिधि-प्रतिदानयोरर्थयोः प्रतेः योगे च पञ्चम्यपाङ्परिभिः(३-३-१०),प्रतिनिधिप्रतिदाने च यस्मात्(२-३-११) च इत्यनेन पञ्चमी भवति।

स्वस्वामिभावसम्बन्धेऽधेः कर्मप्रवचनीयसंज्ञा भवति। अतः यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी (ईश्वरशब्देन ईश्वरत्वं ग्राह्यम्, तच्च स्वस्वामिभावसम्बन्धात्मकम्) इत्यनेन 'अधि भुवि रामः' इत्यत्र स्व-स्वामिभ्यां पर्ययेण सप्तमी प्रवर्तते - अधि रामे भूः इत्यपि भवति। उपेत्यस्य उपोऽधिके च इत्यनेन कर्मप्रवचनीयसंज्ञाकथनाद् उप परार्धे हरेः गुणाः इत्यत्र परार्धशब्दात् सप्तमी भवति।

इत्थं कर्मप्रवचनीयसंज्ञां निमित्तीकृत्य तिस्रः विभक्तयः पाणिन्याचार्येण प्रत्यपद्यत।

पर्जन्यो जपमनु प्रावर्षत् इत्युदाहरणम् - अत्रनोः कर्मप्रवचनीयसंज्ञायां तद्योगे जपमित्यत्र द्वितीया भवति। कदा पर्जन्योऽवर्षदिति प्रश्नस्येदमुत्तरम्। अत्र वृष्टिकालः वक्तव्यः। स च दुर्ज्ञानत्वात् शाखाग्रं प्रति द्विकलश्चन्द्रः इतिवत् प्रज्ञानं किञ्चिदवलम्ब्यैव ज्ञाप्यः। जपोऽत्र प्रज्ञानम्। तत्र जपकाले पर्जन्यः प्रावर्षदिति सम्भवति। हेतुभूतजपो ह्यत्र

 ISSN – 2249-538X

लक्षणम्। हेतुत्वं च पूर्वकालवृत्तित्वघटितम्। एवञ्च वर्षहेतुभूतवरुणजपोत्तरकाले पर्जन्यः प्रावर्षत् इति लभ्यते। अत्र लक्षणत्वं हेतुत्वं चेति द्वयं द्वितीयार्थः। तदुभयमनुना द्योत्यते। लक्षणत्वं च ज्ञानजनकज्ञानविषयत्वम्। जपज्ञानेन तदुत्तरकालिका वृष्टिः ज्ञाप्यते। ततश्च जपात्मकहेतुज्ञानजन्यज्ञानविषयो वर्षणमिति बोधः।

सम्प्रति कर्मप्रवचनीयः कः? इति विचारयामः। भाष्ये सूत्रस्य व्याख्यानमेवं विद्यते - **किमर्थं महती संज्ञा क्रियते? अन्वर्थसंज्ञा यथा विज्ञायेत - कर्म प्रोक्तवन्तः = कर्मप्रवचनीयाः इति। के पुनः कर्म प्रोक्तवन्तः? ये सम्प्रति क्रियां नाहुः। के च सम्प्रति क्रियां नाहुः? येऽप्रयुज्यमानस्य क्रियामाहुस्ते कर्मप्रवचनीयाः।** संज्ञा-संज्ञिनोः उभयोरपि एकेनैव पदेनासूचयदाचार्यः। ये कर्म=क्रियां (क्रियागतविशेषमित्यर्थः), प्रोक्तवन्तः, ते = कर्मप्रवचनीयाः इति अर्थमनुगता, योगरूढा च, अतोऽन्वर्थैषा संज्ञा। अङ्गीकृतयोगार्थप्रवृत्ति-निमित्तेत्यर्थः। प्रवचनीयः इत्यत्र ब्रूञ्धातोः भूते तव्यत्तव्यानीयरः(३-१-९६) इत्यनेन अनियर्प्रत्ययः। आर्धधातुकेषु वच्यादेशः। अतः प्रोक्तवन्त इत्यर्थो लभ्यते।

**जनयित्वा क्रिया काचित् सम्बन्धं विनिवर्तते।**
**श्रूयमाणे क्रियाशब्दे सम्बन्धो जायते क्वचित्॥**

(साधनसमुद्देशः का. सं.१९७)

राज्ञः पुरुषः इत्यत्र यतः पुरुषमिमं राजा बिभर्ति, अतोऽयं राज्ञः पुरुषः इत्यनुभवने क्रियायाः सम्बन्धजनकत्वम्।

सम्बन्धावच्छेदकहेतवः कर्मप्रवचनीयाः वर्तन्ते। श्रूयमाणक्रियोप -

जनितसम्बन्धविशेषावद्योतकाः इत्यर्थः।

वाक्यपदीयकारेण दार्शनिकाग्रेसरेण श्रीमता भर्तृहरिणा षड्भिः कारिकाभिः विचारोऽयं साकल्येन न्यरूप्यत -

१) **स चोपजातः सम्बन्धो विनिवृत्ते क्रियापदे।**

**कर्मप्रवचनीयेन तत्र तत्र नियम्यते ॥**

(साधनसमुद्देशः का. सं.१९९)

सम्बन्धं जनयित्वा क्रियापदे विनिवृत्ते सति स उपजातः सम्बन्धस्त्वेतत्क्रियाकृतोऽयं सम्बन्ध इति नियमेनाप्रतीयमानः कर्मप्रवचनीयैः तत्र तस्यां तस्यां क्रियायां जन्यत्वेन नियम्यते। तत्तत्क्रियाजन्यत्वेन सम्बन्धविशेषः कर्मप्रवचनीयैः प्रत्याय्यते = द्योत्यते, सम्बन्धस्य षष्ठ्यपवादभूतया द्वितीययैवोक्तत्वात्। यथा - वृक्षं प्रति विद्योतते विद्युत्। अत्र हि वृक्षमभिलक्ष्य विद्युत् विद्योतत इत्यर्थाभिप्रायेण वृक्षविद्योतनयोः लक्ष्यलक्षणभावः सम्बन्धो लक्षणक्रिययोपजनितः।

सा च क्रिया तं सम्बन्धमुपजन्य प्रतिनिवृत्तेति हेतोः वृक्षविद्योतनयोः सम्बन्धः कश्चिदस्ति। स च कः? किं क्रियाकृतश्च इति कर्मप्रवचनीयाभावेन विज्ञायेत। कर्मप्रवचनीयसत्त्वे त्वत्र प्रतिना कर्मप्रवचनीयेन पूर्वं लक्षणक्रियामुक्त्वा तत्कृतो लक्ष्यलक्षणभावरूपः सम्बन्धः द्वितीययोक्तः द्योत्यते ।

नन्वेवं सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति न्यायविरोधः प्रसज्येत खलु इति चेद् - उच्यते, अत्राभिधा-व्यञ्जनारूपवृत्तिद्वयं स्वीक्रियते। यथा 'गङ्गायं घोषः" इत्यत्र सकृदुच्चरितस्यपि गङ्गापदस्य वृत्तिभेदेन क्रमेण शक्य-

 ISSN – 2249-538X

लक्ष्य-व्यङ्ग्यरूपार्थत्रयबोधकत्वं, तथाऽत्रापि।

अत्रायमाक्षेपः - यथा प्रादेशं विलिखति इत्यत्र विः मानक्रियायाः आक्षेपकः - प्रादेशं विमाय लिखतीति, तथा वृक्षं प्रति विद्योतते विद्युत् इत्यादौ प्रत्यादयः कर्मप्रवचनीया अश्रूयमाणया लक्षणादिक्रियायाः अक्षेपकाः कुतो नाश्रीयन्ते - वृक्षमभिलक्ष्य विद्युत् विद्योतत इति शङ्कायामुच्यते -

२) **येन क्रियापदाक्षेपः स कारकविभक्तिभिः।**

**युज्यते विर्यथा तस्य लिखावनुपसर्गता॥**

(साधनसमुद्देशः का. सं.२००)

येन पदेन क्रियापदस्याक्षेपः क्रियते, स क्रियापदाक्षेपकत्वेन क्रियाबोधकत्वात् कारकविभक्तिभिः युज्यते। यथा - प्रादेशं विपरि-लिखतीत्यत्र विशब्दो विमानक्रियाक्षेपकत्वेन प्रादेशमिति कारकविभक्त्या युज्यते, न तु लिखतिः, प्रादेशं विमाय परिलिखतीत्यर्थबोधात्। एवञ्च यत्क्रियायुक्ताः प्रादयः तं प्रत्येव गत्युपसर्गसंज्ञाः भवन्तीति नियमात् विशब्दस्य माधात्वर्थं प्रत्युपसर्गत्वं, गतित्वञ्च, न तु लिखतिं प्रतीति। अत एव प्रादेशं विपरिलिखतीत्यत्र "गतिर्गतौ" इति निघातोऽपि न प्रवर्तते।

पुनरत्रैवं शङ्कोदेति - प्रादेशं विलिखति इत्यत्र विशब्दादिवत् कर्मप्रवचनीयैरपि यदि क्रियापदमाक्षिप्येत, तदा तद्योगे कारकविभक्तिरेव स्यात्। ततश्च कर्मप्रवचनीययुक्ते द्वितीया(२-३-८) इति सूत्रं नारम्भणीयं स्यात्। यदि कर्मप्रवचनीयेन क्रियापदं नाक्षिप्येत, तदा वृक्षविद्योतनयोः सम्बन्धसामान्ये षष्ठी प्राप्नोतीति तद्बाधनाय कर्मप्रवचनीययुक्ते द्वितीयेति

शास्त्रारम्भः आवश्यकः।

**३) तिष्ठतेरुपयोगश्च दृष्टोऽप्रत्यजयन्निति।**

**सुन्वन्तीत्याभिमुख्येऽभिः केवलोऽपि प्रयुज्यते॥**

(साधनसमुद्देशः का. सं.२०१)

प्रादेशं विलिखति इत्यत्र विशब्देनैव क्रियाऽऽक्षिप्यते, अन्यत्र नेति न मन्तव्यम्। प्रतिशब्दादावपि क्रियपदाक्षेपकत्वं दरीदृश्यते। यथा - अप्रत्यजयन्नित्यत्र। देवा असुरान्नप्रत्यजयन्निति वाक्ये। अप्रति = अप्रतिष्ठितान् प्रतिष्ठामलभमानान् असुरान्, देवा अयजन्नित्यर्थः। अत्र प्रतिना तिष्ठतेः= स्थितिरूपस्य स्थाधात्वर्थस्य, उपयोगश्च= आक्षेपोऽपि दृष्टः। "सुन्वन्ति" इत्यत्र = अभिसुन्वन्ति इत्यत्र 'पिधेहि' इतिवत् वाक्यैकदेशप्रयोगः छन्दोऽनुरोधात्। अत्र केवलोऽभिः आभिमुख्ये वर्तते, न तु धातुः। धातुरेवाभिमुख्यार्थ-विशिष्टार्थबोधक इति स्वीकृत्य उपसर्गस्य अभेः द्योतकत्वे धात्वर्थस्यासत्त्व-भूतत्वेन लिङ्गसंख्यान्वययोग आभिमुख्यार्थे न स्यात्। तथा सति स्वार्थमुखेनाभेः धात्वर्थे सवनेऽन्वयो न स्यात्।

ननु पूर्वोक्तरीत्या क्रियां प्रोच्य सम्बन्धं जनयित्वा विनिवृत्ते क्रियापदे सम्बन्धविशेषावद्योतकानामेव कर्मप्रवचनीयत्वे स्वत्यादीनां क्रियायोगेन क्रियाविशेषावद्योतकानां कर्मप्रवचनीयत्वं न स्यात्खलु, तथा च 'सुसिक्तम्, अतिसिक्तम्' इत्यत्र सुष्ठु सिक्तम्, अतिशयेन सिक्तमित्यर्थेन क्रियागतस्यैव सौष्ठवस्य, अतिशयस्य च प्रतीत्या क्रियाविशेषावद्योतकावेवेति शङ्कायामुच्यते -

 ISSN – 2249-538X

४) **कर्मप्रवचनीयत्वं क्रियायोगे विधीयते।**

**षत्वादिविनिवृत्त्यर्थं स्वत्यादीनां विधर्मणाम्॥**

(साधनसमुद्देशः का. सं.२०२)

विधर्मणाम् = सम्बन्धविशेषावद्योतकापेक्षया क्रियाविशेषावद्योतकत्वरूपविरुद्धधर्मवतां स्वस्त्यादीनां "सुसिक्तम्, अतिसिक्तम्" इत्यादौ, षत्वादिविनिवृत्त्यर्थम्=एकसंज्ञाधिकाराद् गत्युपसर्गसंज्ञाबाधपुरस्सरम् "उपसर्गात्सुनोतीत्यादिना उपसर्गसंज्ञानिमित्तषत्वनिवृत्त्यर्थम्। क्रियायोगे= क्रियाविशेषावद्योतकत्वे, सम्बन्धविशेषावद्योतकत्वेऽपि च कर्मप्रवचनीयत्वं विधीयते।

कर्मप्रवचनीयानां सम्बन्धविशेषावद्योतकत्वेन शेषषष्ठीबाध एव फलं न, किन्तु क्वचिद्धेतुतृतीयाबाधोऽपि भवतीति बोधयितुमेषा कारिकाऽऽरब्धा -

५) **हेतुहेतुमतोर्योगपरिच्छेदेऽनुना कृते।**

**आरम्भाद् बाध्यते प्राप्ता, तृतीया हेतुलक्षणा॥**

(साधनसमुद्देशः का. सं.२०३)

"शाकल्यस्य संहितामनु प्रावर्षत्" इत्यत्र हेतुहेतुमतोः शाकल्यस्य संहिताप्रवर्षणयोः योगस्य हेतुहेतुमद्भावलक्षणस्य परिच्छेदेऽवधारणेऽनुना कृते सति कर्मप्रवचनीययोगात् प्राप्तां लक्षणद्वितीयां ज्ञाप्यज्ञापकस्थले सावकाशां परत्वात् प्रबाध्य प्राप्ता हेतुलक्षणतृतीया लक्षणत्वेनानोः कर्मप्रवचनीयत्वे लक्षणेत्थम्भूतेति शास्त्रेण सिद्धे पुनः अनुर्लक्षणे इति कर्मप्रवचनीयसंज्ञाविधायकशास्त्रारम्भसामथ्याद् बाध्यते।

६) **क्रियाया द्योतको नायं सम्बन्धस्य न वाचकः।**

**नापि क्रियपदाक्षेपी, सम्बन्धस्य तु भेदकः॥**

(साधनसमुद्देशः का. सं.२०४)

अयम् = कर्मप्रवचनीयः, क्रियायाः = सम्बन्धविशेषजनिकायाः लक्षणादिक्रियायाः, द्योतको न, किन्तु वाचकः, सम्बन्धविशेषं जनयित्वा क्रियायाः विनिवृत्तेः, समभिव्याहृतधात्वर्थक्रियाविशेषाव-द्योतकत्वस्यैवोप-सर्गादीनां दृष्टत्वाच्च। तु =किन्तु, सम्बन्धस्य=सम्बन्धस्यैव लक्षणक्रिया-जनितस्य सामान्यस्य, भेदकः = विशेषकः, विशेषेऽवस्थापकः कर्मप्रवचनीयः। तथा च षष्ठ्यपवादद्वितीयोक्तसम्बन्धविशेषावद्योतकत्वमेव कर्मप्रवचनीया-नामिति लभ्यते।

****************

 ISSN – 2249-538X

# आद्यन्तवदेकस्मिन्

**डा. चन्द्रशेखरभट्टः**

सहायकाचार्यः, व्याकरणविभागः

राजीवगान्धीपरिसरः, शृङ्गेरी

अष्टाध्याय्यां प्रथमस्य प्रथमपादे एकविंशमिदमतिदेशसूत्रम् आद्यन्तवत्, एकस्मिन् इति द्विपदात्मकम्। आदिश्च अन्तश्च आद्यन्तौ, तयोरिव आद्यन्तवत् । 'तत्र तस्येव' इति सप्तम्यन्ताद्वतिः । एकशब्दोऽसहायवाची । एकस्मिन् क्रियमाणं कार्यम् आदाविव अन्त इव च स्यादिति सूत्रार्थः। यथा – आद्युदात्तश्च इति प्रत्ययाद्युदात्तत्वम् आदेरुपदिष्टम् । तच्च कर्तव्यमित्यत्र तव्यतः आदिवर्णस्य भवति। औपगव इत्यत्र एकवर्णात्मके अण्प्रत्यये अनेन आदित्वव्यपदेशस्यातिदेशः सिद्ध्यति । वृक्षाभ्याम् इत्यत्र सुपि चेति दीर्घः अलोऽन्त्यस्य इति सूत्रेण अङ्गान्त्यस्योपदिष्टः । स च आभ्यामिति एकवर्णात्मके इदशब्दे अनेनान्तवत्वातिदेशे सिद्ध्यति । एवञ्च आद्यन्तप्रतिबद्धानि कार्याणि असहायेऽपि स्युरिति सूत्रस्यास्यारम्भः।

सत्यन्यस्मिन्नाद्यन्तव्यवहारः – सत्यन्यस्मिन् यस्मात् पूर्वं नास्ति परमस्ति स आदिः। एवं सत्यन्यस्मिन् यस्मात् परं नास्ति पूर्वमस्ति सोऽन्तः। एकस्मिन् पुनः आद्यन्तापदेशौ न स्त इति आद्यन्तपदवच्छास्त्राणि न प्रवर्तेरन्। तत्कार्यातिदेशार्थं सूत्रमिदमारब्धम्।

ननु आद्यन्तापदिष्टानि कार्याणि अनेन सूत्रे प्रवर्त्यन्ते चेदपि इयाय इत्यादौ 'एकाचो द्वे प्रथमस्य' इति द्वित्वस्य प्रवृत्तिः न स्यात्। न हि द्वित्वम्

आद्यन्तापदिष्टं कार्यम् । इति चेदुच्यते – 'तत्र व्यपदेशिवद्वचनम्' इति । आद्यन्तापदिष्टानापदिष्टसर्वकार्यसिद्ध्यर्थं गौरवमनादृत्य आद्यन्तवदेकस्मिन् इत्यस्य स्थाने व्यपदेशिवदेकस्मिन् इति न्यासः कर्तव्यः । अन्यथा गौणमुख्ययोः मुख्ये कार्यसम्प्रत्ययः इति पपाच इत्यादिमुख्यस्थले एव द्वित्वप्रवृत्तिः स्यात् । निमित्तसद्भावात् । विशिष्टोऽपदेशो मुख्यव्यवहारो यस्य अस्ति सः व्यपदेशी । व्यपदेशिना तुल्यं व्यपदेशिवत् । व्यपदेशहेत्वभावात् अविद्यमानव्यपदेशः सः तेन व्यपदेशिना तुल्यं वर्तते कार्यं प्रतीति व्यपदेशिवत् ।

नन्वत्र 'तेन तुल्यं क्रिया चेद्वतिः' इति सूत्रेण तृतीत्यान्ताद्वतिप्रत्ययो वक्तव्यः भाष्यानुसारम् । परं क्रियातौल्ये सत्येव सूत्रेणानेन वतिर्विधीयते । प्रकृते च व्यपदिशिनि यथा कार्यं तथैव व्यपदेशाभाववत्यपि तत्कार्यं भवतीत्यर्थो विवक्षितः । कथं तर्हि तृतीयान्ताद्वतिरुपपद्यताम् ? उच्यते ? तेन तुल्यमिति तृतीयान्तार्थे सर्वविभक्त्यन्तार्थोऽन्तर्भवतीति भाष्यकृता तृतीयार्थः प्रादर्शि । एवञ्च मथुरावत् पाटलिपुत्रे प्राकारः इतिवदत्रार्थो विवक्षितः ।

- न्यासान्तरप्रयोजनानि – १. एकाचो द्वे प्रथमस्य । सूत्रेऽस्मिन् एकाजिति बहुव्रीहिः । एकः अच् यस्य सः । एकाच्त्वं च पपाच पपाठ इत्यादौ प्रकृतिभूतधातावस्ति । इयाय इत्यत्र तु अजतिरिक्तस्य न कस्यचिदभावात् एकाच्त्वानुपपत्तिः । व्यपदेशिवद्भावेन तु तत्सिध्यति ।

ननु पच् पठ् इत्यादावपि व्यपदेशिवद्भावनैरपेक्ष्येण द्वित्वप्रवृत्तिः खपुष्पायते । सूत्रे प्रथमस्य एकाचः इति श्रूयते । धातुरेवात्र एकाच् न त्वयं धातोः प्रथमैकाच् । अत्रोच्यते – सूत्रे प्रथमस्य इत्युक्तेः पचादिष्वपि तत्वं सूत्रेणैवातिदिश्यते । अन्यथा जागृ-चकासृ इत्यादिष्वेव द्वित्वप्रवृत्त्या शास्त्रस्य

अल्पविषयत्वं स्यात् । तस्मात् सूत्रे प्रथमस्य ग्रहणसामर्थ्यात् पचादिषु प्रथमत्वातिदेशः सिद्ध एव । अतः व्यपदेशिवदभावारम्भस्य नेदं प्रयोजनं किन्तु इयाय इत्यादिकम् ।

२. षत्वविधौ आदेशसम्प्रत्ययः – आदेशप्रत्यययोः इति सूत्रेण षत्वं विधीयते । सूत्रे आदेशप्रत्यययोरित्यवयवषष्ठी । प्रत्ययावयवस्य सस्य इत्युक्ते करिष्यति इत्यादौ भवेत्, इन्द्रो मा वक्षत् इत्यादौ न स्यात् । तत्र हि लुङि सिचोऽनुबन्धलोपे सकारमातेरस्य शेषात् प्रत्ययत्वपर्याप्ते तस्मिन् प्रत्ययावयवत्वं दुरुपपादम् । व्यपदेशिवद्भावेन तु तत्त्वं सिद्ध्यति ।

ननु व्यपदेशिवद्वचनं न कार्यम्, लोकतः एव सिद्धेः । यथा – शालासमुदायो ग्राम इत्युच्यते, भवति चैतदेकस्मिन्नपि एकशालो ग्राम इति । एवमिहापि एकस्मिन्नचि एकाजिति व्यपदेशो भवति । नैतदस्ति । यः सारण्यके, ससीमके, सस्थण्डिलके च ग्रामशब्दोऽस्ति तं दृष्ट्वा व्यवह्रियते एकशालो ग्राम इति । तत्र चास्य मुख्य एव व्यवहारः । एवं तर्हि 'वर्णसमुदायः पदम्, पदसमुदाय ऋक्, ऋक्समुदायः सूक्तम्' इत्युच्यते । एकस्मिन्नपि वर्णे एकवर्णं पदम्, एकस्मिन्नपि पदे एकपदा ऋक्, एकस्मिन्नपि सूक्ते एकर्चं सूक्तम् इति व्यवहारो दृश्यते लोके । तथैवेहापि एकाचित्यादिव्यवहारः सिद्ध्यति । परमिदमप्यप्रयोजकम् । अर्थेनात्र मुख्यव्यवहार एव भवति । पदादिभिः अभेदोपचारादर्थोऽभिधीयते । पदादीनां योऽर्थः सोऽन्यपदार्थः । एकः वर्णः यस्य पदस्य (पदबोध्यस्य अर्थस्य) इति यावत् ।

इदमत्र समाधानम् – बहुषु पुत्रेषु सत्सु अयं मे ज्येष्ठः अयं मे मध्यमः अयं मे कनिष्ठः इति व्यवहारः स्वाभाविकः । एकस्मिन्नपि पुत्रे ज्येष्ठत्व-

मध्यमत्व-कनिष्ठत्व-व्यवहारो लोकेऽवलोक्यते। प्रथमरूपताध्यवसायात् प्रथम इति, मध्यमकार्यकरणात् मध्यम इति अन्यो न जनित इति कनीयान् इति व्यपदिश्यते।

किञ्च असूतायामसोष्यमाणायां प्रथमगर्भेण हतेति। या नापि प्रसूता न प्रसोष्यते कुक्षिस्थेनैव गर्भेण हता सा उच्यते प्रथमगर्भेण हता इति। बहुकृत्वो या प्रसूता, या च प्रसोष्यते तत्र तु मुख्यव्यवहारो भवति। स्थिते प्रथमदृष्टान्ते दृष्टान्तान्तरमुक्तम्। तृतीयो दृष्टान्तो भवति अनेत्यानाजिगमिषुराह इदं मे प्रथममागमनमिति। अनेकवारं य आगतः सः स्वीयं भविष्यदागमनं स्मृत्वा इदं मे प्रथममागमनम् इत्याह। अयं च मुख्यव्यवहारः। यस्तु सकृदेवागतः पूर्वमागतः, भविष्यति नागमिष्यति सोऽप्याह इदं मे प्रथममागमनम् इति। अस्मिन्नागमने प्रथमत्वं व्यपदेशिवद्भावसाध्यम्, तच्च लोके प्रसिद्धमिति लोकव्यवहारादेव एकाचित्यादिव्यवहाराः सिद्धाः। यथा लोके वचनं विना निर्वाहः तद्वच्छास्त्रेऽपि विनैव वचनं निर्वाह इति भावः।

इयाय इत्यत्र इण्धातुः एति, इतः, यन्ति, अयनम्, आयकः, अगात्, गमयति इत्येवं प्रयोगभेदात् बहुरूपः। तस्यायमेकाच् अवयव इव इति षष्ठ्यर्थस्य सिद्धत्वात् बहुव्रीहिसङ्गतिः। अथवा अर्थवतो धातोरयं वर्णरूप एकोऽच्। अर्थस्य त्यागोपादानाभ्यां भवति व्यपदेशः। विग्रहावस्थायामर्थस्य त्यागः, वृत्तौ तु ग्रहणम्। अन्यपदार्थः शब्दार्थसमुदायः। वर्तिपदार्थश्च वर्णरूपः इत्याशयः। अथवा शिलापुत्रकस्य शरीरमित्यादाविव षष्ठ्यर्थः समुन्नेयः। अनेकक्रियाविषयस्य अवस्थातुः इदमेकावस्थायुक्तं शरीरम्।

एवमुच्चारणाद्यनेकक्रियाविषयस्य धातोरयमेकावस्थायुक्तः अच् इति षष्ठ्यर्थसिद्धिः ।

इन्द्रो मा वक्षत् इत्यत्र षत्वेऽपि परिहार इत्थमेव वक्तव्यः । सिप् प्रत्ययः ज्योषिषत् इत्यत्र इट्सहितो दृष्टः, अन्यत्र केवलोऽपीति अनेकावस्थायुक्तः, तस्यायमेकावस्थायुक्तः सकार इति सिद्धा व्यवस्था ।

ननु व्यपदेशिवद्भावस्य लोकसिद्धत्वेऽपि आद्यन्तवदेकस्मिन्निति सूत्रं यथाश्रुतमारम्भणीयम् इति चेत्, आद्यन्तवद्भावोऽपि सूत्रं विद्ध्यति, अपूर्वानुत्तरलक्षणत्वादाद्यन्तयोः । अपूर्वलक्षणः आदिः अनुत्तरलक्षणोऽन्तः । यद्यपि बहुषु वर्णेषु अवस्थितेषु आद्यन्तव्यवहारोऽस्ति तथापि एकस्मिन्नपि वर्णे अपूर्वानुत्तरत्वलक्षणं सम्भवतीति सूत्रमिदं नारम्भणीयमिति वार्तिककाराशयः।

भाष्यकारस्तु सत्यन्यस्मिन् अयमादिः, अयमन्त्य इति व्यवहार इति अनपेक्षितपूर्वपरयोः आद्यन्तरूपार्थयोः आद्यन्तशब्दप्रवृत्तिः नास्तीति असहाये कार्यप्रवृत्त्यर्थं सूत्रमारम्भणीयमित्याशेते । यद्यपि लौकिकेन आद्यन्तव्यपदेशः सिद्ध्यति तथापि गौणत्वात् तत्र कार्येण न भवितव्यमिति भ्रान्तिर्यस्य तं प्रत्ययं योगो वक्तव्य इति भाष्यस्य गूढाशयं कैयटो लिलेख । अतः सूत्रमिदं वस्तुतो नारम्भणीयमिति भाष्यवार्तिकयोर्न विरोधः । इति ॥

***************

# मुखनासिकावचनोऽनुनासिकः

**डा. सि. एच्. कृष्णानन्तपद्मनाभम्**

सहायकाचार्यः, व्याकरणविभागः

राजीवगान्धीपरिसरः, शृङ्गेरी

मुखं च नासिका चेति यदि द्वन्द्वः तर्हि प्राण्यवयवत्वेन समाहारे ह्रस्वत्वेन भाव्यम्, मुखनासिकम् इति, तथा च तेन वचन इत्यर्थे मुखनासिकावचन इति रूपासिद्धिः। यदि च अवचन इति विगृह्यते तर्हि अभिमतोऽर्थो न सिध्यति। मुखेन नासिकया च उच्चार्यमाणस्य अनुनासिकसञ्ज्ञेत्यर्थो ह्यत्र विवक्षितः। अयं चार्थः न लभ्यते। तदुक्तं भाष्ये किमिदं मुखनासिकावचनः इति? मुखं च नासिका च मुखनासिकम्, मुखनासिकवचनम् अस्य सोऽयं मुखनासिकावचनः इति तर्हि मुखनासिकवचनः इति प्राप्नोति, निपातनाद्दीर्घत्वं भविष्यति इति च। सौत्रत्वादपि दीर्घत्वं सिध्यतीति वक्तव्ये भाष्यकृता प्रसङ्गेन लौकिकशब्दस्य अस्य साधुत्वमभीवीक्ष्य निपातनाद्दीर्घत्वम् इत्युक्तम्। वाचकान्येव निपातनानि इति पक्षे मुखनासिकवचन इत्यस्य साधुत्वमनेन निपातनेन व्यावर्त्यते। अबाधकानीति पक्षे तु तस्यापि साधुत्वं सिध्यति। अत्र कैयटः अबाधकत्वपक्षे तु भाष्यमेव (मुखनासिकवचनः इति) इत्याह। तत्र तुना स पक्षः वार्तिककृत्सम्मतः इति च सूचितम्। बाधकान्येव निपातनानि इति सर्वादीनि सर्वनामानि इति सूत्रे भाष्ये स्पष्टः। तथा च परमतप्रदर्शनायैव कैयटेन तस्य पक्षस्य उपन्यासः कृत इति भावः। इति निपातनाद्दीर्घत्वम् इति प्रथमः पक्षः।

अथवा मुखनासिकम् आवचनम् अस्य सोऽयं मुखनासिकवचनः इति द्वितीयः पक्ष उपन्यस्तो भाष्ये। ईषद्वचनम् आवचनम्। किञ्चिन्मुखवचनम्, किञ्चन्नासिकावचनम् इति तद्विवरणं भाष्यकृतः अकार्षुः। कश्चन भागो मुखेनोच्चार्यते, कश्चन च भागो नासिकया। अस्मिन् पक्षे मुखनासिकवचनः इत्यपि रूपं सिध्यतीति विशेषः। आङ्रहितपाठेऽपि ईषच्छुक्लोऽपि शुक्ल एव। यो हि ईषद्वोच्यते स उच्यते एव। केचित्तु प्रथमतृतीयचतुर्थपक्षानुरोधेन च आङ्रहिताभ्याम्, मुख-नासिकपदाभ्यां समास एव न भवति अनभिधानात् इत्याहुः। भागस्य मुखाद्युच्चार्यत्वेन मुखनासिकं वचनम् उच्चारणं करणीयं यस्य इत्यर्थे वर्णो मुखनासिकवचनो भवत्येव। किन्वस्मिन्न किञ्चिन्मुखवचनम्, किञ्चिन्नासिकावचनमित्यर्थाविशेषतया मुखनासिकवचन इति प्रयोगो न भवतीत्याशयेन कैयट आह यो हि ईषदुच्यते स उच्यते एवेति। अथवा मुखनासिकम् अवचनम् इति द्वितीयपक्षः। अस्मिन् पक्षे मुखेन नासिकया च वर्ण उत्पद्यमानोऽनुनासिक्यसञ्ज्ञ भवतीति सूत्रार्थः फलति।

मुखद्वितीया वा नासिका वचनमस्य सोऽयम् इति तृतीयः पक्ष उक्तः। द्वितीयशब्दस्य सहायार्थकतया दृष्टत्वेन मुखसहाया नासिका वचनमस्य इत्यर्थः प्रकृतविग्रहे फलति। द्वेस्तीयः इति तीयप्रत्ययः पूरणप्रत्ययः। मुखं द्वितीयं यस्याः इत्यर्थे उभयवचनस्य इत्यर्थः कथं लभ्येत इत्यतः द्वितीयशब्दस्य सहायार्थकस्यात्राश्रयणं कृतम्। तथा च सहायार्थकत्वे द्वितीयशब्दोऽव्युत्पन्न इति भावः। अत्र पक्षे विग्रहस्तु मुखं च तन्नासिका च मुखनासिका, सा वचनमस्येति। यद्यपि शाकपार्थिवादित्वादुत्तरपदलोपोऽपि वक्तुं शक्यस्तथापि तथाविधविग्रहे शब्दनित्यत्वानुपपत्तेः तद्विग्रहो न दर्शितः कैयटेन। एवञ्चास्मिन्

पक्षे नासिका मुखसाहचर्यात् मुखशब्देनोच्यते, विजातीययोरपि एवं विग्रहः कृष्णैतः इत्यादौ दृष्टत्वेन न दोषः। कृष्णश्चासावेतश्चेति तत्र विग्रहः। किन्त्विदं कैयटमतं चिन्त्यम्। भाष्यकृता तदप्रत्याख्यानात्। अयं च तृतीयः पक्षः।

चतुर्थे पक्षे मुखोपसंहिता वा नासिका मुखनासिकेति। अत्र पक्षे उपशब्दप्रयोगसामर्थ्येन मुखस्य नासिकायाश्च अन्तरालं स्थानान्तरमेव अनुनासिकवर्णस्य प्रकृतपक्षे। स्थानभेदकृतभेद एव अस्य पक्षस्य तृतीयपक्षात्। अन्तरालम् इत्यनेन तत्रत्य चर्मपुटकं स्थानमिति लभ्यते। सामीप्यात् मुखं च तन्नासिका चेत्युभाभ्यामपि तदन्तरालं व्यपदिश्यते। पदसंस्कारपक्षे मुखनासिकापदनिरपेक्षं वचनम् इति पदं निष्पाद्यते। सामान्यतो भासमानस्य लिङ्गसर्वनामनपुंसकेन संस्कारात्। पश्चात् स्त्रीत्वस्य सम्बन्धेन प्रतीतावपि बहिरङ्गत्वात् ङीप् प्रत्ययो न भवति। अत एव समानविभक्त्यन्तततया सामान्याधिकरण्यं न भग्नम्। लिङ्गवचनव्यत्यासो न सामानाधिकरण्यभञ्जक इति भावः। यदा स्त्रीत्वाश्रयणेनैव वाक्यसंस्कारपक्ष आश्रीयते, तदा तु नासिकाशब्दसामानाधिकरण्यात् स्त्रीत्वविशिष्टस्यैव तत्र करणत्वेन ल्युटि ङीपि नद्यृतश्च इति सूत्रेण कपि न कपीति ह्रस्वनिषेधे च मुखनासिकावचनीक इति प्रयोगो भवति। अत्र यद्यपि कर्मणि ल्युटि वचनशब्दे निष्पन्ने मुखनासिकेन आवचनः इति वा मुखनासिकया वचन इति अन्तरङ्गत्वात् तत्पुरुषोऽपि वक्तुं शक्यः तथापि कर्मणि ल्युटः सिध्यर्थं बाहुलकत्वाश्रयणे गौरवम् इति कृत्वा न तत्पुरुषसमासः प्रदर्शितो भाष्ये। किन्तु बहुव्रीहिरेव।

 ISSN – 2249-538X

अनुनासिकविषये अनेकमतानि सन्ति। अनुनासिकत्वेन अभिमतस्य पूर्वः परो वा भागो मुखेनोच्चार्यते। भागः नासिकया। तदा नासिकावचनभागानुरागवशात् मुखेनोच्चार्यमाणोऽपि वर्णभागो नासिकया उच्यमान इव लक्ष्यते । यथा सँय्यन्ता इत्यत्र अनुनासिकयकारानुरागवशात् अकारोऽप्यनुनासिक इव प्रतिभाति ।

अन्येषां मते तु मुखनासिकान्तरालं स्थानान्तरमेवानुनासिकवर्णस्येति चतुर्थे उक्तं तत् । सर्वस्यापि वर्णस्य उच्चारणं मुखेन नासिकया च भवति तदा प्रासादवासिन्यायस्य अवसरः। प्रकृते अतथात्वेन नायं प्रासादवासिन्यायस्य अवसरः। किन्तु सर्वोऽपि वर्णः (सम्पूर्णः) मुखेन नासिकया उच्यते तदा प्रासादवासिन्यायः प्रवर्तते इति कृत्वा नात्र तन्न्यायप्रवृत्तिः।

अत्र सूत्रे मुखग्रहणाभावे नासिकावचनोऽनुनासिकः इति स्यात्। तदा यमानुस्वाराणामेवानुनासिकसञ्ज्ञा स्यात्। न तु अकारादीनाम्। तथा च विधिप्रदेशेषु यमानुस्वारा एवादेशाः स्युः। विड्वनोरनुनासिकस्यात् इत्यादावनुनासिकवर्णस्य सम्भवाभावेनाप्रतिपत्तिः स्यात्। यमो नाम सर्ववर्गपञ्चमे वर्णे परे प्रथमवर्गीयाः ये चतुष्टये वर्णाः कखगघ इति रूपाः तेष्वन्यतमः न तु प्रतिवर्गीयचतुर्वर्णसदृशः। अतः एव सूर्य आत्क्मा, पत्क्न्या, पात्क्नीवत्प्यश्च मे तकारोत्तरमपि मध्ये ककारसदृशवर्णलेख उपपद्यते। इष्यते तेषां तथोच्चारणं लोकेऽपि। अत एव यज्ञ इत्यादौ गकारसदृशश्रुतिः केषाञ्चन।

नासिकाग्रहणाभावे मुखवचनोऽनुनासिक इत्युच्यमाने कचटतपानामेव स्यात्। तथा च पक्कम् इत्यादौ चकारादेः लोपः स्यात्।

ओदनपक् इत्यादौ अनुनासिकस्य क्विझलोः क्ङिति इति दीर्घप्रसङ्गः स्यात्। नासिकाग्रहणे क्रियमाणे न दोषः।

मुखग्रहणं प्रत्याख्यातं भाष्ये प्रासादवासिन्यायेन। उभयवचनानां प्रासादवासिन्यायेन सिद्धेः। केचित्प्रासादवासिनो भवन्ति, केचिद् भूमिवासिनः। ये प्रासादे वसन्ति ते प्रासादवासिग्रहणेन गृह्यन्ते। ये भूमौ वसन्ति ते भूमिवासित्वेन गृह्यन्ते। ये च उभयवासिनस्ते प्रासादवासित्वेन, भूमिवासित्वेन च गृह्यन्ते। एवञ्च ये उभयवचनाः ते मुखनासिकाग्रहणेन गृह्यन्ते।

***************

 ISSN – 2249-538X

# सम्प्रदानविचारः

**डा. प्रमोद भट्टः**

अतिथ्युपन्यासकः, व्याकरणविभागः

राजीवगान्धीपरिसरः, शृङ्गेरी

(लेखसारः - कर्मणा यमभिप्रैति स सम्प्रदानम् सूत्रमिदं पञ्चपदात्मकम् उत सप्तपदात्मकम्, अध्याहरेणैव यत्तच्छब्दयोः लाभात् सूत्रे यत्तच्छब्दग्रहणं न कर्तव्यम्, अभिप्रेत्युपसर्गद्वयबलात् असन्निहितस्यापि विप्रादेः सम्प्रदानसञ्ज्ञालाभः, न्यायसुधाकाराणां मतोपपादनम्, नागेशमते सम्प्रदानलक्षणं समन्वयश्च, वैयाकरणैकदेशिमतखण्डनम्, रजकारवस्त्रं ददातो इति प्रयोगः न भवतीति हरदत्तमतोपपादनम्, "खण्डिकोपाध्यायः शिष्याय चपेटां ददाति" इत्यादौ शाब्दबोधः, इदञ्च संप्रदानम् अनिराकरणात्कर्तुः इत्यादिना त्रिविधम् इत्येते विचाराः यथामति यथाशक्ति लेखेऽस्मिन् विव्रियते)

कर्मणा यमभिप्रैति स सम्प्रदानम् – अष्टाध्याय्यां सूत्रमिदं प्रथमाध्यायस्य चतुर्थपादे कारके इति अधिकारे वर्तते । कर्मणा यम् अभि प्र एति सः सम्प्रदानम् इति सप्तपदात्मकं सूत्रम् । अत्र प्रमाणं "कुगतिप्रादयः" इति सूत्रे वार्तिकं "उदात्तवता गतिमता च तिङा गतेः समासवचनम्" इति । 'देवो देवान् क्रतुना पर्यभूषत्' 'यस्मानृ ऋते विजयन्ते जनासो' इत्यादीन्युदाहरणानि । अत्र सर्वत्र "यद्वृत्तानित्यम्" इति निपातप्रतिषेधात्

तिङन्तमुदात्तवत् । ततश्च अयमभिप्रैतीव्यत्रापि समासे सति प्रातिपदिकत्वात् विभक्त्युत्पत्तिः स्यात् इति वार्तिकमिदं छन्दोमात्रविषयमिति हरदत्तः । छन्दोवत्सूत्रणि भवन्ति इति मतमाश्रित्य भवत्येवात्र समासः इति पञ्चोलिनः । भाषाविषयत्वे तु 'यत् प्रकुरुते' इत्यादौ समासत्वात् सोः उत्पत्तिः स्यात् । लिङ्गसर्वनामनपुंसकतामभ्युपेत्य "स्वमोर्नपुंसकात्" इति लुकि कृतेऽपि "ह्रस्वो नपुंसके प्रातिपदिकस्य" इति ह्रस्वः स्यात् । 'यत् प्रकुवीरन' इत्यत्र तु नलोपः स्यात्, तस्मात् उक्तवार्तिकस्य छन्दोविषयत्वं न्याय्यमेव ।

नन् अध्याहारेणापि सर्वनामद्वयार्थस्य लाभात् कर्मणा यमभिप्रैति स सम्प्रदानमिति सूत्रे यं स इत्यनयोः ग्रहणं व्यर्थं खलु इति चेत् अत्राह अभिप्रयतः कर्तुः सम्प्रदानत्ववारणाय यं स ग्रहणम् इति । तथाहि- अभिप्रैतीति कर्तृतिङ्क्त्या यः सः इत्येव लभ्यते । तथा च तदर्थ सम्भन्धेनैव निराकांक्षतया यं सः इत्याध्याहारो नोपपद्यते । तथा च कर्मणा यः अभिप्रैति सः सम्प्रदानम् इति सूत्रार्थलाभात् कर्तुः एव सम्प्रदानत्वापत्तिः । कर्तृसंज्ञा तु अकर्मकधातुस्थले सावकाशा स्यात् । ततश्च उपाध्यायाय शिष्येण गौः दीयते इत्यर्थे शिष्याय उपाध्यायस्य गौः दीयते इति प्रयोगापत्तिः दोषः । अतः सूत्रे यं स ग्रहणम् । तेन अभिप्रतुः कर्तुः सम्प्रदानत्वं वार्यते ।

ननु सूत्रे उपसर्गद्वयमनर्थकं तदभावेऽपि कर्मणा यमेति = गच्चति प्राप्नोति सम्बध्नाति इत्यर्थः लभ्यत एव । अभिप्रैतीत्युक्तेऽपि स एवार्थः खलु इति चेत् सन्निहितसम्प्रदानस्थले दानस्य तत्काले विप्रसन्तोषरुपहृष्टफलत्वात् तत्रैव सम्प्रदानत्वं स्यात् ; असन्निहितसम्प्रदानस्थले विप्राय ददातीति न स्यात्। अतः सूत्रे उपसर्गद्वयग्रहणम् । सूत्रे अभिः आभिमुख्ये वर्तते । प्रशब्दः

आदिकर्मणि । तथा च कर्मणा करणभूतेन कर्ता क्रियारम्भे यमुद्दिशति सः सम्प्रदनमिति सूत्रार्थः लभ्यते । स च उद्देशः सन्निहितेऽसन्निहिते च सर्वत्रास्तीति विप्राय गां ददाति, विप्राय गामदात्, विप्रय गां दास्यतीत्यदिप्रयोगोपपत्तिः । त्यज्यमानद्रव्योद्देश्यत्वे सति स्वीकारवत्वं सम्प्रदानत्वम् इति न्यायसुधाकरादयः । स्वीकारश्च यथेष्टविनियोगयोग्यता उपधायकः प्रतिग्रहः। विप्राय गां ददाति इत्यत्र त्यज्यमानद्रव्योद्देश्यत्वं कर्तुः विप्रे वर्तते । यथेष्टविनियोगयोग्यता उपाधायकप्रतिग्रहत्वं विप्रे इति लक्षणसमन्वयः। उद्देश्यत्वस्वीकारौ च गवा विप्रस्य सम्बन्धः। उद्देश्यत्वं नाम त्यागकालीनचतुर्थ्यन्तपदोच्चारणजन्यज्ञानविषयत्वम् ।

नामगोत्रे समुच्चार्य सम्यक् ग्रद्धान्वितो वदेत् ।
सङ्कीर्त्य देशकालादि तुभ्यं सम्प्रददे इति ॥
न ममेति स्वस्वतायाः निवृत्तिमपि कीर्तयेत् ।
दान होमादिकं कुर्यादेवं ग्रद्धासमन्वितः ॥

इति अत्र धर्मशास्त्रोक्तशिष्टाचारः हेमाद्रिधृतवृद्धवसिष्ठवचनमेव प्रमाणम् ।

इयं कारकविभक्तिः भवति । कारकचतुर्थ्याः सम्प्रदानत्वशक्तिमान् अर्थः। सा शक्तिश्च तत्तद्धात्वर्थकर्मनिष्ठफलनिरूपकत्वेन इच्छाविषये यः तन्निष्ठा । विप्राय गां ददाति इत्युदाहरणम् । अत्र लक्षणसमन्वयः तत्तद्धात्वर्थसबन्धि यत्कर्म गवादि, तन्निष्ठ यत्फलं स्वत्वदि तन्निरूपकत्वेन यः इच्छाविषयः गोनिष्ठस्वत्वनिरूपको भवतु इति दातुः इच्छाविषयः यः ब्राह्मणादिः तस्य सम्प्रदानम् इति ।

वैयकरणैकदेशिमतम्- द्धात्वर्थकर्मसम्बन्धजन्यफलं गोलाभकृतसुखादि-तद्भागित्वे य इच्छाविषयः सः सम्प्रदानमिति प्राचीनवैयकरणाः मन्यन्ते। यथा हि विप्राय गां ददाति इत्यत्र दानक्रियाकर्मकारणेण गोद्रव्येण स्वत्वाख्यः विप्रस्य सम्बन्धः तज्जन्यं यत्फलं गोलाभादिकृतपयःपानादिसुखं तद्भागित्वरूपेणेच्छाविषयत्वं विप्रे इति लक्षणसमन्वयः।

अयमाशयः कर्मत्वस्य क्रियानिरूपित्वात् कारके इत्यधिकाराच्च तत्क्रियाकर्मणा करणभूतेन तत्क्रियाजन्यफलभागित्वेन यमभिप्रैति सः सम्प्रदानमिति सूत्रार्थः। कर्मसम्बन्धजन्यं फलं च गोलाभजन्यं विप्रसुखादि। तच्च समभिव्याहारबलात् तात्पर्यतश्च विशेषरूपेण भासते। कर्मसम्बन्धजन्यं फलभागित्वेन उद्देश्यः चतुर्थ्यर्थः । एवञ्च विप्रभिन्नो यः गोसम्बन्धजन्यसुखाश्रयत्वेन उद्देश्यः तन्निरूपितगोवृत्तिस्वत्वोत्पत्ति-स्वस्वत्वनिवृत्त्युभयानुकूलो व्यापारः इति बोधः । एवञ्च कर्मणा इत्यस्य चारितार्थ्यं स्पष्टमेवेति । इदमेव मतं भाट्ट्रहस्येऽपि वैयकरणनव्यास्तु इत्यादिना खण्डितम्। एवञ्च तद्धात्वर्थ इत्याद्युपर्युक्तं यत् तत् अत्र नागेशानापि खण्ड्यते । तथा हि सूत्राक्षरैः वाच्यवृत्त्या उक्तार्थालाभात् तथा शाब्दबोधाभावाच्च इत्यनेन । नागेशस्य अयमाशयः सूत्रे सम्प्रदानशब्दस्यावयवार्थबाधेन शक्त्यन्तरकल्पने प्रकृतार्थसिद्धिः। परन्तु तन्न युक्तम्। लक्षणया प्रकृतार्थसिद्धिः इति चेत् शाब्दबोधः न सङ्गच्छते। अपि च चैत्रः ग्रामं गच्छति इत्यत्र चैत्रस्य गमनक्रियाकारक-ग्रामसंयोगजन्यसुखभागित्वेन सम्प्रदानत्वापत्तिः स्यात् । तत्तु नेष्टं, ग्रामं गच्छति चैत्राय इति प्रयोगापत्तिश्च स्यात्। तदपि नेष्टम्।


ISSN – 2249-538X

सम्प्रदानमिति महती संज्ञाकरणम् अन्वर्थसंज्ञार्थम् । तेन सम्यक् प्रदीयते अस्मै तत् सम्प्रदानमिति फलति । दानक्रियाकर्मणा कर्ता यमभिप्रैति सम्बध्नाति ईप्सति वा तत् कारकं सम्प्रदानसंज्ञकं भवतीत्यर्थः । तेन अजां नयति ग्रामं, हस्तं निदधाति वृक्षे इत्यादौ न सम्प्रदानता । अत्र दानञ्च स्वस्वत्वध्वंसपूर्वकपरस्वत्वोत्पत्त्यनुकूलव्यापाररूपम् । दानं च नाम किञ्चित् उद्दिश्यापुनर्ग्रहणाय स्वद्रव्यत्यागः । यथा 'देवेभ्यः सुमनसः ददात' इति न्यासपदमञ्चरीकाराणां मतम् । एवं च स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनं " रजकस्य वस्त्रं ददाति " इत्यत्र रजके नास्ति इति कृत्वा सम्प्रदानं न भवति किन्तु शेषत्वविवक्षयां षष्ठी एव इति । एवं च वृत्तिकृन्मते रजकाय वस्त्रं ददाति इति प्रयोगः नास्त्येव ।

किन्तु 'रजकाय वस्त्रं ददाति' इत्यत्रापि सम्प्रदानसंज्ञा भवत्येव । दा धात्वर्थः अत्र भाक्तः अर्थात् लाक्षणिकार्थ प्रतिपादकः इत्यर्थः । भक्तिः लक्षणा तत् प्रयोज्यः भाक्तः । भाष्यमते तु अन्वर्थसंज्ञायां नाग्रहः । महासंज्ञाकरणन्तु प्राचामनुरोधेन । खण्डिकोपाध्यायः ( कृद्धाध्यापकः, बालकानां अध्यापकः, अथर्ववेदशाखाध्यापकः वा ) शिष्याय चपेटां ददाति । प्रसृतकरतलं चपेटा । दुःखं फलम् । ददातिरत्र संयोगविशेषानुकूलव्यापारार्थकः । तथा च चपेटासंयोगजन्यदुःखाश्रयः शिष्यः भवतु इति इच्छया दुःखरूपफलाश्रयत्वेन शिष्यस्य संप्रदानत्वम् । रजकाय वस्त्रं ददाति इत्यत्र दा धातोः आधीनीकरणमर्थः । आधीनीकरणत्वञ्च अत्र मलनाशानुकूलं स्थापनम् । तथा च वस्त्रनिष्ठमलनाशरूपफलसम्बन्धेन भृतिमान् रजको भवतु इति इच्छया भृतिरूपफलाश्रयत्वेन रजकस्य सम्प्रदानत्वम् । विप्राय गां ददाति

इत्यत्र विप्रस्य शेषित्वम्। गोश्च शेषत्वम्। शेषित्वं नाम धात्वर्थक्रियायाः यत्कर्म तद्वृत्तिमत् धात्वर्थफलं तत्सम्बन्धजन्यफलाश्रयत्वकेच्छाविशेष्यत्वम् । समन्वयश्च दानकर्मगोवृत्ति-तादृशस्वत्वसम्बन्धजन्यसुखाश्रयो विप्रः भवतु इत्याकारिका या इच्छा तादृशेच्छाविशेष्यत्वरूपं शेषित्वं विप्रस्य । तादृशेच्छाप्रकारताश्रयत्वरूपं शेषत्वं गवि।

सम्प्रदानञ्च त्रिविधम्:

**अनिराकरणात्कर्तुः त्यागाङ्गं कर्मणेप्सितम्।**

**प्रेरणानुमतिभ्याञ्च लभते सम्प्रदानताम्॥**

अनिराकर्तृ, प्रेरयितृ, अनुमन्तृ इति त्रयः भेदाः । सूर्याय अर्घ्यं ददाति इति आद्यम्। अत्र सूर्यः अर्घ्यं ददातु इति न प्रार्थयते, नानुमन्यते, न निराकरोति। प्रेरकं यथा विप्राय गां ददाति इति। विप्रेण “ मह्यं गां देहि “ इति पूर्वं प्रार्थितः राजा तस्मै गां ददाति। अत्र पूर्वव्यापारप्रेरकत्वं विप्रे। उपाध्यायाय गां ददाति इति तृतीयम्। उद्देश्यश्चतुर्थ्यर्थः।

****************

 ISSN – 2249-538X

# कर्मवत् कर्मणा तुल्यक्रियः

**एल्. सविता आर्या**

अतिथ्यध्यापिका, व्याकरणविभागः

राजीवगान्धीपरिसरः, शृङ्गेरी

**कर्मवत् कर्मणा तुल्यक्रियः**[1] इति पाणिनीये तृतीयप्रथमे अतिदेशसूत्रम् । कर्मणा तुल्यं कर्मवत् इति तद्धितान्तमव्ययम् । **तेन तुल्यं क्रिया चेद्वतिः**[2] इति वतिः । कर्मशब्दोऽयं न कारकवचनः । कारकं हि द्रव्यम् । न च कर्मभूतकारकस्य क्रियया सादृश्यमुपपद्यते, अत्यन्तभेदात् । तस्मात् कर्मशब्दोऽयं गौणः कर्मस्थक्रियावाची, तात्स्थ्यादुपचारेण कर्मस्थायां क्रियायां वर्तते । यथा 'मञ्चाः क्रोशन्ति' इत्यत्र मञ्चशब्दः मञ्चस्थपुरुषेषु वर्तते । तुल्या क्रिया यस्य स तुल्यक्रियः कर्ता । केन तुल्यक्रियः ? कर्मणा । तुल्यशब्दोऽयं सदृशवचनः ।

वत्करणं किमर्थं ? यथा अब्रह्मदत्ते प्रयुज्यमानो ब्रह्मदत्तशब्दः ब्रह्मदत्तवदित्यर्थं सहसा बोधयति तथा कर्म इत्युच्यमानेऽपि कर्मवद् इत्यर्थलाभात् । सत्यम् । कर्मणा तुल्यक्रियः कर्ता, कर्म इति एतावन्मात्रोच्यमाने वत्करणाभावे तु कर्मसंज्ञको भवति इत्यर्थशङ्का स्यात् । अतः कर्मवदिति अतिदेशाश्रयणम् । कार्यातिदेशोऽयम् । एवञ्च कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवत् स्यादिति प्रकृतसूत्रार्थः । यस्मिन् कर्मणि

---

[1] अष्टाध्यायीसूत्रक्रमसंख्या ३॥१॥८७

[2] अष्टाध्यायीसूत्रक्रमसंख्या ५॥१॥११४

कर्तृभूतेऽपि कर्त्रवस्थां प्रतिपन्नेऽपि क्रिया तद्वल्लक्ष्यते यादृशी कर्मणि कर्मावस्थायाम्, स कर्ता (कर्मकर्ता) कर्मवद् भवतीति तात्पर्यार्थः।

सादृश्यञ्च किञ्चिद् भेदाधिष्ठानमिति। ननु यः व्यापारः कर्मावस्थायां स एव कर्त्रवस्थायामपि इति सादृश्यं नोपपद्यते। तस्य भेदाधिष्ठाने सति सत्त्वात्। नैष दोषः, अवस्थाभेदेन क्रियाभेदोऽस्ति। कर्तुरवस्था हि अन्या, अन्या च कर्मावस्था। अवस्थाभेदेन क्रियाभेद इति तदधिष्ठानं सादृश्यं भवति। वस्तुतस्तु सा एव क्रिया कर्तरि विवक्षिता या कर्मावस्थायां पूर्वदृष्टा न तु तत्तुल्या। तुल्यत्वं इति वचनं त्वत्र औपाधिकमेव।

तदित्थमुक्ता कर्मवद्भावव्यवस्था हरिणा –

**विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता।**

**क्रियाव्यवस्थात्वन्येषां शब्दैरेव प्रकल्पिता ॥इति॥**

अयं भावः- यत्र कर्मणि क्रियाकृतविशेषदर्शनं तत्र सा क्रिया व्यवस्थिता, कर्मस्थक्रियत्वमित्यर्थः। तेन कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवद् भवतीति सूत्रार्थः संगच्छते। 'देवदत्तः तण्डुलं पचति, चैत्रः काष्ठं भिनत्ति' इत्यादौ विक्लित्यादिफलाश्रये तण्डुले काष्ठे वा पक्वापक्वतण्डुलेषु छिन्नाच्छिन्नकाष्ठेषु च क्रियाकृतविशेषः प्रत्यक्षं गम्यते। तस्माद् अत्र वाक्ये कर्मणि क्रियाव्यवस्थिता, कर्मस्थक्रियकत्वाच्च कर्मवद्भावः सिध्यति। पच्यते ओदनः स्वयमेव। भिद्यते काष्ठं स्वयमेवेति कर्मवद्भावप्रयोगः। आत्मनेपदम्, यक्, चिण्, चिण्वद्भावश्च अस्य फलम्।

'ग्रामं गच्छति, घटं पश्यति' अत्र गमिदृश्यादिषु तु नैवं दृश्यते। न हि गतागते ग्रामे दृष्टादृष्टे घटे वा क्रियाकृतविशेषोऽस्ति प्रत्यक्षगम्यः। तस्मात्

 ISSN – 2249-538X

पच्यते ओदनः स्वयमेव, भिद्यते काष्ठं स्वयमेव इतिवत् गम्यते ग्रामः स्वयमेव इति गमिदृश्यादिषु कर्मवद्भावप्रयोगः नोपपद्यते, कर्मणि क्रियाकृतविशेष-दर्शनाभावात्, कर्मस्थक्रियकत्वाभावाच्च । उक्तञ्चैतत् कौण्डभट्टेन धात्वर्थप्रकरणे भूषणसारे –

**निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते ।**

**न तु प्राप्ये कर्मणीति सिद्धान्तो हि व्यवस्थितः[1] ॥**

उत्सर्गतः कर्म द्विविधम् ईप्सितम् अनीप्सितञ्च । तत्र ईप्सितं कर्म त्रिविधम्- निर्वर्त्यम् , विकार्यम् , प्राप्यञ्च । तत्र आद्ययोः कर्मवद्भावः, नान्त्ये । प्राप्यत्वञ्च क्रियाकृतविशेष-अनुपलभ्यमानत्वम् इति सुबर्थनिर्णये उच्यते-

**क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते ।**

**दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते ॥**

तदयमत्रानुगमः- निर्वर्त्ये स्वरूपलाभ एव क्रियाकृतो विशेषः 'घटं करोती'ति । विकार्ये विकाररूपपरिणतिरेव क्रियाकृतो विशेषः 'सुवर्णं कुण्डलं करोति, काष्ठं भस्म करोतीति' । एतद् रहितं प्राप्यमिति । घटं पश्यति, ग्रामं गच्छति इत्यत्र न ह्ययं घटः केनचिद् दृष्टः, ग्रामोऽयं केनचिद् गतः इति कर्मदर्शनेन अवगन्तुं शक्यम् । अतः प्राप्ये कर्मणि क्रियाकृतविशेषदर्शनाभावात् कर्मस्थक्रियकत्वा- भावाच्च न कर्मवद्भावः।

ज्ञानार्थकधातूनां विषयेऽपि 'घटं जानाति' इत्यत्र ज्ञाधात्वर्थः- आवरणभङ्गो विषयता वा फलम् , व्यापारस्तु ज्ञानमेव इत्याह दीक्षितः । ज्ञाने विषयः घटः, विषयता घटनिष्ठा । घटनिष्ठा या विषयता तदेव ज्ञाधात्वर्थफलम्

[1] भूषणसारे कारिकासंख्या ७

इति । अथवा- आवरणभङ्ग इति, यावता घटविषयकं ज्ञानं नास्ति तावता घटविषयक-अज्ञानावरणं वर्तते । यदा मनः तत्तदिन्द्रियद्वारा तत्तद्विषये गत्वा तदाकाराकारितं भवति तदा तत्रैव विषये घटविषयक-अज्ञानरूप-आवरणस्य भङ्गः, तदेव फलमिति । एवञ्च जानाति इत्यत्रापि क्रियाकृतविशेषः कर्मणि न दृश्यते क्वचिदतः अत्रापि कर्मवद्भावव्यवस्था नैव प्रकल्पिता । ज्ञायते घटः इति प्रयोगापत्तिरपि नास्ति ।

नागेशस्तु- जानातेर्विषयतया ज्ञानं फलम् । आत्ममनःसंयोगो व्यापारः । अतयेव 'मनो जानाति' इत्याद्युपपद्यते । व्यापाराश्रयः कर्ता इत्यस्मात् मनसः कर्तृत्वमुपपन्नम् । आत्मा अत्र अन्तःकरणम् , मनोऽपि तद्वृत्तिविशेषरूपम् । 'आत्मा आत्मानं जानाति' इत्यादौ अन्तःकरणावच्छिन्नः कर्ता, शरीरावच्छिन्नं कर्म इति कर्मवत्सूत्रे भाष्ये स्पष्टम् ।

किञ्च "विशेषदर्शनं यत्र क्रिया...." इति कारिकायां 'यत्र' इति सर्वनामपदस्य यत्र=कर्मणि क्रियाकृतविशेषः इत्येव अर्थः स्वीकार्यः इत्यत्र नास्ति किञ्चिन्नियामकम् । अतः यत्र इति सर्वनामपदस्य विवरणं 'कर्मणि कर्तरि वा' इति स्वीकार्यः । यथा कर्मणि क्रियाकृतविशेषः गम्यते तद्वत् पच्यादिकर्तर्यपि श्रमादिरूप-क्रियाकृत-विशेषस्य दर्शनात् यत्र कर्मणि कर्तरि वा क्रियाकृतविशेषः कश्चिद् दृश्यते तत्र क्रिया व्यवस्थिता इत्येवम् अर्थः उच्यते। अयं भावः – यत्र कर्मणि क्रियाकृतो विशेषस्तत्र कर्मस्थक्रियत्वम् । यत्र च कर्तरि क्रियाकृतो विशेषस्तत्र कर्तृस्थक्रियत्वमिति विवेकः । एवञ्च यत्र कर्मणि कर्तरि वा क्रियाकृतो विशेषः कश्चिद् दृश्यते तत्र क्रिया व्यवस्थिता

 ISSN – 2249-538X

इत्युच्यते । नन्वेवं पच्यादिकर्तर्यपि श्रमादिरूपक्रियाकृत-विशेषदर्शनात् कर्तृस्थक्रियकत्वापत्तिरूप दोषः स्यात्।

किञ्च 'चिन्तयति, पश्यति' इत्यादीनां कर्तृस्थभावकत्वानुपपत्तिश्च स्यात् । कर्तरि क्रियाकृतविशेषदर्शनाभावात् । अत आह – अन्येषामिति । विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता , इयं क्रियाव्यवस्था तु अन्येषां मते गन्तव्या । पुनरपि अन्येषामित्यस्य आवृत्त्या सिद्धान्तपक्षे तु शब्दैरेव प्रकल्पिता इत्येवमन्वयः बोध्यः । अयं भावः- **यत्र कर्तृकर्मसाधारणरूपं फलं शब्देन (धातुना) प्रतिपाद्यते, स≍कर्तृस्थभावकः,** यथा- 'पश्यति घटम् , ग्रामं गच्छति' इत्यादौ । 'पश्यति घटम्' इत्यत्र ज्ञानं समवायेन आत्मनिष्ठं कर्तृनिष्ठम् । विषयतया ज्ञानं फलम् इति वचनात् ज्ञानं विषयता सम्बन्धेन घटनिष्ठं कर्मनिष्ठम् । एवञ्च विषयतासमवायाभ्यां ज्ञानम् उभयनिष्ठम् । पश्यति घटम् इति वाक्ये कर्तृकर्मसाधारणरूपं फलं दृशिक्रियया प्रतिपाद्यते । अतः कर्तृस्थभावकत्वम् अस्य सिद्धम् ।

'ग्रामं गच्छति' इत्यत्र च उत्तरदेशसंयोगानुकूलो व्यापारः गम्-धात्वर्थः। उत्तरदेशसंयोग≍फलम् । संयोगः उभयनिष्ठः। संयोगरूपं फलं यथा ग्रामनिष्ठस्तथा देवदत्तनिष्ठोऽपि । एवञ्च उभयनिष्ठत्वात् संयोगस्य कर्तृकर्मसाधारणरूपं फलं गम्-धातुना प्रतिपाद्यते । अतः अस्यापि क्रियायाः कर्तृस्थभावकत्वम् एव । कर्तृस्थभावकत्वे तु न कर्मवद्भावः । एवञ्च यत्र इति सर्वनामपदस्य कर्तरि कर्मणि वा इति विवरणं स्वीकृते पच्यादिकर्तर्यपि श्रमादिरूपक्रियाकृतविशेषदर्शनात् कर्मवद्भावरूप-दोषापत्तिस्तु न, कर्तृकर्मसाधारणरूपं फलम् अत्र शब्देन (धातुना) प्रतिपाद्यमानत्वाभावात् ।

किञ्च आवरणभङ्गः विषयता वा फलम् इति दीक्षितोक्तवचने तु विषयता कर्मनिष्ठा, आवरणभङ्गोऽपि, यदा मनः तत्तदिन्द्रियद्वारा तत्तद्-विषयं गत्वा तदाकाराकारितं भवति तदा तत्रैव विषये घटविषयक-अज्ञानरूप-आवरणस्य भङ्गः, तदेव फलम् इति। एवञ्च आवरणभङ्गोऽपि कर्मनिष्ठः। तस्य कर्तृनिष्ठत्वाभावात् कर्तृकर्मसाधारणरूपं फलम् अत्र न प्रतिपाद्यते । कर्तृकर्मसाधारणरूपफलत्वाभावात् ज्ञानार्थकधातूनां न कर्तृस्थक्रियत्वम् । कर्मस्थक्रियकत्वम् आपद्यते।

**यत्र कर्त्रवृत्ति-कर्मस्थफलं स≍कर्मस्थभावकः**। यथा भिनत्तीत्यादौ। द्वैधीभवनानुकूलो व्यापारः भिद्-धात्वर्थः । न हि द्विधाभवनादिः कथमपि कर्तृनिष्ठं भवति। सर्वदा कर्त्रवृत्ति-कर्मस्थफलत्वात् कर्मस्थभावकत्वम्। तथा च आवरणभङ्गस्य विषयतायाश्च कर्ममात्रनिष्ठत्वात् जानाति इत्यादिज्ञानार्थकधातूनामपि कर्मस्थक्रियकत्वापत्तिरूपदोषः वारयितुं अशक्यः। कर्मस्थक्रियकत्वाच्च घटं जानाति इत्यादिस्थले कर्मवद्भावप्रसङ्गः। ज्ञायते घटः इति प्रयोगस्तु नेष्टः। तस्मात् आवरणभङ्गो विषयता वा फलम् इति दीक्षितोक्तपक्षे ज्ञानार्थकधातूनां कर्मवद्भावप्रसक्तिरूपदोषस्य यथाव-स्थितत्वात् सः पक्षः त्याज्य एव इत्याग्रहः नागेशस्य । वस्तुतस्तु कर्मवद्भावव्यवस्थितकारिकायां 'यत्र' इति सर्वनामपदस्य 'कर्मणि' इतिमात्रविवरणस्वीकारे उभयपक्षेऽपि न कश्चिद् दोषः, उभयोरपि पक्षयोः साधुत्वं स्यादेव॥ इति ओम् शम्॥

 ISSN – 2249-538X

**सन्दर्भग्रन्थसूची –**

पाणिनीय-अष्टाध्यायीसूत्रपाठः

वाक्यपदीयम्

काशिका

वैयाकरणभूषणसारः

परमलघुमञ्जूषा

महाभाष्यम्

****************

# उपमानम्

**आचार्यः सुब्राय वि. भट्टः**

मीमांसाविभागाध्यक्षः

राजीवगान्धीपरिसरः, शृङ्गेरी

धर्माधर्मविवेचनार्थं प्रवृत्तमिदं मीमांसाशास्त्रम् । 'मानाधीना मेयसिद्धि'रिति न्यायेन धर्मरूपप्रमेयसिद्धये प्रथमतः प्रमाणानि निरूपितानि । तानि च धर्मप्रमाणानि बहुधा प्रपञ्चितानि मीमांसकैः तत्र तत्र प्रकरणादौ । यथा – विनियोगविधिसहकारिभूतानि अथवा अङ्गताग्राहकप्रमाणानि 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्या'ख्यानि षट्प्रमाणानि । क्रमबोधकानि 'श्रुत्यर्थपाठस्थानमुख्यप्रवृत्त्या'ख्यानि । शब्दान्तरादीनि कर्मभेदबोधकानि । एवमेव प्रत्यक्षादीनि प्रमेयसाधकानि षट्प्रमाणानि अङ्गीचक्रुः मीमांसकाः । तानि च प्रत्यक्षम्, अनुमानम्, शब्दः, उपमानम्, अर्थापत्तिः, अनुपलब्धिश्चेति । यद्यप्यत्र प्रत्यक्षलक्षणं सूत्रकारैः प्रत्यक्षसूत्रे कण्ठत उक्तम् । अनुमानादीनां स्वरूपं तत्र तत्र अधिकरणेषु सूत्रे प्रदर्शितमिति भाष्यकाराः शबरस्वामिनः भाष्ये अनुमानादीनां लक्षणानि स्पष्टीचक्रुः । तत्र च प्रत्यक्षसूत्रभाष्ये प्रत्यक्षलक्षणं सूत्रोक्तं विमृश्य, ततः पञ्चमे औत्पत्तिकसूत्रे वृत्तिकारमतोपवर्णनसमये 'वृत्तिकारस्तु' इत्यादिना वृत्तिकारमतमुपवर्णितम् । तदा क्रमप्राप्तस्यानुमानस्य लक्षणमुक्त्वा शब्दलक्षणं चोक्त्वा उपमानं निरूपितम् । तत्र च 'शास्त्रं शब्दविज्ञानादसन्निकृष्टार्थे विज्ञानम्' इति शब्दप्रमाणस्य शास्त्रमिति पदेन निर्देशः कृतः ।

 ISSN – 2249-538X

ततश्च उपमानलक्षणमेवमुक्तम् – ‘उपमानमपि सादृश्यम् असन्निकृष्टेऽर्थे बुद्धिमुत्पादयति । यथा गवयदर्शनं गोस्मरणस्य’ इति । वने कस्यचित् प्राणिविशेषस्य दर्शनात् नगरे प्रत्यक्षदृष्टायाः गोः स्मरणात् ‘एतत्सदृशी मदीया गौः’ इति यज्ज्ञानं जायते तदुपमानमित्यर्थः । तत्र च गवयनिष्ठं गोसादृश्यदर्शनं करणम् । गोगतं गवयसादृश्यज्ञानं फलम् । या नगरे दृष्टा गौः सा अनेन सदृशी इति । सैव च उपमितिरित्युच्यते । तत्करणं च गवयदर्शनं उपमानमिति । तदुक्तम् –

**‘दृश्यमानार्थसादृश्यात् स्मर्यमाणार्थगोचरम् ।**
**असन्निकृष्टसादृश्यज्ञानं ह्युपमितिर्मता ॥’**

इति (श्लो. वा. उ. प्र.)

उपमानविषये मीमांसकानां नैयायिकानां च कश्चन मतभेदः वर्तते ।

‘प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्’ इति न्यायसूत्रम् । ‘कीदृशो गवय’ इति नागरिकेण पृष्टो वन्यः प्रसिद्धेन गवा साधर्म्यात् अप्रसिद्धं गवयं येन वाक्येन बोधयति यथा – गोसदृशो गवय इति तद्वाक्यमुपमानम् इति ।

कश्चन पुरुषः नगरे गां दृष्टवान् । ततश्च गोसदृशो गवय इति वनेचरात् श्रुतवान् । श्रुतातिदेशवाक्यः सः पुरुषः कदाचित् वनं गतः । तत्र गोसदृशं प्राणिविशेषं पश्यन् – ‘अयं स गवय’ इति जानाति । तस्य गोसादृश्य-विशिष्टगवयज्ञानं यज्ज्ञायते तदुपमितिरिति ।

‘गोसादृश्योपलक्षितस्य प्राणिविशेषस्य गवय इति पदं संज्ञा’ इति अतिदेशवाक्यार्थः । तद्यावत् गोसदृशं प्राणिविशेषं न पश्यति तावत् वाक्यप्रतिपादितमर्थं न विजानाति । अत्र शब्दप्रमाणेनैव गवयरूपार्थः प्रतीयते ।

अतश्चेदम् 'आप्तोपदेशः शब्दः' इति लक्षणलक्षितशब्दप्रमाणकमेव स्यात्।

एवं प्रत्यभिज्ञावत् एतद्देशैतत्कालविशिष्टरूपेण कश्चनातिरिक्तः विषयः नावगम्यते । श्रुतातिदेशवाक्यस्य दृष्टगोः नागरिकस्य अनुभवानुसारमिदं ज्ञानमुत्पन्नम् । अतः पूर्वानुभूतवस्तुविषयकज्ञानापेक्षया अधिकः कश्चन नास्तीति प्रत्यभिज्ञायमानं प्रमाणमिति वक्तुमपि न शक्यते।

अथवा – नगरे गां दृष्टवान् 'गौरिव गवय' इत्यतिदेशवाक्यमपि श्रुतवांश्च पुरुषः कदाचित् वनं गतवान्, तदा तत्र गवयदर्शनेन अयं गवयः गोसादृश्यविशिष्टः इत्येवं यज्ज्ञानमुत्पद्यते तदुपमितिरित्यपि न सम्भवति।

तथाहि – गवयः प्रत्यक्षप्रमाणगम्यः । तत्र भासमानं गोसादृश्यम् अतिदेशवाक्यद्वारा पूर्वमेवावगतम्। अतः तच्च प्रकृते स्मृतिविषयो भवतीति पृथक् प्रमाणान्तरापेक्षा नास्ति। ननु, 'गोसदृशः कश्चिदस्ति' इति साधारणरूपेण गोसादृश्यज्ञानं पूर्वं जातम् । तद्विषयिणी स्मृतिरपि जाता । किन्तु गोसादृश्यविशिष्टगवयविषयकज्ञानार्थम् उपमानप्रमाणमपेक्षितमिति। तदपि न। तात्कालिककारणैः अवगतविषयकं ज्ञानं यज्ञायते, तस्य संवाद अनुवादः इति च व्यवहारः।

प्रकृतेऽपि 'गोसदृशोऽयं गवयः' इति संवादरूपं ज्ञानम् । स्मृतिसमानरूपत्वेन विशेषो नास्तीति अज्ञातार्थविषयकत्वाभावेन प्रमाणमेव न भवति। अतः तदर्थम् उपमानप्रमाणस्यावश्यकता नास्ति।

'गोसदृशो गवयः' इत्यत्र अतिदेशवाक्येन अवगतार्थः न उपमानप्रमाणविषयः । गवयस्वरूपं तत्र विद्यमानं गोसादृश्यवैशिष्ट्यं च

 ISSN – 2249-538X

प्रत्यक्षविषयः । श्रुतातिदेशवाक्यानामिति विशेषणं व्यर्थम् । अश्रुतातिदेशवाक्योऽपि प्रत्यक्षेण गां दृष्टवान् ततः वने गवयं पश्यतः तस्य अयं गोसदृशः इत्युपमितिर्जायते । यद्यपि तस्य गोसदृशोऽयम् इति ज्ञानं भवेत् किन्तु अयं गोसदृशो गवयपदवाच्यः इत्येवं संज्ञासंज्ञिसम्बन्धज्ञानं न भवति । अतश्च संज्ञासंज्ञिसम्बन्धिज्ञानम् उपमानप्रमेयः । स च श्रुतातिदेशवाक्यस्यैव भवतीति न विशेषणं व्यर्थमिति ।

किन्तु – गोसादृश्यविशिष्टगवयज्ञानमेव उपमानस्य प्रमेयम् । कुतः, संज्ञासंज्ञिसम्बन्धस्तु अतिदेशवाक्येनैवावगम्यते । स च अतिदेशवाक्यार्थः ।

अतिदेशवाक्यावगतसमाख्यासम्बन्धस्य प्रत्यभिज्ञा उपमानप्रमाणेनावगम्यते इत्यपि न । अरण्ये गवयदर्शनानन्तरम् अस्य 'गवय' इति संज्ञा इत्येतावन्मात्रमवगम्यते । प्रत्यभिज्ञायां तु पूर्वज्ञानापेक्षया अधिकं भासते । देशकालादिसाहित्यं तु प्रतीयत एव । अतः इदं स्मृत्यात्मकमेव ।

नैयायिकसिद्धान्तप्रकारेण संज्ञासंज्ञिसम्बन्धज्ञानमेव उपमानस्य प्रमेयः। शक्तिग्रह एव प्रमेयः । इदं च शक्तिग्राहकं प्रमाणमिति । एवमङ्गीकारे तत्र सन्ति अनुपपत्तयः । यथा–

**प्रथमो दोषः** – ये च 'गोसदृशो गवयः' इत्यादिरीत्या श्रुतातिदेशवाक्याः तेषामेव संज्ञासंज्ञिग्रहः भवेत् न तु अश्रुतातिदेशानाम् ।

**द्वितीयो दोषः** – अश्रुतातिदेशवाक्यानामपि उपमानप्रमाणं प्रवर्तते लोके ।

यथा – कश्चन अश्रुतातिदेशवाक्यः, नगरे स्वगृहे गां पालयति । कदाचित् वनं गतः । तत्र गोसदृशं प्राणिविशेषं पश्यति । तदा स्मरति – मद्गृहे विद्यमानगौरिव

वर्तते अयं प्राणिविशेषः इति । तदा अनुभवति – एतत्सदृशी मदीया गौः इति । इदमेव ज्ञानम् उपमानप्रमाणस्य प्रमेयः । अत्र करणं तु – वने पुरोवर्तिनि प्राणिविशेषे प्रत्यक्षदृष्टगोसादृश्यम् । इदं प्रत्यक्षम् । तेन अनधिगतं ज्ञानं जायते – मदीया गौः एतत्सदृशी इति । इदं न प्रत्यक्षगम्यम् । गोः नगरे विद्यमानत्वात्, अरण्ये विद्यमानस्य पुरुषस्य इन्द्रियसन्निकर्षो न भवति । न स्मृतिरूपम् । पूर्वं अनुभवाभावात् । अतः संज्ञासंज्ञिज्ञानमेव उपमानस्य प्रमेयः इति लोकविरुद्धम्।

<u>**तृतीयो दोषः**</u> – शक्तिग्राहकप्रमाणेषु अन्तर्गतमुपमानम् एतादृशं न भवति – बाधकसद्भावात् । तथाहि – कश्चन वाराणस्यां देवदत्तशर्मनामा महापण्डितः षड्दर्शनाचार्यः कः इति पृष्टो वाराणसेयः – एवमुक्तवान् एतत्सङ्केते विद्यमानः एतादृशकुण्डलयुक्तः नामधारी ऊर्ध्वकायः कृष्णवर्णः इत्यादि ।

तच्छ्रुत्वा श्रुतातिदेशवाक्यः सः चैत्रः वाराणसीं गतः । तत्सङ्केतितस्थानं गत्वा दृष्टे सति तादृशलक्षणलक्षितः कश्चन पुरुषः दृष्टः । तदा – 'अयमेव महापण्डितः देवदत्तशर्मा' इति जानाति । नमस्कृत्य ससन्तोषं प्रतिनिवृत्तः । पुनः प्रत्यागमनसमये गङ्गातीरे आप्तमित्रेण सम्भाषणसमये तेन उक्तम् – अद्य देवदत्तशर्माणः वाराणस्यां न सन्ति । प्रयागं गताः । स्वगृहे यः दृष्टः सः तस्य भ्राता । सोऽपि दर्शने तत्सदृश एव इति ।

इदानीं स चिन्तयति ममेदमुत्पन्नं ज्ञानं भ्रमात्मकम् इति । यः उक्तवान् स सन्निधौ नास्ति । यः श्रुतातिदेशवाक्यः सः पूर्वं तं न दृष्टवान् इति कारणं प्रमात्मकं चेदपि भ्रमात्मकः संज्ञासंज्ञिसम्बन्धग्रहः जातः इति संज्ञासंज्ञि-सम्बन्धग्रहः नियमेन उपमानस्य प्रमेयो भवितुं नार्हति । व्यभिचारदर्शनात् । अतः नैयायिकसम्मतमुपमानं शक्तिग्राहकप्रमाणं न भवितुमर्हति ।

 ISSN – 2249-538X

अतः अतिदेशवाक्येन (शब्दप्रमाणेन) वा प्रत्यक्षेण वा अनवगतः सादृश्यविशिष्टः अपूर्वः अर्थः उपमानप्रमाणप्रमेयो वक्तव्यः। तदुक्तं भट्टपादैः वार्तिके –

**'तस्मात् सादृश्ययुक्तार्थः प्रमेयोऽपूर्व उच्यताम्'** इति। (श्लो.वा.उ.प्र.१५)

निर्विकल्पकज्ञानमात्रस्य प्रत्यक्षत्ववादिनां बौद्धानां मते गवयगतं गोसादृश्यज्ञानं प्रत्यक्षं न भवति। तच्च प्रत्यक्षाभासमेव। सादृश्यनामकं नास्ति किञ्चिद्वस्तु। अतः प्रमेयस्याभावात् उपमानप्रमाणं नास्त्येवेति उपमनं न प्रमाणान्तरम्।

किन्तु अबाधितप्रत्यक्षज्ञानजन्यत्वात् सादृश्यस्य वस्तुत्वं (वस्तुसत्तां) निराकर्तुं न शक्यते। तदुक्तं वार्तिके –

**'सादृश्यस्यापि वस्तुत्वं न शक्यमपबाधितुम्'** इति। (श्लो.वा.उ.प्र.१८)

तर्हि किं नाम सादृश्यमित्युक्तौ – **'भूयोऽवयवसामान्ययोगो जात्यन्तरस्य तत्'** इति (श्लो.वा.उ.प.१६) जात्यन्तरयोगिभिः अवयवसामान्यैः यो जात्यन्तरस्य योगः तत् सादृश्यम्। अत्र स्वरूपमात्रं न योगः। किन्तु जात्यन्तर-सम्बन्धानुरक्तरूपेण तेषां जात्यन्तरेण योगः तत् सादृश्यम्। पूर्वमगृहीते गवि सामान्यानां सम्बन्धः ग्रहीतुं न शक्यते इति अगृहीतगोः सादृश्यं न सम्भवति। तच्च सादृश्यं द्रव्यजातिगुणक्रियाशक्तिस्वधर्मादिसामान्ययोगात् विभिन्नं सिध्यति। द्रव्यसामान्यं समानालङ्कारधारिणोः गवादिधनवतोश्च। 'अग्निर्वै ब्राह्मणः' इत्यत्र वेदवाक्ये प्रजापतिमुखप्रभवत्वरूपजन्म (जाति) सामान्यात् अग्निब्राह्मणयोः सादृश्यम्। गुणसामान्यं तु चित्रेषु सादृश्यव्यवहारः। क्रियासामान्यं तु – निपत्यादानसामान्यात् यागस्य श्येनेन सादृश्यम्। 'यथा वै श्येनो निपत्यादत्ते एवमयं' (यागः) इत्यत्र। सिंहदेवदत्तयोः शक्तितः।

पञ्चावत्तनराशंसद्वितीयप्रयाजादिषु स्वधर्मतः सादृश्यम् । सविकल्पकज्ञानस्य प्रत्यक्षत्ववादिनां मते तु घटत्वादिजातिवत् सादृश्यं प्रत्यक्षं भवति । ननु सादृश्यस्य वस्तुत्वे सति चक्षुःसन्निकृष्टस्यैकस्मिन् धर्मिणि द्वयोः धर्मधर्मिणोः युगपदुपलभ्यमानयोः समवेतस्य प्रत्यक्षत्वं सम्भवतीति गवये गोसादृश्यज्ञानं प्रमाणेनैव गृह्यते इति यदवगतं नास्त्यत्र उपमानप्रमाणापेक्षा इति चेन्न।

**'तत्र यद्यपि गां स्मृत्वा तद्धानमुपजायते।**

**सन्निधेर्गवयस्थत्वात् भवेदिन्द्रियगोचरः॥'**

इति (श्लो. वा. उ. प्र. ३६)

अरण्ये गवयदर्शनसमनन्तरं गवयत्वविशिष्टं गवयप्रत्यक्षं भवति। तदनन्तरं पूर्वं नगरेऽनुभूतायाः गोः स्मरणं जायते। तदनन्तरं च गवये गोसादृश्यप्रत्यक्षं भवति इति क्रमः । किन्तु गवयचक्षुःसंयोगगोसादृश्यप्रत्यक्षयोर्मध्ये गोस्मरणस्य व्यवहितत्वेन गवये गोसादृश्यविषयकप्रत्यक्षकारणं न भवति। इन्द्रियव्यापारस्य स्मरणान्तरितत्वेन इन्द्रियव्यापारस्य उपरमात् । अतः गवये गोसादृश्यविषयकप्रमासिध्यर्थमुपमानप्रमाणमपेक्षितम्।

**'तस्माद्यत् स्मर्यते तत्स्यात् सादृश्येन विशेषितम्।**

**प्रमेयमुपमानस्य सादृश्यं वा तदन्वितम्॥'**

(श्लो. वा. उ. प. ६७)

एवं च स्मर्यमाणे गवि गवयसादृश्यवैशिष्ट्यमथवा गवये गोसादृश्यवैशिष्ट्यं वा उपमानस्य प्रमेयम्।

ननु गवये सादृश्यं प्रत्यक्षेण गृह्यते । गौः स्मर्यते इति किमत्रोपमानप्रमेयम् इति चेत् स्मर्यमाणगोनिष्ठगवयसादृश्यरूपं विशिष्टग्रहणं

 ISSN – 2249-538X

नात्र गृह्यत इति प्रमाणान्तरानवगतत्वेन उपमानप्रमाणेनैवावगम्यत इति इदं स्वतन्त्रं प्रमाणम् । गवयसादृश्यविशिष्टगोविषयकज्ञानमुपमानमिति यावत् । एतत्सदृशी मदीया गौः इति ।

यथा अनुमानस्थले पर्वतः प्रत्यक्षेण गृह्यते । वह्निः स्मृतिसिद्धः । किन्तु वह्निविशिष्टपर्वतः न प्रमाणसिद्धः इति स एव अनुमानप्रमेयः तद्वदत्रापि ।

प्रमाणद्वयवादिनः बौद्धाः प्रमाणत्रयवादिनः सांख्याश्च उपमानमनुमाने एवान्तर्भावयन्ति । तेषां सिद्धान्तानुरोधेन एतत्सदृशी मदीया गौः इत्यनुमानम् । तदनुसारं एतत्सदृशत्वविशिष्टमदीयगोरूपपक्ष एव अनुमानस्य प्रमेयो वक्तव्यः । किन्तु एते त्रयोऽपि हेतवः पक्षधर्माः न भवन्ति । उपमानप्रमाणेनैव गोगतं गवयसादृश्यं गोरूपपक्षस्य धर्मः इति ज्ञायते । अतः अनुमाने उपमानसापेक्षपक्षधर्मत्वस्य उपयोगो न भवति । अथवा प्रमेयभूते गवि तद्गतं गवयसादृश्यं न हेतुः भवितुमर्हति । अनुमानात्पूर्वं तस्य गवयसादृश्यस्य गवि अग्रहणात् । गोसादृश्यविशिष्टो गवयोऽपि पक्षधर्मत्वाभावादेव न हेतुः । स तु गवयनिष्ठो धर्मः न तु गवि विद्यमानः ।

गोनिष्ठं गवयसादृश्यं हेतुः इत्युक्ते गौः गवयसादृश्यवतीति वक्तव्यम् । तस्य प्रतिज्ञार्थैकदेशत्वात् सः न हेतुः भवितुमर्हति ।

इदं चोपमानं प्रमाणान्तरम् । गवयदर्शनसमये नगरस्थगोः इन्द्रियसन्निकर्षाभावात् न प्रत्यक्षं भवितुमर्हति । नाप्यनुमानम् – अग्रहीत-सम्बन्धस्यापि उपजायमानत्वात् । अत्र गवयसादृश्यविशिष्टा गौः अनुमेया इति वक्तव्यम् । तत्र गोगतं सादृश्यं लिङ्गं भवितुं नार्हति । उपमानात्पूर्वं तद्धर्मत्वेनाप्रतीतेः । उपमानप्रमेयत्वाच्च । अतश्च गवयसदृशी गौरितिज्ञानं,

नानुमेयम्, अगृहीतसम्बन्धस्यापि उपजायमानत्वात्, प्रत्यक्षवत् इति । शब्दकरणकत्वाभावात् न शाब्दमपि। अतः इदं प्रमाणान्तरमेव।

अपि चास्य उपमानप्रमाणस्य असाधारणतया श्रौतः स्वतन्त्रोपयोगः प्रदर्शितः वार्तिके –

**'भिन्नानुमानादुपमानमुक्तम्, सौर्यादिवाक्यैरसहायि दृष्टम्।**

**सादृश्यतोऽग्न्यादियुतं कथं नु, प्रत्याययेदित्युपयुज्यते नः॥'** इति।

वेदवाक्यानां तात्पर्यार्थनिर्णये प्रवृत्तानां मीमांसकानाम् उपमानप्रमाण-प्रामाण्यनिरूपणस्य का वा प्रसक्तिरित्युक्तौ –

श्रुत्युक्तानां यागादिकर्मणामनुष्ठानोपयुक्तः प्रकृतिविकृतिभावनिर्णयः सादृश्याधीनः इति सादृश्यापरपर्यायः उपमानपदार्थः अवश्यं निर्वचनीयः।

यथा – सौर्ययागतद्बोधकवाक्ययोः आग्नेयतदुत्पत्तिवाक्याभ्यामन्वयो पूर्वं न गृहीतः। अतोऽत्र अनुमानस्य सङ्गतिर्नास्ति।

तदयमत्र क्रमः – प्रथमप्राप्तमाग्नेयप्रकरणमधीत्य ततः सौर्यप्रकरणे 'सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः' इति सौर्यवाक्ये दृष्टे ओषधद्रव्यकत्वेन एकदैवत्यकत्वेन च सादृश्येन 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति' इति आग्नेयवाक्यमुपमीयते । गवयदर्शनेन तत्सदृशायाः गोः स्मरणमिव सौर्यवाक्यदर्शनेन तत्सदृशम् आग्नेयवाक्यं स्मर्यते । आग्नेयस्यापि ओषधद्रव्यकत्वात् एकदेवताकत्वाच्च।

तस्मिंश्चोपमिते तेन तदर्थो ज्ञायते 'सा' त्र्यंशा भावना इति । तत्र सौर्यवाक्ये भाव्यकरणयोः सत्वात् इतिकर्तव्यताकाङ्क्षायामुपकारपृष्ठभावेन आग्नेयेतिकर्तव्यता अतिदिश्यते 'प्रकृतिवद्विकृतिः कर्तव्या' इति सौर्ययागेन

 ISSN – 2249-538X

ब्रह्मवर्चसं भावयेत् आग्नेयवदुपकृत्य इति । इदं चोपमानप्रमाणस्य विशिष्य असाधारणं प्रयोजनम् ।

एवं 'व्रीहिभिर्यजेत' इति वाक्यविहितव्रीहिद्रव्यकानुष्ठानपक्षे व्रीह्यपचारे तत्सदृशतया नीवारेषु अवगतेषु तत्सदृशत्वेन च व्रीहिषु अयमिति व्रीह्यवयवसामान्यावगमात् नीवाराणां व्रीहिप्रतिनिधित्वं सिध्यतीति द्वितीयं प्रयोजनम् । एवमेव कस्यचिद्द्रव्यस्य एकेन द्रव्यान्तरेण अल्पसादृश्यं तथा अन्येन सह बहुसादृश्यं च यदा गम्यते तदा श्रुतानामवयवानां भूयसां लाभाय सुसदृशस्यैवोपादानं सिध्यति । ईषत्सदृशेऽपि तु तदपेक्षया विसदृशत्वात् उपजातापि बुद्धिः मिथ्या भवति । कार्यानुपयोगेन अप्रमाणं भवतीति तृतीयं प्रयोजनम् ।

प्रतिनिधिग्रहणस्थले सुसदृशे विषये बुद्धिः शीघ्रमुत्पद्यते । तेनैव नैराकाङ्क्ष्ये पश्चादुपजातोऽपि मन्दसादृश्यबोधः अनुष्ठानानौपयिकत्वात् बाध्यते इति चतुर्थं प्रयोजनम् । एवं च श्रौतकर्मानुष्ठानौपयिकत्वेन उपमानस्य धर्मप्रमाप्रयोजकत्वं सिध्यति ।

॥इति शम्॥

***************

# विध्यर्थविवेचनम्

**डा. सूर्यनारायणभट्टः**

सहायकाचार्यः, मीमांसाविभागः

राजीवगान्धीपरिसरः, शृङ्गेरी

धर्माधर्मविचारे प्रवृत्तानां मीमांसकानां को वा विधिनिरूपणस्य, विध्यर्थनिरूपणविलासस्य वा अवसर इत्युक्ते मीमांसाविचारविषयस्य धर्मस्य किंबोध्यत्वम् इति विवेचयितुं भगवता जैमिनिना इत्थं सूत्रितं **चोदनालक्षणोर्थो धर्मः** इति । सूत्रगतस्य चोदनापदस्य, **चोदना चोपदेशश्च विधिश्चैकार्थवाचिनः, चोदनेति क्रियायाः प्रवर्तकं वचनमाहुः** इत्यादिवचननिचयात् विधिः इत्यर्थः अवगम्यते । एवं विधिना बोध्यो धर्म इति पर्यवस्यति । तर्हि कोऽसौ विधिः, कोऽर्थः तस्य, इति विचारः प्रसक्तः ।

द्वादशलक्षण्यां प्रथमाध्याये धर्मं प्रति अष्टौ प्रमाणानि निरूपितानि ।यथा **विध्यर्थवादमन्त्र- स्मृत्याचारनामधेयवाक्यशेषसामर्थ्यानि** इति । तेषु अन्यतमम् अनुपमं प्रमाणं विधिः ।

स्मृतिकारैः **मन्त्रब्राह्मणयोर्वेदनामधेयम्** इति द्वेधा कल्प्यमानो वेदः प्रकारान्तरेण अनेकधा परिदृश्यते । यथा –

**हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः ।**

**परक्रिया पुराकल्पो व्यवधारणकल्पना ॥** इति।

 ISSN – 2249-538X

तत्र विधिः नाम अप्राप्तार्थप्रापको वेदभागः कश्चन । वाक्यार्थनिर्णयाय पदार्थानां निर्णयोपि आवश्यक इति मीमांसायां **विध्यर्थः क** इति विचारः प्रवृत्तः।

अयं विधिविचारः, विध्यर्थविचारो वा मीमांसकानां प्रामाणिको वा इति चेत्, सत्यमित्येव वक्तव्यम्। यतो भगवान् सूत्रकारः सूत्रयामास **विधिना त्वेकवाक्यत्वात्..., विधिर्वा स्यादपूर्वत्वात्...** इत्यादिना।

लोके विधिशब्दप्रयोगस्तु लिङ् लेट्, लोट् इत्यादिप्रत्ययेषु वर्तत इत्यतो विधिः नाम लिङादिप्रत्ययः । लिङ् लेट्, लोट् इत्यादिभिः अभिधीयमानः अर्थः अपि विधिः। **विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्** इति पाणिनीयमनुशासनमत्र प्रमाणम्। एवं लिङादिघटितपदसमभिव्याहृतवाक्येष्वपि विधिप्रसिद्धिः वर्तत इत्यत्र **अयं विधिः, इदं विधिवाक्यम्** इत्यादिप्रयोगः प्रमाणम्।

तर्हि विध्यर्थः कः इति विचिकित्सायां विध्यर्थविषये विवदन्ते विपश्चितः।विध्यर्थः प्रवर्तना इति केचित्। उक्तञ्च –

**प्रवर्तना स्मृतिप्राप्ते प्रैष इत्यभिधीयते।**

**अप्राप्तप्रेषणं सर्वं विधित्वं प्रतिपद्यते॥** इति।

प्रपूर्वकवृतुधातुना निष्पन्नोऽयं णिजर्थकः शब्दः । प्रपूर्वकस्य वृतुधातोः प्रवृत्तिरर्थः । णिचः प्रेरणाव्यापारः अर्थः । णिजर्थे व्यापारे अनुकूलतासम्बन्धेन अन्वयः। तथा च प्रवर्तना नाम प्रवृत्यनुकूलव्यापारः।

प्रवर्तनैव कुतः विध्यर्थः इत्युक्ते, लिङादिश्रवणे प्रवर्तनायाः नियमेन प्रतीयमानत्वात् **यत् यस्मात्प्रतीयते तत् तस्य वाच्यमि**ति नियमपुरस्सरं

प्रवर्तनैव लिङादेरर्थः । लटादिघटितवाक्येषु श्रूयमाणेषु तादृशी प्रतीतिः न भवतीति अन्वयव्यतिरेकाभ्यां विध्यर्थः प्रवर्तना इति अवधार्यते।

**गामानय** इत्यादिलिङादिघटितवाक्यश्रवणसमनन्तरम्, **अयं मां गवानयने प्रवर्तयति**, इत्याकारको बोधः श्रोतरि भवति। **तादृग्बोधं प्रति किं कारणमि**ति कारणजिज्ञासायाम्, आवापोद्वापाभ्यां लिङादेः एव प्रवृत्यनुकूलव्यापाररूपप्रवर्तनावाचित्वम् अवधारयति । लोके प्रवर्तयितृपुरुषनिष्ठः **अयमत्र प्रवर्तताम**ित्याकारकः पुरुषस्य अभिप्रायविशेषः एव प्रवर्तना। प्रेरणा, आज्ञा इत्यादयः अपि पुरुषाशयविशेषाः एव। एषां लिङ्वाच्यत्वमस्ति चेदपि न तत्त्वेन रूपेण लिङादिभिरभिधानम् । अपि तु प्रवृत्यनुकूलव्यापारत्वरूपप्रवर्तनात्वेन रूपेण। तादृक्प्रवर्तनायाः आश्रयः पुमान् इति सः प्रवर्तकः।

एवम् **अग्निहोत्रं जुहोति** इत्यादौ विध्यर्थः प्रवर्तना। प्रवृत्तिहेतुर्व्यापार इत्यादिना विवृता। परम् अचेतने अपौरुषेयात्मके वेदे चेतनधर्मस्य पुरुषाशयस्य असम्भवात् शब्दनिष्ठः अलौकिको धर्मविशेष एव प्रवर्तना इति स्वीक्रियते । तथा हि - **यजेत स्वर्गकामः** इति वाक्यस्य श्रवणानन्तरम्, **वैदिकलिङादिप्रेरितोहं यागम् अनुतिष्ठामि**, इत्यादिव्यवहारदर्शनात् वैदिकलिङादिनिष्ठः पुरुषप्रवृत्यनुकूलः व्यापारविशेषः कश्चित् कल्प्यते। पुरुषप्रवृत्तिभवनानुकूलत्वात् भावना इति पदेन अभिधीयते। तस्याः शब्दनिष्ठत्वात् शाब्दी इति च उच्यते। सा एव प्रेरणा, चोदना, विधिः, शब्दभावना। इत्थं लोकवेदसाधारण्येन प्रवृत्यनुकूलव्यापारः, प्रवर्तनापरपर्यायः लिङर्थः। तत्र व्यापारत्वमात्रं शक्यतावच्छेदकम्।

 ISSN – 2249-538X

**मण्डनमिश्रास्तु** इष्टसाधनत्वं विना क्रियासु प्रवर्तकः अन्यो धर्मो नोपलभ्यते इति इष्टसाधनत्वमेव विध्यर्थ इति ब्रुवते। लोके प्रवृत्तिः द्वेधा परिदृश्यते। क्वचित् स्वतन्त्रा प्रवृत्तिः, क्वचित् परतन्त्रा प्रवृत्तिः। तत्र स्वतन्त्रप्रवृत्तौ प्रमाणान्तरेण प्रागेव इष्टसाधनत्वं स्वत एव अवबुध्य पुमान् प्रवर्तत इति तत्र प्रवृत्तिं प्रति इष्टसाधनताज्ञानं कारणम्। न तत्र प्रवर्तना परिदृश्यते। एवं परतन्त्रप्रवृत्तावपि परकीयं लिङादिघटितं वाक्यं श्रुत्वैव प्रवर्तते चेदपि यावन्न जानाति विधेयस्य समीहितसाधनताम्, तावन्न प्रवर्तत इति सार्वजनीनमेतत्। इत्थम् इष्टसाधनत्वस्य अव्यभिचरितत्वात् इष्टसाधनत्वमेव लिङर्थ इति।

तदुक्तं -

**पुसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्तकः।**

**प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम्॥** इति।

**नैयायिकास्तु** प्रवृत्तौ न केवलम् इष्टसाधनत्वज्ञानं कारणम्। तथा सति कृत्यसाध्ये चन्द्रस्पर्शादौ, बलवदनिष्टानुबन्धिनि विषसम्पृक्तान्नबोजने प्रवृत्तिः स्यादित्यतः  सर्वत्र चेतनस्य प्रवृत्तौ इष्टसाधनत्वम्, कृतिसाध्यत्वम्, बलवदनिष्टाननुबन्धित्वमिति त्रितयम् अपेक्षितम्, अतः एतत्त्रितयं लिङर्थ इति उररीकुर्वन्ति। तज्ज्ञानत्रितयस्यापि प्रवृत्तौ उपयोगः। अन्यतमाभावे न प्रवृत्तिः दृश्यते। तथा हि – **मधुविषसम्पृक्तान्नभोजने** क्षुन्निवृत्तिरूपेष्टसाधनत्व-ज्ञानकृतिसाध्यत्वज्ञानयोः सत्वेऽपि बलवदनिष्ट अनुबन्धित्वज्ञानाभावेन प्रवृत्तिः न दृश्यते। विषकलितान्नभोजनस्य मरणरूपबलवदनिष्टानुबन्धित्वात्। एवं **चन्द्रस्पर्शादौ** इष्टसाधनत्वज्ञानबलवदनिष्टाननुबन्धित्वज्ञानयोः सत्वेऽपि कृतिसाध्यत्वज्ञानाभावेन प्रवृत्तिः न दृश्यते। चन्द्रस्पर्शः पुरुषकृतिसाध्यः नेति

कृतिसाध्यत्वज्ञानाभावः। एवं **मण्डलीकरणा**दौ कृतिसाध्यत्वबलवद्-निष्टाननुबन्धित्वज्ञनयोः सत्वेऽपि इष्टसाधनत्वज्ञानाभावात् न प्रवृत्तिः। अतः त्रितयज्ञानसत्वे एव प्रवृत्तिः, नान्यथा। अतः त्रितयं लिङर्थः इति।

परं तत्र एकैव शक्तिः स्वीकार्या उत भिन्ना इत्यत्र प्राचीनार्वाचीनयोः नैयायिकयोः मध्ये कश्चन भेदः परिलक्ष्यते। प्राचीनास्तु विशेषणविशेष्यभावापन्ने अर्थात् बलवदनिष्ठाननुबन्धित्वविशिष्टेष्टसाधनत्व-विशिष्टकृतिसाध्यत्वे एका शक्तिः इति स्वीचक्रुः।

परं बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वविशिष्टकृतिसाध्यत्वे शक्तिः उत इष्टसाधनत्वविशिष्टबलवदनिष्टाननुबन्धित्वविशिष्टे कृतिसाध्यत्वे शक्तिः इत्यादिविशेषणविशेष्यभावे विनिगमनाविरहात्, शरीरकृतगौरवाच्च, अनेकशक्तेः कल्पनाप्रसङ्गाच्च त्रिष्वपि प्रत्येकं शक्तिः लिङादेः इति अर्वाचीनाः।

व्युत्पत्तिवैचित्र्यात् यथा पुष्पवन्तशब्दस्य युगपदेव दिवाकरनिशाकरयोः बोधकत्वं तथैव युगपदेवार्थत्रयस्यापि बोधः। तज्ज्ञानं प्रवृत्तिं प्रति कारणम्। एतत्त्रितयं प्रवृत्तिं प्रति कारणमिति त्रितयमपि विधिशब्देन अभिधीयते।

बलवदनिष्टाननुबन्धित्वादीनां धात्वर्थेन साकमन्वये यत्र बाधकाभावः तत्र धात्वर्थेन साकं त्रयाणामप्यर्थानां धात्वर्थे अन्वयः। यत्र बाधकं तत्र अन्यत्रान्वयः। तेन च सप्तकार्यकारणभावः उत अष्टौ कार्यकारणभावाः सम्पद्यन्ते। यथा **न कलञ्जं भक्षयेत्** इत्यत्र कलञ्जभक्षणस्य बलवदनिष्टानुबन्धित्वात् बलवदनिष्टाननुबन्धित्वस्य धात्वर्थेन साकं नान्वयः।

 ISSN – 2249-538X

अपि तु नञर्थे अभावे। इत्थम् इष्टसाधनत्वकृतिसाध्यत्वयोः अन्वयस्तु धात्वर्थे भक्षणे इति।

**तदिदं मतं न युक्तम्**। यतः शक्तित्रयकल्पने गौरवम्। पुनः बलवदनिष्टानुबन्धित्वज्ञानं प्रवृत्तिप्रतिबन्धकम्। बलवदनिष्टानुबन्धित्व-ज्ञानाभावः स्वरूपसन् प्रवृत्तिं प्रति कारणम्।

**अनन्यलभ्यः शब्दार्थः** इति न्यायेन च बलवदनिष्टाननुबन्धित्वादीनाम् आक्षेपलभ्यत्वात् न लिङर्थत्वम्। तदेतदग्रे निरूपयिष्यते।

पुनः त्रयाणां लिङर्थत्वे अष्टौ कार्यकारणभावप्रसङ्गः। तथा हि –

1. **न कलञ्जं भक्षयेत्** इत्यत्र नञ् – समभिव्याहृतलिङर्थ-बलवदनिष्टाननुबन्धित्वप्रकारकशाब्दबोधे नञ्पदजन्योपस्थितिः कारणम्।

2. **न कलञ्जं भक्षयेत्** इत्यत्र नञ् – समभिव्याहृतबलवदनिष्टाननु-बन्धित्वातिरिक्तलिङर्थप्रकारकशाब्दबोधे धातुजन्योपस्थितिः कारणम् ।

3. **यजेत** इत्यत्र नञ् – असमभिव्याहृतलिङर्थ-बलवदनिष्टाननुबन्धित्वादिप्रकारकशाब्दबोधे धातुजन्योपस्थितिः कारणम्।

4. **न पचति चैत्रः** इत्यत्र लिङ् – असमभिव्याहृतनञर्थ-प्रकारकशाब्दबोधे प्रथमान्तपदजन्योपस्थितिः कारणम्।

5. **न पचेत्** इत्यत्र लिङ् - समभिव्याहृतनञर्थप्रकारकशाब्दबोधे धातुजन्योपस्थितिः कारणम्।

6. **पचति चैत्रः** इत्यत्र नञ् - असमभिव्याहृत-आख्यातार्थकृति-प्रकारकशाब्दबोधे प्रथमान्तपदजन्योपस्थितिः कारणम्।

7. **न पचति** इत्यत्र नञ् - समभिव्याहृत-आख्यातार्थ-कृतिप्रकारकशाब्दबोधे नञ्पदजन्योपस्थितिः कारणम्।

8. **अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णाति** इति विध्युत्तरनिषेधवाक्यस्थले लिङर्थ – इष्टसाधनत्वप्रकारकशाब्दबोधं प्रति धात्वर्थान्वित – नञ् – पदजन्योपस्थितिः कारणम् इति।

यदि प्रवर्तना विध्यर्थः इति स्वीक्रियते तर्हि एक एव कार्यकारणभावः सम्पद्यते । अतः कार्यकारणभावलाघवाच्च प्रवर्तनैव विध्यर्थः।

**पार्थसारथिमिश्रा**स्तु सर्वत्र प्रवृत्तिं प्रति इष्टसाधनत्वस्यैव कारणत्वमवगम्यत इति लिङादिसमभिव्याहृतधात्वर्थनिष्ठम् इष्टसाधनत्वं प्रवर्तनात्वेन रूपेण विध्यर्थ इत्याहुः। अन्यप्रेरितोपि समीहितसाधनताज्ञानाभावे न प्रवर्तते। इष्टसाधनत्वं च तत्वेन न विध्यर्थः । अपि तु प्रवर्तनात्वेन रूपेण।एवं च इष्टसाधनत्वरूपा प्रवर्तनैव विध्यर्थ इति तेषां मतम् ।

**सन्ध्योपासनं ते इष्टसाधनम्, तस्मात् त्वं कुरु**, इति इष्टसाधनविध्योः सहप्रयोगानापत्तिः खलु इति चेत् विधिना इष्टसाधनत्वस्य विशेषरूपेण अनभिधानात् । अपि तु प्रवर्तनात्वेन रूपेण अभिधानात्। लोके सामान्यशब्दस्य विशेषशब्देन साकं सहप्रयोगस्तु दृष्टः। यथा **पाञ्चालराजो द्रुपद** इत्येवम् ।

तर्हि इष्टसाधनत्वस्य विध्यर्थत्वपक्षे, का गतिः **अभिधाभावनामाहुः अन्यामेव लिङादय** इत्यस्य वार्तिकस्य इत्युक्ते, अभिधीयते या सा अभिधा


ISSN – 2249-538X

समीहितसाधनता, सैव प्रवर्तनात्वेन रूपेण अभिहिता पुरुषप्रवृत्तिं भावयतीति भावना, तां लिङादयः आहुः इत्यर्थ इति आमनन्ति ।

इष्टसाधनत्वादीनां **न** विध्यर्थत्वं **युक्तम् ।** यतः - **अग्निहोत्रं जुहुयात् स्वर्गकामः** इत्यादिविधिः यागादिकं विदधत् स्वविधेये यागादौ पुमांसं प्रवर्तयति। प्रवर्तमानः पुमान् स्वप्रवृत्तिविषये यागादौ यावत् समीहितसाधनतां नावगच्छति, तावत् न  यागादौ प्रवर्तते। पुंसः अप्रवृत्तौ विधेः प्रवर्तकत्वं न सिध्यति। विधेः अप्रवर्तकत्वे विधेः आनर्थक्यं स्यात्, इति विधिरेव स्वस्य प्रवर्तकत्वसिध्यर्थं स्वविधेयस्य यागादेः इष्टसाधनत्वमाक्षिपति। सः आप्ततमो विधिः कृत्यसाध्ये, अनर्थावहे च कर्मणि पुमांसं न कदापि प्रवर्तयतीति विधिबलादेव बलवदनिष्टाननुबन्धित्वम्, एवं कृतिसाध्यत्वं चाक्षिप्यते। एवम् इष्टसाधनत्वम्, कृतिसाध्यत्वम्, बलवदनिष्टाननुबन्धित्वमिति त्रितयस्यापि आक्षेपलभ्यत्वात् **अनन्यलभ्यः शब्दार्थ** इति न्यायेन न लिङादिवाच्यत्वम्।

अथवा यागादिषु इष्टसाधनत्वादेः अनुमानेनैव बोधः सम्भवतीति अन्यलभ्यत्वात् न विध्यर्थत्वम्। यथा – **यागः मदिष्टसाधनम्, अयमत्र प्रवर्तताम् इत्याकारक – आप्तेच्छाविषयत्वात्** इति अनुमानगम्यत्वम् इष्टसाधनत्वस्य।

अथवा इष्टसाधनत्वस्य विध्यर्थत्वे विधिशब्दस्य पर्यायः भवति इष्टसाधनत्वम् इति। विधेः पर्यायत्वन्तु न युज्यते इष्टसाधनत्वस्य। **सन्ध्योपासनं ते इष्टसाधनम्, तस्मात् त्वं कुरु**, इति इष्टसाधनविध्योः सहप्रयोगानापत्तिः। यतः **घटः कलशः अस्ति** इति वत् पर्यायाणां सहप्रयोगाभावात् ।

नापि इष्टसाधनत्वं लिङर्थः। इष्टसाधनत्वस्य लिङर्थत्वे तज्ज्ञानादेव प्रवृत्तिसिद्धेः, आचार्यप्रेरितोहं जलमानयामि इत्येवम् आचार्यादेः प्रेरकत्वं न स्यात्। अतः प्रवर्तना लिङर्थः। तया इष्टसाधनत्वमनुमीयते।

यदि इष्टसाधनत्वमात्रं विध्यर्थः इति स्वीक्रियते, तत्र कुतः कृतिसाध्यत्वस्य न विध्यर्थत्वम्, एवं कृतिसाध्यत्वेष्टसाधनत्वयोः विनिगमनाविरहोपि स्यात्।

पचति इत्यत्र **पच्** धात्वर्थः पाकः, **त्त** प्रत्ययार्थः कृतिः, तस्यां धात्वर्थस्य अनुकूलतासम्बन्धेनान्वयः। तथा च पाकानुकूला कृतिः इति यदा उच्यते तदा कृतिसाध्यः पाकः इत्यपि अवगम्यते। एवं पाकानुकूलत्वस्य आख्यातार्थे कृतौ भानेन समानसंवित्संवेद्यतया पाकेपि कृतिसाध्यत्वस्य भानात् अन्यलभ्यत्वात् कृतिसाध्यत्वं न लिङर्थः।

**शाब्दिकास्तु** प्रवृत्यनुकूलव्यापाररूपायां प्रवर्तनायां लिङः शक्तिः इति आमनन्ति। **विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्। लिङर्थे लेट्। लोट् च।** इति विध्याद्यर्थेषु लिङादीन् विदधाति पाणिनिः। तत्र विधिः नाम निकृष्टस्य प्रेरणम्। निमन्त्रणम् – अनिष्टसाधनीभूत-अकरणप्रतियोगित्वा-नुमापकप्रवर्तकेच्छा। यथा श्राद्धादौ दौहित्रादेः प्रेरणा। आमन्त्रणं कामचारानुज्ञा। अधीष्टम् – उत्तमं प्रति प्रेरणा, सत्कारपूर्वको व्यापारो वा। एतेषु चतुर्षु अन्यदीयप्रवृत्तिजननानुकूलव्यापारत्वरूपस्य प्रवर्तनात्वस्य अनुगतत्वेन तेनैव रुपेण एका शक्तिः। सम्प्रश्नप्रार्थनयोः तु अतिरिक्ता लिङः शक्तिः इति। किं त्वम् अधीयीथाः। भवति मे प्रार्थना वेदम् अधियीय इति सम्प्रश्नप्रार्थनयोः प्रवर्तनात्वाभावात्। यथा-

 ISSN – 2249-538X

**अस्ति प्रवर्तनारूपम् अनुस्यूतं चतुर्ष्वपि ।**

**तत्रैव लिङ्विधातव्यः किं भेदस्य विवक्षया ॥**

**अभिनवास्तु** यद्यपि निमन्त्रणादीनां निरूपणं विध्यपेक्षया पृथक् कृतम्, तथापि सर्वेषु अर्थेषु अनुस्यूतं प्रवर्तनासामान्यं विद्यते, तदेव विध्यर्थः इति ब्रुवन्ति ।

**प्रवर्तनायां लिङ् इत्यवं सुवचम्** इति दीक्षितोपि अमुमेव पक्षं पोषयति। भगवता भाष्यकारेणापि विधिः नाम **प्रेरणा** इत्युक्तम्।

**खण्डदेवाचार्यैस्तु** लिङादिनिष्ठः अलौकिको धर्म एव प्रवर्तनात्वेन लिङादिवाच्यः, तज्ज्ञानं प्रवृत्तिं प्रति कारणम् इति मन्यते।

प्रवर्तानारूपव्यापारविशेषः एव विध्यर्थः इति **न्यायसुधाकाराणा-माशयः**। तर्हि पक्षेस्मिन् **अभिधाभावनामाहुः अन्यामेव लिङादय** इत्यस्याः पङ्क्तेः कः अर्थ इत्युक्ते अभिधीयते अनेन इति व्युत्पत्या अभिधा नाम विधिः। तद्व्यापारात्मिका भावना लिङादिवाच्या इत्यर्थः।

अभिदधाति इति अभिधा शब्दः, अभिधायाः शब्दस्य भावना। लिङादयः अभिधाख्यां भावनां प्रवर्तनाम् अभिदधते।

प्रवर्तनापक्षे तु अभिधीयत इति अभिधा **प्रवर्तना**, अभिधा च सा भावना अभिधाभावना। सा तु पुरुषप्रवृत्तिं जनयति। लिङ्शब्दः स्व**व्यापार**रूपमर्थम् अभिदधाति इति अभिधा तस्याः भावना अभिधाभावना इत्यर्थः ।

****************

# अपूर्वसद्भावनिरूपणम्

**डा. एस्. वेङ्कटेशताताचार्यः**
सहायकाचार्यः, मीमांसाविभागः
राजीवगान्धीपरिसरः, शृङ्गेरी

पूर्वमीमांसाया द्वितीयाध्यायस्य प्रथमपादस्य तृतीयेऽधिकरणे अपूर्वस्यास्तित्वं साधितम् । अपूर्वं नाम पुण्यमिति पापमिति वा व्यवह्रियमाणं यागादिविहितपदार्थेभ्यः कलञ्जभक्षणादिनिषिद्धपदार्थेभ्यश्च जायमानं वस्तु, यद्द्वारा यागादयः स्वर्गादिरूपमिष्टं फलं कलञ्जभक्षणादयो नरकादिरूपमनिष्टं फलञ्चोत्पादयन्ति ।

इतः पूर्वस्मिन् भावार्थाधिकरणे[1] "यजेते"त्यादौ यागादिधात्वर्थस्यैव फलभावनायां करणत्वेन अन्वयात् यागादेरेव अपूर्वद्वारा फलजनकत्वमिति सिद्धान्तितम् । अस्मिन् [2]अपूर्वाधिकरणे अपूर्वमेव नास्तीति पूर्वपक्षेण पूर्वोक्तसिद्धान्त आक्षिप्यत इति पूर्वाधिकरणेन अस्याधिकरणस्य आक्षेपिकी सङ्गतिः ।

अत्रायं पूर्वः पक्षः- अपूर्वे प्रमाणाभावादपूर्वमेव नास्ति । न हि प्रत्यक्षादिप्रमाणेन अपूर्वमुपलभ्यते । ननु प्रत्यक्षादिप्रमाणाभावेऽपि अर्थापत्तिप्रमाणेन अपूर्वं ज्ञायते । तथाहि- "स्वर्गकामो यजेते"त्यादिवाक्यैः यागादेः स्वर्गादिसाधनत्वमवगम्यते । परन्त्विदमपूर्वरूपमवान्तरव्यापारं विना

[1] पूर्वमीमांसाधिकरणम्- २/१/२

[2] पूर्वमीमांसाधिकरणम्- २/१/३

 ISSN – 2249-538X

नोपपद्यते। यागो हि क्षणिकः स्वोत्पत्तिक्षणात् तृतीयक्षणे नश्यति। स्वर्गस्तु न तदानीमुत्पद्यते, किन्तु कालान्तरे एव। एवं सति कथं यागः स्वर्गसाधनं स्यात्, कार्याव्यवहित पूर्वक्षणवृत्तित्वनियमात् कारणस्य । अपूर्वस्वीकारे तु यागस्य साक्षात् स्वर्गोत्पत्तिपूर्वक्षणावृत्तित्वेऽपि स्वजन्यापूर्वद्वारा स्वर्गोत्पत्तिपूर्वक्षणवृत्तित्वसंभवात् स्वर्गजनकत्वमुपपद्यते । तस्मात् यागस्य फलसाधनत्वान्यथानुपपत्त्या अर्थापत्ति-प्रमाणेन अपूर्वं सिद्ध्यतीति चेन्न । क्लृप्तस्य यागध्वंसस्यैव अवान्तरव्यापारत्व -स्वीकारेण यागस्य स्वर्गसाधनत्वोपपत्तौ अर्थापत्तेरप्यप्रवृत्तेः । न च ध्वंसस्य नित्यत्वेन स्वर्गोपभोगानन्तरमपि पुनः स्वर्गान्तरोत्पत्तिप्रसङ्गः इति वाच्यम् । तत्कारणव्यक्तिजन्यफलव्यक्तेः ध्वंसस्य तत्कारणव्यक्तिजन्यफल-व्यक्त्यन्तरोत्पत्तिप्रतिबन्धकत्वात् । अतः ध्वंसस्यैव अवान्तरव्यापारत्व-सम्भवात् अपूर्वं नास्तीति।

अथ सिद्धान्त उच्यते- यदि यागध्वंसस्यैव अवान्तरव्यापारत्वं स्वीक्रियेत तर्हि “धर्मः क्षरति कीर्तनात्” इति वचनमनुपपन्नं स्यात्। अनेन वचनेन “मया यागः कृत” इत्यादिकथनरूपकीर्तनेन धर्मो नश्यतीति उच्यते। अत्र धर्मशब्देन अवान्तरव्यापार एव स्वीकार्यः, न तु यागः। तस्य क्षणिकत्वेन स्वतो विनाशित्वेन कीर्तननाश्यत्वाभावात्। यदि ध्वंस एव अवान्तरव्यापारः, तर्हि तस्य नित्यत्वेन कीर्तनेन तन्नाशकथनमनुपपन्नं स्यात् । अतः कीर्तनादिनाश्यं यागेन स्वर्गे जननीये अवान्तरव्यापाररूपमपूर्वमेव स्वीकर्तव्यमिति अर्थापत्तिप्रमाणेन सिद्धमपूर्वमिति।

ननु नाशयोग्यस्य अपूर्वरूपस्य व्यापारस्य अभावेऽपि "धर्मः क्षरति कीर्तनादि"त्यादिवचनानां लक्षणया उपपत्तिर्वक्तुं शक्यते। तथाहि- क्षरतीत्यत्र नाशवाचिनः क्षरधातोः फलोपधायकत्वाभावे लक्षणा स्वीक्रियते चेत् कीर्तनप्रयोज्यफलोपधायकत्वाभावाश्रयत्वं धर्मवृत्ति इति अस्माद्वाक्याद्बोधः फलति । अत्र च न काचिदनुपपत्तिः । कीर्तनस्य प्रतिबन्धकत्वाङ्गीकारेण ध्वंसरूपव्यापारद्वारा फलजनकस्य यागादेः सत्त्वेऽपि कीर्तनसत्त्वे यागादिधर्मेण फलानुपधानादिति चेत्, सत्यम् । तथापि प्रतिबध्यप्रतिबन्धकभावस्य निरूपयितुमशक्यत्वादपूर्वं स्वीकर्तव्यम्। तथा हि- यदि ज्योतिष्टोमकीर्तनं स्वर्गस्य प्रतिबन्धकमिति उच्यते, तर्हि यः ज्योतिष्टोमं दर्शपूर्णमासौ च कृत्वा ज्योतिष्टोमकीर्तनं कुर्यात् तस्य दर्शपूर्णमासाभ्यामपि स्वर्गोत्पत्तिर्न स्यात्, ज्योतिष्टोमकीर्तनरूपप्रतिबन्धकसत्त्वात् । अथ ज्योतिष्टोमजन्यः स्वर्गो विजातीयः, दर्शपूर्णमासजन्यश्च विजातीयः, अतः ज्योतिष्टोमकीर्तनं विजातीयस्वर्गस्य प्रतिबन्धकमित्युच्यते, तथापि यो द्विः ज्योतिष्टोमस्य अनुष्ठानं करोति एकस्य च प्रयोगस्य कीर्तनं करोति, तस्य एकोऽपि विजातीयस्वर्गो न स्यात् । तज्ज्योतिष्टोमप्रयोगकीर्तनं तज्ज्योतिष्टोमप्रयोगजन्यस्वर्गव्यक्तेः प्रतिबन्धकमिति प्रतिबध्यप्रतिबन्धक-भावस्तु वक्तुं न शक्यते । कीर्तनसत्त्वे तज्ज्योतिष्टोमप्रयोगजन्यफल-व्यक्तेरुत्पत्त्यसंभवेन प्रतिबध्यस्यैव अप्रसिद्धत्वात्। अपूर्वस्वीकारे तु यद्यपि प्रतिबध्यप्रतिबन्धकभावस्थाने तद्व्यक्तिकीर्तनं तद्व्यक्तिजन्यापूर्वनाशं प्रति कारणमिति कार्यकारणभावः कल्पनीयः , परन्तु तत्र पूर्वोक्ताप्रसिद्धि-रूपबाधकं नास्ति।

 ISSN – 2249-538X

अथ प्रतिबध्यप्रतिबन्धकभावमकल्पयित्वा "कीर्तनात्यन्ताभाव - विशिष्टज्योतिष्टोमव्यक्तिः विजातीयस्वर्गं प्रति कारणमि"ति कार्यकारणभावं कल्पयामः । न चैवमपि सामानाधिकरण्येन कीर्तनात्यन्ताभावविशिष्टो ज्योतिष्टोमः विजातीयस्वर्गं प्रति कारणमिति वक्तव्यम् । तथा च पूर्वोक्ते स्थले (ज्योतिष्टोमप्रयोगद्वयानुष्ठाने तत्रान्यतरस्यैव कीर्तने) व्यतिरेकव्य-भिचारस्तदवस्थः । द्वितीयस्यापि प्रयोगस्य प्रथमप्रयोगीयकीर्तन-सामानाधिकरण्येन, सामानाधिकरण्येन कीर्तनात्यन्ताभाव-विशिष्टज्योतिष्टोमरूपकारणाभावात् । यदि तद्व्यक्तिकीर्तनाभावविशिष्ट-तज्ज्योतिष्टोमव्यक्तिः विजातीयस्वर्गं प्रति कारणमित्युच्यते तदापि यद्व्यक्तिः नैव कीर्तिता तत्कीर्तनस्यैव अप्रसिद्धेः , तदभावस्यापि प्रतियोग्यप्रसिद्ध्या अप्रसिद्धेः, तद्विशिष्टज्योतिष्टोमतद्व्यक्तिरूपकारणस्यैवाप्रसिद्धिरिति वाच्यम् । कीर्तनविषयभिन्नज्योतिष्टोमत्वस्य कारणतावच्छेदकत्वस्वीकारेणादोषादिति चेदत्रोच्यते -

कीर्तनात्यन्ताभावविशिष्टज्योतिष्टोमस्य कारणत्वकल्पने विशेष्यविशेषण-भावे विनिगमनाविरहेण कीर्तनात्यन्ताभावविशिष्ट-ज्योतिष्टोमस्य ज्योतिष्टोमविशिष्टकीर्तनात्यन्ताभावस्य च कारणत्वं वक्तव्यमिति कार्यकारणभावद्वयं कल्पनीयम् । "ज्योतिष्टोमेन स्वर्गकामो यजेत" इति वाक्यमेव ज्योतिष्टोमस्य विशेष्यत्वे विनिगमकमिति स्वीकारे, दर्शितरीत्या व्यतिरेकव्यभिचारात् कीर्तनविषयभिन्न-ज्योतिष्टोमत्वस्यैव कारणतावच्छेदकत्वस्वीकारे वा यद्यपि न कार्यकारणभावानेकत्वं, तथापि कारणतावच्छेदकगौरवं तु भवत्येव ।

अतः लाघवार्थं जोतिष्टोमत्वेन कारणत्वं स्वीकृत्य द्वारत्वेन अपूर्वस्वीकरणमेव उचितम् । ननु सिद्धान्ते "अपूर्वनाशं प्रति कीर्तनं कारणमि"ति अतिरिक्तः कार्यकारणभावः कल्पनीय इति गौरवमिति चेत्, सत्यम् । फलमुखत्वेन तद्गौरवस्य अदोषत्वेन तत्स्वीक्रियते । तथाहि- "धर्मः क्षरति कीर्तनात्" इत्यत्र नाशवाचिनः क्षरधातोः मुख्यार्थस्वीकाररूपफलवशात् अपूर्वस्वीकारप्रयुक्तम् अपूर्वनाशकीर्तनयोः कार्यकारणभावकल्पनप्रयुक्तं च गौरवमापद्यत इति तयोः फलमुखत्वान्न दोषावहत्वम् ।

नन्विदम् भाट्टरहस्योक्तरीत्या "वेदबोधितेष्टसाधनताकत्वं धर्मपदशक्यतावच्छेदकम्, तच्च यागादौ अपूर्वे च वर्तत इति उभयोरपि धर्मपदशक्यत्वमि"[1] ति स्वीकरे युज्यते । धर्मपदस्य यागादावेव शक्तिः तज्जन्यापूर्वे तु लक्षणैवेति मते सिद्धान्ते "धर्मः क्षरति कीर्तनादि"त्यत्र क्षरधातोः लक्षणाभावेऽपि धर्मशब्दस्य अपूर्वे लक्षणा स्वीकर्तव्यैव । पूर्वपक्षे क्षरधातोः फलोपधायकत्वाभावे लक्षणास्वीकारेऽपि धर्मपदस्य यागादिशक्यार्थबोधकत्वेन न लक्षणेति पूर्वपक्षे सिद्धान्ते च तुल्यैव अन्यतरत्र लक्षणेति चेत्, उच्यते – यत्तावत् भाट्टरहस्ये अपूर्वस्यापि धर्मपदशक्यत्वमुक्तं, तस्यायमभिप्रायः-स्वर्गकामो यजेतेति वाक्यावगतस्य यागस्वर्गसाध्य-साधनभावस्य अन्यथानुपपत्त्या यदपूर्वं सिद्ध्यति, तद्वाचकपदमध्याहृत्य यागेन अपूर्वं कृत्वा स्वर्गं भावयेदित्यर्थः उच्यते । प्रथमावगतश्रौतवाक्यार्थान्यथानुपपत्त्या प्रतीतोऽर्थः श्रुतितात्पर्यविषयत्वात् लक्षणादिना श्रुतवाक्येनैव बोध्यत इति मीमांसकमर्यादा । अत एव

[1] भाट्टतन्त्ररहस्ये धर्मलक्षणप्रकरणान्ते

 ISSN – 2249-538X

"औदुम्बरो यूपो भवति"[1] इत्यत्र यूपकर्तृकभवनादीप्तभावनायां यूपस्यैव भाव्यत्वमुचितमित्यतः "औदुम्बरेण यूपं भावयेत्" इत्यर्थः तस्य वाक्यस्य लक्षणया स्वीकृतः भाट्टदीपिकायाम् औदुम्बराधिकरणे[2] । अपि च स्वर्गकामकर्तृक-यागानुकूलभावनाविषयकप्राथमिकबोधे जातेऽपि षष्ठाद्यन्यायेन तत्रानुपपत्तिवशात् लक्षणया याग-करणकस्वर्गभाव्यकभावनाबोधः स्वीक्रियते "स्वर्गकामो यजेते"ति वाक्यात् । तत्र प्राथमिकबोधस्वीकारे "अन्वयश्चात्र प्राथमिकबोधविषयीभूत एव विवक्षितः । तेन......... लक्षणानुपपत्तेः"[3] इत्यादिभाट्टरहस्यपङ्क्त्य एव प्रमाणम् । प्रकृते च प्राथमिकवाक्यार्थान्यथानुपपत्त्या कल्पितमपूर्वस्य द्वारत्वं लक्षणया बोधयितुं न शक्यत इति "अपूर्वं कृत्वा" इति पदाध्याहारेण बोध्यते । इदमेवाभिप्रेत्योक्तं कौस्तुभे – "तच्च यागेन अपूर्वं कृत्वा स्वर्गं कुर्यात्" इति श्रुतार्थापत्तिकल्पितवैदिकशब्दगम्यत्वादेव नाप्रामाणिकम्"[4] इति । एतत्कौस्तुभपङ्क्तिबलात् अपूर्वे श्रुतिरेव प्रमाणमिति तु वक्तुं न शक्यते। पदार्थे शाब्दबोधीयविषयतासत्त्वेऽपि पदार्थस्य पदजन्यस्मृतिविषयत्वेन शब्दजन्यप्रमाविषयत्वाभावात् वाक्यस्य पदार्थे प्रामाण्यानुपपत्तेः । अत एव पदार्थसंसर्गे संसृष्टपदार्थे एव वा वाक्यस्य प्रामाण्यव्यवहारः । अतः अपूर्वरूपेऽर्थे श्रुतार्थापत्तिरेव प्रमाणम् ।तस्य च अध्याहृतपदबोध्यत्वमप्यस्तीत्येव कौस्तुभपङ्क्तेराशयः । तथा च

[1] तैत्तरीयसंहिता (२.१.१)

[2] पूर्वमीमांसाधिकरणम् (१.२.२)

[3] भाट्टतन्त्ररहस्ये प्रथमाप्रयोजकविचारे (पृ.सं. ४२)

[4] मीमांसाकौस्तुभे अपूर्वाधिकरणे (पृ.सं. ५१)

अध्याहृतपदघटितश्रुतिवाक्यात् अपूर्वस्य स्वर्गसाधनत्वमवगतमिति तस्य वेदबोधितेष्टसाधनताकत्व-रूपधर्मपदशक्यतावच्छेदकसत्त्वात् धर्मपदवाच्यत्वमिति। परन्तु "यो हि यागमनुतिष्ठति, तं धार्मिकं समाचक्षते"[1] इति भाष्यं, तद्व्याख्यारूपं

"अन्यत् साध्यमदृष्ट्वैव यागादीननुतिष्ठतः।
धार्मिकत्वसमाख्यानं तद्योगादिति गम्यते॥"[2]

इति वार्तिकं च आलोचयामश्चेत् यागादिरेव धर्मः नतु तज्जन्यमपूर्वम् , तत्र च धर्मशब्दप्रयोगो लक्षणयैवोपपादनीयः। अतश्च तत्र धर्मलक्षणस्य अतिव्याप्तिं वारयितुं "वेदबोधितापूर्वद्वारकेष्टसाधनताकत्वमि" ति परिष्कारः कर्तव्यः। वेदबोधिता अपूर्वद्वारिका इष्टसाधनता यस्य तत्त्वमित्यर्थः। अपूर्वस्य च इष्टसाधनत्वं नापूर्वद्वारेति न तत्रातिव्याप्तिः।

एवं प्रयोगमनुसृत्य शब्दस्य शक्तिं निर्धार्य अर्थस्य लक्षणं कथनीयम् , न तु लक्षणं कृत्वा तत्सत्त्ववशात् अर्थस्य शक्यत्वनिर्धारणम्। अतः पूर्वोक्तरीत्या अशक्ये धर्मलक्षणगमनात् तत्र परिष्कारः एव कर्तव्यः। एवं सति यद्यपि पूर्वपक्षे सिद्धान्ते च "धर्मः क्षरति कीर्तनादि"त्यत्र एकैकस्मिन् पदे लक्षणा तुल्यैव भवति , तथापि "गुणे त्वन्याय्यकल्पने"[3]ति न्यायेन प्रधानभूताख्यातान्तपदे लक्षणापेक्षया धर्मपदे लक्षणाया एव उचितत्वात् अपूर्वाङ्गीकरणमेव वरमिति।

---

[1] चोदनासूत्रभाष्यम्

[2] मीमांसाश्लोकवार्तिके, चोदनासूत्रे (श्लो.सं. १९२)

[3] पूर्वमीमांसासूत्रस्य "विप्रतिपत्तौ विकल्पः स्यात् गुणेतु अन्याय्यकल्पनैकदेशत्वात्" (९/३/१५) इत्यस्य एकदेशः


ISSN – 2249-538X

# नञर्थविमर्शः

**आचार्यः का. इ. मधुसूदनः**
न्यायविभागाध्यक्षः
राजीवगान्धीपरिसरः, शृङ्गेरी

प्रादयः उपसर्गाःप्रकर्षाद्यर्थद्योतका एव, न तु तद्वाचकाः, उपसर्गाणामवाचकत्वेऽपि कस्याप्यनुभवस्यापलापाभावात्। वाचकत्वे 'उपास्यते गुरुरि'त्यादौ गुर्वादिकर्मणोऽभिधानविरहात् कर्मणि लकारानुपपत्तेश्च।नञादिनिपाताःपरं समुच्चयादिवाचका एव।अन्यथा घटो न इत्यादितःशाब्दबोधानुपपत्तेः।एकपदवाच्ययोरर्थयोःशाब्दबोधासम्भवात्। पदद्वयार्थसंसर्गानुभवस्यैव शाब्दबोधरूपत्वात् इति **नैयायिकाः** आहुः।निपातानामपि संख्याऽभावादिवाचकत्वं न स्यादिति प्रतिबन्द्याः जागरुकत्वात् उपसर्गाणामपि वाचकत्वमेव, '**अनन्यलभ्यःशब्दार्थः**'इति न्यायस्य प्रतिबन्द्यादिदोषविरहस्थले एव प्रसरात् इति **कन्दलीकारमतानुयायिनः।शाब्दिकास्तु** चादीनां प्रादीनाञ्च वैषम्ये नियमकाभावात् निपातसामान्यस्यैव द्योतकता वाचकता वा युक्तेति वदन्ति। इह च प्रवन्धे निपातेषु अन्यतमस्य नञोऽर्थः निरूप्यते।

'भूतले घटो नास्ति' इत्यादौ घटादिसंसर्गाभावः प्रतीयते इति तादृशसमभिव्यवहारस्थले नञः संसर्गाभावोऽर्थः। 'पटो न घटः' इत्यादौ तु घटाद्यन्योन्याभावस्य प्रतीतेरन्योन्योभावः नञर्थः। उक्तञ्च दीधितिकृता **'संसर्गाभावोऽन्योन्याभावश्च नञर्थः'** इति। न चैवं सति नीलघटवति भूतले

रक्तघटप्रतियोगिकात्यन्ताभावस्य सत्वात् 'भूतले घटो नास्ती'ति प्रयोगापत्तिः। एवं नीलघटे रक्तघटप्रतियोगिकान्योन्याभावस्याक्षततत्वात् 'न घटः' इति प्रयोगापत्तिश्चेति वाच्यम् । नञादिसमभिव्याहारज्ञानस्य अन्वयितावच्छेदकावच्छिन्न-प्रतियोगिताकात्यन्ताभावान्योन्याभावविषयक-शाब्दबुद्धिं प्रत्येव हेतुत्वाङ्गीकारात् ।नीलघटवति च नञर्थान्वयिता-वच्छेदकीभूतशुद्धघटत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावस्य बाधेन 'घटो नास्ती'तिप्रयोगस्य प्रामाण्यापादनायोगात् । नीलघटे घटत्वावच्छिन्न-प्रतियोगिताकान्योन्याभावविरहेण 'न घटः' इति प्रयोगस्यापि प्रामाण्यापादना-योगात्।रक्तघटत्वस्यान्वयितावच्छेदकत्वविरहेण तदवच्छिन्नप्रतियोगिताका-न्योन्याभावसत्त्वस्याकिञ्चित्करत्वात्।

आवश्यकञ्चेदं नञःअन्वयितावच्छेदकावच्छिन्नप्रतियोगिता-काभावबोधकत्वम्। अन्यथा नीलघटवति शुद्धघटत्वावच्छिन्नाभावासत्त्वेन 'पीतो घटो नास्ती'तिप्रयोगस्यायोग्यतापत्तेः।'पीतो घटो न नीलः' इति प्रयोगस्यायोग्यतापत्तेश्च।उक्तव्युत्पत्त्यादरे तु पीतपदसमभिव्याहारलभ्य-पीतघटत्वरूपान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकाभावमादाय उक्तप्रयोगप्रामाण्यनिर्वाहःसुकरः।

प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमौ।यत्र धर्मिणि येन सम्बन्धेन येन रूपेण यद्वत्त्वं नञसत्त्वे प्रतीयते, नञ्समभिव्याहारे तत्र धर्मिणि तत्सम्बन्धावच्छिन्नतद्रूपावच्छिन्नतन्निष्ठप्रतियोगिताकाभावःनञा प्रत्याय्यते इति हि अनुभवसिद्धम्। यथा 'पचति चैत्र' इत्यत्र चैत्रे प्रथमान्तपदोपस्थाप्ये आख्यातोपस्थाप्यकृतित्वावच्छिन्नस्य समवायसम्बन्धेन प्रतीत्या चैत्रे

तत्सम्बन्धावच्छिन्न-(पाक)कृतित्वावच्छिन्नप्रतियोगिताकाभावः एव 'न पचति चैत्रः' इत्यत्र नञा बोध्यते । एवं चैत्रस्येदमित्यत्र इदमर्थे चैत्रनिरूपित-स्वत्वस्याश्रयतासम्बन्धेन भानात् 'नेदं चैत्रस्य' इत्यत्र इदमर्थे चैत्रनिरूपित-स्वत्वनिष्ठाश्रयतासम्बन्धावच्छिन्नप्रतियोगिताकाभावः नञा प्रत्याय्यते । चैत्रस्येदमित्यत्र च स्वत्वमेव षष्ठ्यर्थः, न तु स्वामित्वम्,तस्य चैत्रगतस्य धनाद्यवृत्तित्वेन चैत्रनिरूपितस्वामित्वनिष्ठाश्रयतासम्बन्धावच्छिन्नप्रतियोगि-ताकाभावस्य धनादावक्षतत्वेन चैत्रीयधनेऽपि 'नेदं चैत्रस्य' इति प्रयोगापत्तेः। स्वत्वस्य तदर्थत्वे तु तदभावस्य तत्र विरहेणोक्तापत्तिविरहात् । न च स्वामित्वस्य षष्ठ्यर्थत्वेऽपि न दोषः, तस्य निरूपकतासम्बन्धेन इदमर्थे नञसत्त्वे अन्वयोपगमेन नञ्समभिव्याहारे नञा निरूपकता-सम्बन्धावच्छिन्नप्रतियोगिताकतदभावस्यैव प्रत्यायनीयतया तस्य चैत्रीयधने बधितत्वात् इति वाच्यम् । निरूपकतायाः वृत्त्यनियामकतया वृत्त्यनियामक-सम्बन्धस्य अभावप्रतियोगिता-वच्छेदकत्वानङ्गीकारेण तत्सम्बन्धावच्छिन्न-प्रतियोगितायाः अप्रसिद्धेः।

एवं यत्राधाराधेयभावः न संसर्गमर्यादया भासते, तत्रानुयोगिवाचकपदोत्तरं सप्तमी अपेक्ष्यते । यथा 'भूतले घट' इत्यत्र घटभूतलयोः प्रतीयमानः आधाराधेयभावः न संसर्गतया भासते, निपातातिरिक्तनामार्थयोः साक्षात् भेदेनान्वयस्याव्युत्पन्नत्वात् । किन्तु प्रकारविधयैव । अतः 'भूतले न घटः' इत्यत्र भूतले घटसंसर्गाभावबोधे सप्तम्यन्तभूतलपदसमभिव्याहारज्ञानं कारणम् । 'भूतले न घटः' इत्यत्र च तात्पर्यवशात् कदाचित् भूतले घटाभावः, कदाचिच्च घटे भूतलवृत्तित्वाभावः

प्रतीयते। सप्तम्यन्तार्थप्रतियोगिकाभावस्यापि नञा बोधनादेव 'पृथिव्यां गन्धो न जले' इत्यत्र गन्धः पृथिवीवृत्तिः जलवृत्तित्वाभाववांश्च इत्येक-विशेष्यकप्रतीतेः जायमानत्वात् एकविशेष्यत्वानुभवः । अन्यथा गन्धाभावे जलवृत्तित्वबोधोपगमे अभावस्यैव विशेष्यतया 'पृथिव्यां गन्धः' इत्यत्र तु अभावविशेष्यकबोधानुत्पत्त्या तयोरेकविशेष्यकबोधजनकत्वानुभवासङ्गतिः स्यात्।

**यद्यपि** 'भूतले न घटः' इत्यत्र घटपदस्य घटप्रतियोगिके, तदुत्तरसुब्विभक्तेरेव प्रतियोगितायां लक्षणमूरीकृत्य घटप्रतियोगिकाभावो भूतलवृत्तिरिति बोधस्वीकारे लाघवमस्ति ; तच्च घटप्रतियोगिकत्वा-भाववानभावः प्रमेयः इति विशिष्टवैशिष्ट्यबोधं प्रति तादृशसमभिव्याहार-ज्ञानघटितशाब्दबोधसामग्र्याः प्रतिबन्धकत्वाकल्पनप्रयुक्तम् ; तादृश-सामग्रीसमवधाने हि दर्शितविशिष्टवैशिष्ट्य-बोधहेतुभूतविशेषणता-वच्छेदकप्रकारक-निश्चयरूपकारणस्य घटप्रतियोगिकत्वाभाववान् अभावः इत्याकारकस्य विरहादेव तथाविधबोधापत्तिः वारयितुं शक्यते; **तथापि** 'भूतले न घटः' इत्यत्र तादृशवाक्यजन्यस्याप्रामाण्यज्ञानानास्कन्दितस्य बोधस्य 'भूतले घट' इति वाक्यजन्यघटविशेष्यकभूतलवृत्तित्वप्रकारक-बोधप्रतिबन्धकत्वानुरोधेन घटे सप्तम्यन्तार्थभूतलवृत्तित्वान्वित-नञर्थाभाव-स्यान्वयबोधोऽपि स्वीक्रियते तात्पर्यवशात्। अन्यथा घटाभावे भूतलान्वित-सप्तम्यर्थाधेयत्वबोधस्य घटे भूतलवृत्तित्वबोधं प्रति असमानप्रकारक-त्वेनाप्रतिबन्धकतापत्तेः।

 ISSN – 2249-538X

अथ 'भूतले घटः' इति वाक्यात् घटे भूतलवृत्तित्वस्य प्रतीत्या 'भूतले न घटः' इति वाक्यात् घटे भूतलवृत्तित्वाभावः एव विशेषणतया भासते, न तु घटाभावे भूतलवृत्तित्वमपि इत्यङ्गीकार्यम्।एकाकारवाक्यस्य द्विविधबोध-जनकतोपगमे तादृशसमभिव्याहारज्ञानस्य द्विविधकारणताकल्पनापत्तेः। द्विविधबोधान्यतरत्वं कार्यतावच्छेदकीकृत्य करणतासम्भवेऽपि तादृश-वाक्यधर्मिकद्विविधवाक्यार्थतात्पर्यज्ञानस्य पृथक् करणतया कारणता-धिक्यस्य दुर्वारत्वात् ।

किञ्च 'भूतले घटो नास्ति', 'घटौ न स्तः', 'घटा न सन्ति' इत्यादौ विशेष्यविशेषणपदयोः समानवचनकत्वनियमेन सुप्तिङोः वचनसाम्यनियमः उपपद्यते ।यदि अभावस्य विशेष्यत्वमिष्यते, तर्हि तस्य ऐक्येन 'घटौ न स्तः' इत्यादौ द्विवचनादेरनुपपत्तिः । तस्मात् घटविशेष्यकभूतलवृत्तित्वाभाव-प्रकारकबोधस्वीकार एवोचितः इति चेत्,

तर्हि जातौ न सत्ता इत्यत्र बोधानुपपत्तिः।न हि तत्र सत्तायां जातिनिरूपितसमवायसम्बन्धावच्छिन्नवृत्तित्वाभावो नञा बोधयितुं शक्यः, जातिनिरूपितसमवाय-सम्बन्धावच्छिन्नवृत्तेरप्रसिद्धेः। नापि तन्निरूपित-सम्बन्धान्तरावच्छिन्नवृत्तित्वाभावः, सत्तायां जातिनिरूपितैकार्थसमवायादि-सम्बन्धावच्छिन्नवृत्तित्वस्यैव सत्त्वेन तदभावबोधने अप्रामाण्यापत्तेः।

यदि सत्तापदस्य सत्तासमवाये लक्षणामङ्गीकृत्य सप्तम्या अनुयोगित्वार्थकत्वं स्वीकृत्य जात्यनुयोगिकत्वाभाववान् सत्तासमवायः इत्यन्वयबोधःस्वीक्रियते,तर्हि लक्षणाकल्पनमेव दोषः।सिद्धान्ते तु सा न, सत्ताभावे जातिवृत्तित्वबोधे बाधकाभावात्।

न च भूतले 'घटौ न स्तः 'इत्यादौ अभावविशेष्यकबोधाङ्गीकारे पूर्वोक्तरीत्या द्विवचनाद्यनुपपत्तिरनिवार्या इति वाच्यम्।यथा क्रियापदस्य विशेष्यवाचकपदसमानवचनकत्वनियमःउपगम्यते तथा नञ्समभिव्याहृत-क्रियापदस्य प्रतियोगि-वाचकपदसमानवचनकत्वनियमोऽपि कल्प्यते इत्यदोषः।

नचैवमपिनञ्समभिव्याहारस्थले अभावविशेष्यकबोधाङ्गीकारे 'घटौ न स्तः' इत्यादौ अन्वयबोधोऽनुपपन्न एव।न हि तत्र भूतलवृत्तित्वविशिष्टस्य घटद्वयस्याभावःअस्तित्वाश्रयःइत्याकारकबोधःसम्भवति।घटद्वयवति भूतले तादृशप्रयोगापत्तेः।एतद्भूतलवृत्तिघटद्वयाभावस्य पर्वतादौ सत्त्वात् । नापि सप्तम्या निरुपितत्वबोधनेन एतद्भूतलनिरुपितवृत्तित्वाश्रयत्ववान् घटद्वयाभावः इत्याकारकान्वयबोधः उत्पत्तुमर्हति । सप्तम्या निरुपितत्वे लक्षणाकल्पनापत्तेरिति वाच्यम्।भूतलवृत्ति द्वित्वविशेषावच्छिन्नघटवृत्ति-प्रतियोगिताकाभावः अस्तित्वाश्रयः इत्याकारकबोधोपगमसम्भवेनादोषात् ।

**अन्योन्याभावबोधः**

यत्र वाक्ये विशेष्यविशेषणयोःअभेदान्वयः व्युत्पन्नः तत्रैव नञ्समभिव्याहारे नञा अन्योन्याभावः प्रत्याय्यते । यथा 'अयं घटो नीलः', 'नायं घटो नील' इति । अभेदान्वयबोधे च विशेषणवाचकपदसमान-विभक्तिकविशेष्यवाचकपदं विरुद्धविभक्तिराहित्यं वा प्रयोजकम् । प्रथमान्तत्वमित्यनुक्त्वा समानविभक्तिकत्वमिति कथनात् 'यजतिषु येयजामहं करोति, नानुयाजेषु' इत्यादौ एकविधेयार्थकत्वानुरोधात् येयजामहमित्यस्यानुषङ्गे गौरवाच्च यजतिषु अनुयाजभेदो बोध्यते ।

 ISSN – 2249-538X

नञान्योन्याभावबोधने हि अनुयाजभिन्नेषु यागेषु येयजामहपदव-न्मन्त्रकरणरूपैकार्थत्वसम्भवेन एकविधेयकत्वरूपमेकवाक्यत्वमुपपद्यते । तेन निषेधबोधने तु नैवम् । यागेषु येयजामहपदवन्मन्त्रकरणं विधीयते, अनुयाजेषु तन्निषिध्यते इति विधेयभूतार्थद्वैविध्यात् भिन्नवाक्यत्वापत्तेः । विशेषणविभक्तिस्तु प्रयोगसाधुत्वार्था । तस्मात् 'यजतिषु' इत्यादौ पर्युदास एव । अभावस्याविधेयतया प्राधान्याभावेन प्रसज्यप्रतिषेधाभावात् ।

**अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ।**

**प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥**

इति प्रसज्यप्रतिषेधलक्षणात् ।

**विकल्पापत्त्या पर्यदासाश्रयणमिति पक्षनिरासः**

**केचित्तु** 'यजतिषु येयजामहं करोति, नानुयाजेषु' इत्यादौ नञः निषेधबोधकत्वे 'अनुयाजेषु येयजामह' इति पदघटितमन्त्रस्य विकल्पापत्तिः । 'यजतिषु येयजामहं करोति' इति विधिना यागसामान्ये तत्प्राप्त्या तदन्तर्गतानुयाजेष्वपि तत्प्राप्त्या 'नानुयाजेषु' इत्यनेन तत्र तस्य प्रतिषिद्धत्वात् । तस्मात् न तत्र नञः निषेधबोधकत्वम् । किन्तु भेदबोधकत्वमेवेति युक्तिं **प्रदर्शयन्ति**।

**तन्न युक्तम्** । विशेषनिषेधे सामान्यविधेस्तदितपरतायाः व्युत्पत्तिसिद्धत्वेन विकल्पाप्रसक्तेः । 'ब्राह्मणेभ्यो दधि दातव्यम्, न कौण्डिन्याय दातव्यम्' इत्यादौ विशेषनिषेधस्थले हि यथा 'ब्राह्मणेभ्यो दातव्यमि'ति सामान्यविधेः कौण्डिन्यातिरिक्तब्राह्मणसम्प्रदानक-दधिदानबोधकत्वं स्वीक्रियते, तथा प्रकृतेऽपि सामान्यविधेः

अनुयाजव्यतिरिक्तयागेषु येयजामहपदघटितमन्त्रकरणप्रतिपादकत्व-स्वीकारौचित्यात् अनुयाजे तादृशमन्त्रकरणाप्राप्त्या विकल्पानवकाशात्।

विशेषनिषेधस्थले सामान्यविधेः विशेषतरसामान्यपरतायाः व्युत्पन्नत्वादेव रात्रौ श्राद्धं न कुर्वीत इत्यादौ रात्रौ श्राद्धकरणनिषेधेऽपि न विकल्पप्रसक्तिः । अन्यथा हि अमावास्यायां पितृभ्यो दद्यादित्यनेन रात्रौ श्राद्धकरणप्राप्त्या रात्रौ श्राद्धं न कुर्वीत इत्यनेन रात्रिश्राद्धकरणनिषेधस्य च प्राप्त्या तत्र तत्करणस्य विहितप्रतिषिद्धत्वात् विकल्पो दुर्वारः स्यात्। अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृहाति, इत्यत्र तु एकविषयकतया गत्यन्तरविरहात् विकल्पः आश्रीयते । न ह्यत्र षोडशिग्रहणस्य इष्टसाधनत्वाभावः नञा बोधयितुं शक्यः, ग्रहणविधिविरोधात् । किन्तु षोडशिग्रहणाभावस्य इष्टसाधनत्वमेव बोधनीयम् । नञ्समभिव्याहृत-धात्वर्थाभावेऽपि विभक्त्यर्थान्वयस्य व्युत्पन्नत्वात्।

**प्राचीनमते** ध्वंसप्रागभावयोरत्यन्ताभावविरोधितोपगमेन तदधिकरणे अत्यन्ताभावासत्त्वेन तत्र घटो नास्तीति प्रतीतेरत्यन्ता-भावविषयकत्वासम्भवेन ध्वंसप्रागभावान्यतरविषयकत्वावश्यम्भावात् तयोरपि नञ्पदवाच्यतया **संसर्गाभावः** इति **दीधितिकारेणो**क्तम्।

**नवीनैस्तु** ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वे मानाभावेन ध्वंसप्रागभावाधिकरणे घटो नास्तीति प्रतीतेः अत्यन्ताभावविषयकत्वे बाधकाभावात् अत्यन्ताभावः अन्योन्याभावश्च नञर्थः इत्येव स्वीक्रियते । यत्किञ्चिद्घटवति घटो नास्तीतिप्रतीतिवारणाय नञ्समभिव्याहारे अन्वयिता-वच्छेदकावच्छिन्नप्रतियोगितानिरूपितानुयोगितासम्बन्धेनैव अभावांशे

 ISSN – 2249-538X

प्रतियोगिनः भानं स्वीकार्यम् । गरुधर्मस्याप्यभावप्रतियोगिता-वच्छेदकतायाः अनुभवबलेन स्वीकारेण कम्बु ग्रीवादिमान्नास्तीति-प्रतीतेरुपपत्तिः । कम्बुग्रीवादिमत्त्वं गुरु इति ज्ञानदशायामपि तादृशप्रतीते-रुदयात्। ’पीतः शङ्खः’ इत्यत्र पीतपदस्य पीतत्वप्रकारकज्ञानविषये लाक्षणिकत्वेन नञा पीतत्वप्रकारकज्ञानविषयत्वविशिष्टशङ्खत्वावच्छिन्न-प्रतियोगिताकाभावस्यैव नञा प्रत्यायनात् पीतशङ्खत्वस्याप्रसिद्ध्या अन्वयितावच्छेदकत्वासम्भवेऽपि न क्षतिः। ’पुष्करिण्यां जलं नास्ति’ इत्यत्र जलपदस्य प्रकृष्टजलत्वावच्छिन्ने, ’चैत्रस्य ज्ञानं नास्ति’ इत्यत्र ज्ञानपदस्य शास्त्रजन्यज्ञानविशेषे, ’तस्माद्यज्ञे वधोऽवधः’ इत्यत्र वधपदस्य पापसाधनत्वावच्छिन्ने च लक्षणोपगमान्न बोधानुपपत्तिः ।

**पर्युदासप्रसज्यप्रतिषेधयोः नैयायिकाभिप्रायः**

**पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ।**

**प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥**

इति दर्शितस्य पर्युदासः प्रसज्यप्रतिषेधश्च नञर्थः इति मीमांसकानां प्रवादस्यापि अन्योन्याभावः, अत्यन्ताभावश्च नञर्थ इत्यत्रैव तात्पर्यम् ।पर्युदासः ’यजतिषु येयजामहहं करोति’ इत्यादौ प्रसिद्धः। नञा तत्रान्योन्याभावबोधनात्। प्रसज्यप्रतिषेधस्तु ’रात्रौ श्राद्धं न कुर्वीत’ इत्यादौ नञा लिङर्थेष्टसाधनतान्वय्यत्यन्ताभावबोधनात्। रात्रिश्राद्धकरण-मिष्टसाधनत्वाभाववदित्येव प्रतीतेः। न चाप्रसक्तस्य प्रतिषेधानुपपत्तिः शङ्क्या। यदि निषेधो न स्यात् तदा ’अमावास्यायां पितृभ्यो दद्यात्’ इति वाक्यस्य रात्रीतरपरतानुपपत्तेः रात्रिश्राद्धं प्रसज्येत इति आपादितप्रसक्तेः

सत्त्वात्।'न पृथिव्यां नान्तरिक्षे हिरण्यं निधायाग्निश्चेतव्यः' इत्यादौ अन्तरिक्षे अग्निचयनस्याप्रसक्तस्यापि प्रतिषेधाङ्गीकारेण 'प्रसक्त एव प्रतिषिध्यते' इति नियमे मानाभावाच्च । किञ्च तादृशनियमसत्त्वेऽपि न दोषः। तस्य हि यद्धर्मम् अन्वयितावच्छेदकीकृत्य शास्त्रतो लोकतो वा इष्टसाधनत्वमवगम्यते तद्धर्माश्रये एव धात्वर्थे इष्टसाधनत्वात्यन्ताभावसंसर्गः विधिसमाभिव्याहृतनञा बोध्यते, न तु तदाश्रये धात्वर्थे इत्येवार्थः। एवं च अमावास्याश्राद्धत्वस्य रात्रिश्राद्धेऽपि सत्त्वात् न तादृशनियमभङ्गप्रसङ्गः।

**प्राचीनवैयाकरणमतम्**

**प्राचीनवैयाकरणानामयमाशयः -** अभावस्य नञर्थत्वे 'अघटः' इत्यादौ घटभिन्नः इति बोधस्वीकारप्रसङ्गेन पूर्वपदार्थप्राधान्यात् तत्पुरुषस्य उत्तरपदार्थप्राधान्यनियमभङ्गापत्तिः। एवम् 'असः' इत्यादौ सर्वनामसंज्ञा न स्यात्, तद्भिन्नः इत्यर्थे स्वीक्रियमाणे तच्छब्दार्थस्य पूर्वपदार्थविशेषणतया तच्छब्दस्य उपसर्जनत्वेन 'संज्ञोपसर्जनीभूतास्तु न सर्वादय' इति सर्वादिबहिर्भूतत्वात्। न चेष्टापत्तिः, सर्वनामसंज्ञाप्रयुक्तस्मायादि-कार्याभावप्रसङ्गात्। तस्मात् आरोपितत्वं नञर्थः। तस्योत्तरपदार्थे विशेषणतया अन्वयात् उत्तरपदार्थप्राधान्यं सुस्थम्। **अथवा** आरोपमात्रं नञर्थः। विषयत्वं तु संसर्गतया भासते। एवं च 'अघट' इत्यत्र आरोपितो घट इत्याकारकः एव बोधः। 'असः' इत्यादौ तत्पदार्थस्य विशेष्यत्वात् सर्वनामसंज्ञायां बाधकविरहेण स्मायादिकार्योपपत्तिः। 'घटो नास्ती'त्यादौ आरोपितं घटास्तित्वमित्यादिः बोधः। आर्थिकं मानसं घटाभावबोधमभिप्रेत्य नञर्थविशेष्यकबोध इति व्यवहारः इति।

 ISSN – 2249-538X

## नव्यवैयाकरणमतम्

**नागेशभट्टास्तु** असमासे घटो नास्तीत्यादौ नञः अभाववाचकत्वमेव। अनुभवसिद्धाभाव-बुद्धेरपलापायोगात्। आरोपितत्वार्थकत्वं तु समासस्थले एव ।तावतैव ’असः’ इत्यादौ सर्वनामकार्यस्य अघट इत्यादौ उत्तरपदार्थप्राधान्यस्य च रक्षणात् इति सप्रपञ्चमुपपादयामासुः।

**अत्र न्यायकौस्तुभकाराणामभिप्रायः**

नञ्समभिव्याहारस्थले सर्वत्र अभावबुद्धेरनुभवसिद्धत्वात् अनुगताननतिप्रसक्तस्य आरोपितत्वस्य दुर्वचत्वात् गौरवाच्च अभाव एव नञर्थः। न च ’अघट’ इत्यादेः तत्पुरुषस्य उत्तरपदार्थप्राधान्यभङ्गापत्तिरिति वाच्यम् ।’अर्धपिप्पली’त्यादौ पूर्वपदार्थप्राधान्यस्य दृष्टत्वेन तादृशनियमस्यासिद्धेः। ’अस’ इत्यादौ **‘एतत्तदोः सुलोपोऽकोरनञ्समासे हलि’**[1] **हलि’**[1] इति सूत्रे अनञ्समासग्रहणरूपज्ञापकादेव सर्वनामसंज्ञा सिध्यति । यतः यतः ’असः’ शिवः इत्यादौ न सः असः इति नञ्समासघटकः यः तच्छब्दः ततः परस्य सोर्लोपवारणाय अनञ्समासग्रहणम् । नञ्समासस्य यदि पूर्वपदार्थप्राधान्यं स्यात् तर्हि पूर्वोक्तरीत्या तच्छब्दस्य सर्वनामसंज्ञाविरहेण ततः परस्य सोः लोपस्य प्राप्तेरेवाभावात् अनञ्समासग्रहणं व्यर्थं स्यात् ।न च सर्वनामसंज्ञाभावेऽपि तच्छब्दात् परत्वादेव सोलोपस्य प्राप्तिरिति वाच्यम् । एतत्तदोः अकोः इतिविशेषणेन अकच्सहितयोःव्यावर्तकेन एतत्तदोःसर्वनामसंज्ञकयोरेव ग्रहणमिति ज्ञापनात् । तस्मात् ज्ञापकात्

---

[1]) पाणिनीयसूत्रम्- ६.१.१३२

तच्छब्दस्योपसर्जनत्वेऽपि सर्वनामसंज्ञायाःसिद्धौ स्मायादिकार्योपपत्तिः। तस्मात् अभाव एव नञर्थः।

**तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।**

**अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥**

अब्राह्मणः ,अपापम्, अनश्वः, अनुदरा कन्या, अपशवो वा अन्ये गो अश्वेभ्यः, अधर्मः इति क्रमेण इति उदाहरणानि इति **वैयाकरणोक्तमपि** न सम्यक्।सादृश्यादिबोधस्य लक्षणयैवोपपत्तौ नानाधर्मावच्छिन्ननानाशक्ति-कल्पनस्यान्याय्यत्वात्।तस्मात्अभावमात्रं नञर्थः इति **न्यायकौस्तुभकाराः** निरूपयन्ति।

संसर्गाभावत्वान्योन्याभावत्वनिरुक्तिः, प्रतियोगिज्ञानादेरभाव-बुद्धिहेतुत्वम् इत्यादिकमत्र प्रकरणग्रन्थेषु विचार्य निष्कर्षितं तत एवावगन्तव्यमिति समासः।

**अभावार्थविचाराणां भावस्तत्त्वेन निश्चितः।**

**अभानमन्यथाभानमभावं गमयिष्यति॥**

इति शम् ।

***************

 ISSN – 2249-538X

# उद्भिद्-प्राणसम्बन्धस्य विमर्शः

**डा. नवीनहोळ्ळः**

सहायकाचार्यः, न्यायविभागः

राजीवगान्धीपरिसरः, शृङ्गेरी

उद्भिदां तरुगुल्मलतादीनां शरीरत्वं स्मृतिपुराणेतिहासेषु प्रसिद्धम् । श्रूयते हि - नर्मदातीरसञ्जाताः सरलार्जुनपादपाः ।

नर्मदातोयसंस्पर्शात् ते यान्ति परमां गतिम् ॥

गुरुं हुंकृत्य त्वंकृत्य विप्रं निर्जित्य वादतः

श्मशाने जायते वृक्षः कङ्कगृध्रोपसेवितः ॥ इति ।

अत्र वृक्षावच्छेदेन कृतसत्कर्मणा जीवेन पुण्यलोकवासोपयोगि दिव्यशरीरप्राप्तिः , करचरणाद्यवयवविशिष्टशरीरावच्छेदेन कृतगुरुधिक्करादि-निषिद्धकर्मणा जीवेन कङ्कगृध्रोपसेवितश्मशानवृत्तिवृक्षसम्बन्धप्राप्तिश्च व्यासेन प्रत्यपादि । इत्थञ्च वृक्षादीनां मनुष्य(शरीर)वत् सत्कर्माचरणा-वच्छेदकत्वात् दुष्कर्मफलभोगावच्छेदकत्वाच्च शरीरत्वं सिद्ध्यति ।

एवं प्राणसम्बन्धेनाऽपि वृक्षादीनां शरीरत्वम् अनुमीयते । अनुमानप्रयोगस्तावत् – वृक्षः शरीरं प्राणसम्बन्धादिति तु न सम्भवति । प्राणसम्बन्धस्य कालिकस्य काले , समवायस्य प्राणावयवे विद्यमानतया व्यभिचारात् । प्राणसंयोगत्वेन हेतुत्वे गगने व्यभिचारः । मूर्तत्वविशिष्टप्राणसंयोगस्य हेतुत्वे मनसि व्यभिचारः । स्पर्शविशिष्ट-प्राणसंयोगस्य हेतुत्वे प्राणेषु व्यभिचारः, प्राणानां परस्परसंयोगसत्त्वात् ।

रूपविशिष्टप्राणसंयोगस्य हेतुत्वे ऊष्मणि क्वचिद् घटादौ च व्यभिचारः , श्वासात्मकस्य प्राणवायोः कदाचित् घटेऽपि संयोगसम्भवात् । जीवनयोनियत्नभिन्नस्मदीयप्रयत्नासाध्यत्वविशिष्टप्राण-संयोगस्य हेतुतायां निगीर्णान्नकबलादौ व्यभिचारः । तस्माद् अवच्छेदकता-सम्बन्धावच्छिन्नजन्यात्मविशेषगुणत्वावच्छिन्नकार्यतानिरूपितसमवायसम्बन्धावच्छिन्न कारणतावत्त्वेनैव रूपेण प्राणसंयोगस्य हेतुत्वम् उपगन्तव्यम् । तच्च रूपं प्राणशरीरसंयोगस्यैव सम्भवति, ज्ञानेच्छादिगुणानाम् अवच्छेदकतासम्बन्धेन उत्पत्तौ प्राणशरीरसंयोगस्यैव शरीरानुयोगिकस्य कारणत्वात् ।

वृक्षादीनां प्राणसंयोगोऽपि भग्नक्षतसंरोहणादिना[1] हेतुना अनुमातव्यः। तत्र भग्नक्षतसंरोहणपदार्थः आदौ विमृश्यते ।

अत्र प्रथमः पक्षः - भग्नस्य क्षतस्य वा संरोहणं भग्नक्षतसंरोहणम् । संरोहणं पुनरुत्पत्तिः इति । अत्र पक्षे हेत्वप्रसिद्धिः दुर्वारा । यो हि अवयवो भज्यते क्षाप्यते वा न स पुनरुत्पद्यते किन्तु भूमौ पतित्वा शुष्यति । उत्पद्यमानं तु अवयवान्तरमेव । भग्नक्षतशब्दयोः विभागविशेषजन्यनाशप्रतियोगित्वेन विनश्यदवयविपरत्वमपि न युज्यते , विनष्टस्य पूर्वावयविनोऽपि पुनरुत्पत्त्यसम्भवात् । अवयवनाशपूर्वोत्तरकालीनयोः अवयविनोः भेदात् ।

द्वितीयःपक्षः – भग्ने क्षते वा संरोहणं भग्नक्षतसंरोहणम् । यत्किञ्चिदवयविनाशोत्तरं तदवयवेषु पूर्वावयविसमवेतपरिमाण-

[1] भङ्गः – शब्दविशेषजनको भूयोऽवयवविभागः । क्षतिः – शब्दविशेषाजनकः किञ्चिदवयवविभागः ।

 ISSN – 2249-538X

सजातीयपरिमाणवतो द्रव्यान्तरस्य स्वत उत्पत्तिः इति यावत्। द्रव्यविशिष्टत्वं हेतुः फलति। तत्र विशिष्टत्वं स्वनाशोत्तर-कालीनास्मदीयप्रयत्नासाध्योत्पत्ति-कत्वस्वसामानाधिकरण्यस्वसमवेतपरिमाणसजातीयपरिमाणवत्त्वैतत्त्रितय-सम्बन्धेन। मानुषशरीरमत्र दृष्टान्तः। तत्र हि किञ्चिदवयवक्षत्या पूर्वावयवि-नाशेऽपि पश्चादुत्पन्नचर्माद्यवयवसन्धानेन तेष्ववयवेषु तावदवयवम् अवयवि व्यक्त्यन्तरमुत्पद्यते। प्रच्छिन्नायाम् अङ्गल्याम् अङ्गल्यान्तरप्ररोहाभावस्तु वृक्षविशेषे प्रच्छिन्नायां शिरश्शाखायां शिरश्शाखान्तरप्ररोहाभाववत् कारणविशेषाभावेन प्रतिबन्धकविशेषेण वा उपपादनीयः। न च वृक्षः प्राणसम्बन्धी द्रव्यविशिष्टत्वात् मानुषशरीरवदिति फलितानुमाने भागासिद्धिः दुर्वारा। छिन्नप्ररूढवृक्षे हेतुसत्त्वेऽपि तदितरवृक्षेषु हेतोरसत्त्वादिति वाच्यम्। अत्रानुमाने छिन्नप्ररूढवृक्षस्यैव पक्षत्वोपगमात्। तत्र प्राणसम्बन्धे सिद्धे तद्दृष्टान्तेन वृक्षत्वहेतुना इतरवृक्षेष्वपि प्राणसम्बन्धस्य सिद्धिसम्भवात्।

द्रव्यविशिष्टवृत्तिद्रव्यत्वव्याप्यव्याप्यजातिमत्त्वस्यैव सर्वत्र हेतुत्वसम्भवाच्च। न चोक्तमनुमानं वैशेषिकमते पाकोत्तरघटे व्यभिचरितम्। प्राणित्वशून्ये तत्र पाकपूर्वकालीनघटवैशिष्ट्यस्य विद्यमानत्वात्। एवं दुग्धध्वंसजन्ये दध्नि नैयायिकमतेऽपि व्यभिचारः। तत्र दुग्धवैशिष्ट्यस्य सम्बन्धत्रयेण सत्त्वादिति वाच्यम्। हेतुकुक्षिघटकवैशिष्ट्यघटकस्य स्वसामानाधिकरण्यस्य स्वसमवायिमहत्समवेतत्वरूपस्यैव विवक्षणीयत्वात्। पाकात् पूर्वोत्तरकालभाविनोः घटयोः आरम्भकपरमाणूनां, दुग्धदध्या-रम्भकपरमाणूनाञ्च महत्त्वाभावेन महत्त्वघटितसम्बन्धेन वैशिष्ट्यस्य पक्वघटे दध्नि च विरहेण व्यभिचारनिरासादिति।

अत्र चिन्त्यते । महत्त्वघटितसामानाधिकरण्यस्य हेतुकुक्षौ निवेशेऽपि व्यभिचारो दुर्वारः । यत्र पात्रस्थितस्य महाजलस्य कतिपयावयवपरिस्रावेण विनाशे परिशिष्टेषु अवयवेषु दैवाद् आगन्तुकजलान्तरसंयोगेन उत्पादिते महाजले विनष्टमहाजलवैशिष्ट्यस्य सत्त्वादिति ।

तृतीयः पक्षः – भग्ने क्षते वा संरोहणम् भग्नक्षतसंरोहणम् ।पूर्वस्यावयविनः यस्मिन् कस्मिंश्चिदवयवे भग्ने क्षते वा सति पश्चात् संरोहणमित्यर्थः , अथवा भग्नात् क्षताद्वा संरोहणम् । विभक्तावशिष्टात् प्रकाण्डादेः अवयवात् संरोहणम् । अवयवान्तरविभक्तावयवारम्भक-परमाणुसंयोगनाशसहकृत-परमाणुप्रयोज्योत्पत्तिकावयव-समवेतद्रव्यत्वं पर्यवसन्नो हेतुः । एषा ह्यत्र रीतिः – वृक्षस्य कस्यांश्चित् शाखायां भग्नायां अवशिष्टप्रकाण्डादेः आरम्भकपरमाणुपुञ्जात् बहिर्निस्सरन्तः एव परमाणवः शाखान्तरमारभन्ते । तैः शाखान्तरारम्भे भग्नशाखारम्भकपरमाणुभिस्सह यस्तेषामन्तस्संयोगः तन्नाशः बहिर्निस्सरणक्रियाद्वारा सहकारी भवति । अवशिष्टप्रकाण्डारम्भक-परमाणुभिः शाखान्तरारम्भे वृक्षमूलद्वारा उत्कृष्य नीतानि बाह्यपरमाण्वन्त-राण्यपि उपयुज्यन्ते। तथाहि – वृक्षमूले सलिलसेकेन शिथिलिताः पार्थिवपरमाणवः वृक्षे अन्तस्सञ्चरता पवनेन उत्कृष्य अन्तरेव व्यूहन्ते । व्यूहमानैः तैस्सह पूर्वपूर्वव्यूढा अपि परमाणवः यथायोगं प्रसर्पन्ति उत्सर्पन्ति च। तत्र केचित् परमाणवः शाखामारभन्ते , केचित् पत्राणि , केचित् पुष्पाणि , केचित् फलानि । केचिच्च शाखान्तराणि इति । एवं मानुषादिशरीरेष्वपि

 ISSN – 2249-538X

भुक्तान्नकबलाद्यारम्भकाः केचन परमाणवः अन्तस्सञ्चरता पवनेनैव यथायोगं व्यूहन्ते। तेन च शरीरावयवाः उपचीयन्ते।[1]

वृक्षस्य भग्नक्षतसंरोहणमिव उपचयोऽपि शरीरत्वं साधयति। उपचयश्च पूर्वावयवारम्भकाणां परमाणूनां प्रकृष्टमहत्त्ववदवयवान्तरारम्भकैः परमाण्वन्तरैः विलक्षणसंयोगः।[2] ईदृशसंयोगविशेषविशिष्टावयवारब्धद्रव्यत्वं हेतुःपर्यवस्यति। न चोक्तहेतुः अप्रयोजक इति वाच्यम्। भग्नक्षतसंरोहणस्य उपचयस्य च प्राणसञ्चारनिमित्तकत्वात्। न च आस्तां वृक्षादिष्वन्तः प्राणवायुः तथापि तत्संयोगस्य ज्ञानाद्युत्पादानुकूलत्वे मानाभाव इति वाच्यम्। विरुद्धत्वात्। यत्संयोगो ज्ञानाद्युत्पादानुकूलः स एव हि वायुः प्राणो नाम।

**उद्भिदां प्राणसंबन्धे वैशेषिकभाष्यकृतो असम्मतिः**

वैशेषिकसूत्रकृता महर्षिकणादेन अनित्यपृथिव्याः त्रैविध्यं प्रादर्शि शरीरेन्द्रियविषयभेदात्। तत्र भाष्यकृता प्रशस्तपादाचार्येण शरीरस्य जरायुजाण्डजभेदेन नानात्वमुपदर्श्य पाषाणादीनामिव उद्भिदां तरुगुल्मलतादीनामपि विषये अन्तर्भावोऽकारि।

अयमेषामाशयः – तरुगुल्मादीनां प्राणवत्त्वे तदधीने शरीरत्वे च मानाभावः। बीजाद् अङ्कुरोत्पत्तेरिव भग्नक्षतसंरोहणादेरप्यन्यथैवोपपत्तेः।

एषा ह्यत्र रीतिः – अनवरतस्पन्दिनो मारुताः त्रसरेणवः धरणिसलिलसंयोगेन शिथिलीकृतेषु बीजावयवेषु मन्दंमन्दमनुप्रविशन्तः भौमान् आप्यांश्च त्रसरेणून्

[1] क्वचिदनागन्तुकैः पूर्वावयवारम्भकैरेव परमाणुभिः अन्तःपवनसञ्चारितैः अवयवान्तरारम्भो दृष्टः यथा गृहान्तरुपबद्धोऽपि कुमारीदलकाण्डः किसलयति , अनश्नतोऽपि कस्यचित् चर्मकाण्डः प्ररोहति। (रामरुद्री)

[2] (निरवयवानां परमाणूनां परस्परव्यूहव्यूहकभावानाङ्गीकारे परमाणुपदं सर्वत्र त्रसरेणुपदं बोद्धव्यम्।)

आकृष्य तत्तद्बीजावयवैः संयोजयन्ति । तथाविधैश्च तत्तद्बीजावयवैः अङ्कुराः उत्पद्यन्ते। ऊष्मविशेषसंयोगाच्च तत्र रूपादय उत्पद्यन्ते। तेभ्यः अङ्कुरेभ्यः भौमैः आप्यैश्च त्रसरेणुभिः परमाणुभिर्वा अनवरतम् अन्तरुन्नीय व्यूहमानैः तरवो वर्धन्ते। तत्र च त्रसरेणूनां परमाणूनां वा तत्तदुत्तरदेशसंयोगे तत्तत्क्रियाविशेषः कारणं , क्रियाविशेषे च पवननोदनविशेषः कारणं , तत्र च पवनगतक्रियाविशेषः कारणम् , सर्वत्र पुरुषस्य अदृष्टविशेषोऽपि सहकारीति। भग्नक्षतसंरोहणादावपि एषैव रीतिः । इत्थञ्च वृक्षादौ वायोः प्राणत्वे , वायुसंयोगाद् ज्ञानेच्छाद्युत्पादे च मानाभावः । ननु वर्धमानाः लताः पवनप्रतिहतिजनितविनिपातचकिताः झटिपि सन्निहितान् उपघ्नतरून् आलम्बन्ते। तदीयान् विटपान् आत्मीयैः अंशुभिः अशिथिलबन्धमेव वेष्टयन्ति च । अतो लतादीनां ज्ञानेच्छाद्यवच्छेदकत्वम् आवश्यकमिति चेन्न। बाह्य पवनसञ्चारविशेषेणैव तदुपपत्तेः । न चैवं सति स्मृतिपुराणादिवचनविरोधो दुष्परिहर इति वाच्यम् ।'नर्मदातीरसञ्जाताः' इत्यादीनां पुराणवचनानां प्रशंसमात्रपरत्वेन , 'गुरुं हुंकृत्य' इत्यादीनां निन्दामात्रपरत्वेन स्वार्थे तात्पर्याभावात्।

अत्र चिन्तनीयम् – भागवतादिषु मनुष्यपशुपक्ष्यादीनामिव तरुगुल्मलतादीनामपि सृष्टेरुक्तत्वात् तेषां शरीरत्वं प्राणसम्बन्धित्वञ्च आवश्यकम् । एवं सति निरुक्तवचनानां 'नर्मदातीरसञ्जाताः ' , इत्यादीनां मुख्यत्वोपगमे बाधकाभावः। एवमपि असुरविशेषस्य शकटादिरूपताप्राप्तेः , गौतमशप्तायाः अहल्यायाः शिलारूपताप्रप्तेश्च पुराणादौ श्रवणात् शकटशिलादीनामपि जीवावच्छेदकतया शरीरताप्रसङ्गः दुर्वार इति चेन्न ।

 ISSN – 2249-538X

इष्टत्वात् , ‘ सर्वं खल्विदं ब्रह्म ’ इत्यादिश्रुतेः । अन्नमयकोषस्य मृत्पाषाणादौ अनुभवविरुद्धतया असार्वत्रिकत्वेपि प्राणमयादिकोषणां सार्वत्रिकत्व-सम्भवात् । शरीरेन्द्रियविषयभेदेन त्रैविध्यं दर्शयतो भाष्यकारस्य शरीरपदेन अन्नमयकोषस्यैव विवक्षितत्वात् इति ।

***************

# प्रतिबध्यप्रतिबन्धकभावविचारः

**विद्वान् श्यामसुन्दरः ए**
संविदाध्यापकः, न्यायविभागः
राजीवगान्धीपरिसरः, शृङ्गेरी

समवायसम्बन्धेन तदभाववत्तानिश्चयकाले, तदभावव्याप्यवत्तानिश्चयकाले वा तदधिकरणे तदग्रिमक्षणे समवायेन तद्वत्ताबुद्ध्यनुत्पादोऽनुभवसिद्धः, यथा चैत्रस्य “ह्रदो वह्न्यभाववान्” इति ह्रदे वह्न्यभाववत्तानिश्चयसत्वे “ह्रदो वह्न्यभावव्याप्यवान्” इति ह्रदे वह्न्यभावव्याप्यप्रकारकनिश्चयसत्त्वे वा तदग्रिमक्षणे तस्य “ह्रदो वह्निमान्” इति ह्रदे वह्निमत्ताबुद्धेरनुत्पादात् । अतः समवायेन तद्वत्ताबुद्धौ समवायेन तदभाववत्तानिश्चयः, समवायेन तदभावव्याप्यवत्तानिश्चयश्च प्रतिबन्धकः कल्प्यते।

परन्तु “ह्रदः संयोगेन वह्नेरभाववान्” इति ह्रदे संयोगावच्छिन्नप्रतियोगिताकवह्न्यभाववत्तानिश्चयकालेऽपि “ह्रदः समवायेन वह्निमान्” इति समवायावच्छिन्नप्रकारताकवह्निमत्ताबुद्ध्युत्पत्तेः, तत्र प्रतिबन्धकनिश्चयीयप्रतियोगितावच्छेदकप्रतिबध्यज्ञानीयप्रकारतावच्छेदकसम्बन्धयोरैक्यनिवेशः आवश्यकः । एवं ‘ह्रदो द्रव्याभाववान्’ इति निश्चयसत्वेऽपि ‘ह्रदो वह्निमान्’ इति बुद्ध्युत्पत्तेः, तत्र प्रतिबन्धकनिश्चयीयप्रतियोगितावच्छेदकप्रतिबद्ध्यज्ञानीय-प्रकारातावच्छेदकधर्मयोरपि ऐक्यं निवेशनीयम् ।एवं ‘द्रव्यं वह्न्यभाववत्’ इति द्रव्यत्वेन ह्रदे

 ISSN – 2249-538X

वह्न्यभाववत्तानिश्चयकालेऽपि 'ह्रदो वह्निमान्' इति बुद्ध्युत्पत्तेः, प्रतिबद्ध्यप्रतिबन्धकज्ञानीयधर्मितावच्छेदकधर्मयोरैक्यं वक्तव्यम्।

"ह्रदो वह्न्यभाववान् न वा" इति वह्न्यभावावगाहिसंशयसत्वेऽपि "ह्रदो वह्निमान्" इति बुद्ध्युत्पत्तेः, प्रतिबन्धकतावच्छेदकशरीरे निश्चयत्वप्रवेशः। ह्रदे वह्न्यभाववत्तानिश्चयकाले "ह्रदो वह्निमान् न वा" इति संशयस्याप्यनुत्पत्तेः, प्रतिबध्यतावच्छेदककोटौ निश्चयत्वं परित्यज्य बुद्धित्वमात्रं निवेशितम्।

एवमपि ह्रदे वह्न्यभाववत्तानिश्चयसत्वेऽपि "वह्न्यभाववद्ध्रदो वह्निमान् " इति स्वविरुद्धधर्मधर्मितावच्छेदकक- स्वप्रकारकज्ञानात्मिकायाः आहार्यबुद्धेः, "महानसं वह्न्यभाववत्" इति निश्चयोत्तरं लौकिक-सन्निकर्षजन्यायाः महानसे वह्निमत्ताबुद्धेः, "शङ्खो न पीतः" निश्चये सत्यपि पित्तादिदोषवशात् 'पीतः शङ्खः' इति बुद्धेश्चोत्पत्तेः प्रतिबध्यतावच्छेदककोटौ ज्ञानांशे अनाहार्यत्वं, लौकिकसन्निकर्षाजन्यत्वं, दोषविशेषाजन्यत्वञ्च विशेषणं देयम्।

एवं चैत्रादेः "ह्रदो वह्न्यभाववान् इति ज्ञानमप्रमा" इति अप्रामाण्यज्ञानास्कन्दिततदभाववत्तानिश्चयसत्वे आहार्यात्मकतदभाव-वत्तानिश्चयसत्वे वा तदग्रिमक्षणे 'ह्रदो वह्निमान्' इति तद्वत्ताज्ञानस्योदयात् प्रतिबन्धकतावच्छेदककोटौ निश्चये अनाहार्यत्वाप्रामाण्यज्ञानाना-स्कन्दितत्वयोः निवेशश्चावश्यकः।

एवं प्रतिबन्धकनिश्चयीयाभावनिष्ठप्रकारतायां तादृशाभावनिष्ठत्वं परित्यज्य तादृशाभावत्वावच्छिन्नत्वं निवेशनीयम्, अन्यथा ह्रदो वन्हिमान् इति बुद्धौ "प्रमेयवान् ह्रदः"इति प्रमेयत्वेन रूपेण तादृशाभावावगाहिनिश्चयस्य

प्रतिबन्धकत्वापत्तेः। एवं तत्र स्वप्रतियोगिमत्ताग्रहविरधिताघटक-सम्बन्धावच्छिन्नत्वञ्च निवेशनीयम्, अन्यथा "कालिकसम्बन्धेन वन्ह्यभाववान् ह्रदः" इति कालिकसम्बन्धावच्छिन्नप्रकारताशालिनिश्चयस्य प्रतिबन्ध-कत्वापत्तेः। स्वप्रतियोगितामत्ताग्रहविरोधिताघटकसम्बन्धो नाम स्वप्रतियोगितावच्छेदकधर्मसम्बन्धावच्छिन्नप्रकारताशालिबुद्धित्वावच्छिन्न-प्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकप्रकारतावच्छेदकसम्बन्धः। प्रतिबध्यतावच्छेदकशरीरे बुद्धित्वरूपसामान्यधर्मं परित्यज्य अनुमितित्वादिविशेषधर्मप्रवेशे शाब्दत्वाद्यवच्छिन्नस्याप्रतिबध्यत्वापत्तिरिति तन्निवेशः। तथा च तद्वत्ताबुद्धिं प्रति तदभाववत्तानिश्चयः प्रतिबन्धकः इत्यस्य तद्धर्मावच्छिन्नविशेष्यतानिरूपिततद्रूपावच्छिन्नतत्सम्बन्धावच्छिन्नप्रकारताशाल्यनाहार्यलौकिकसन्निकर्षाजन्य-दोषविशेषाजन्यबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्नविशेष्यतानिरूपिततद्रूपावच्छिन्नतत्सम्बन्धावच्छिन्नप्रतियोगिता-निरूपकाभावत्वावच्छिन्नस्वप्रतियोगिमत्ताग्रहविरोधिताघटकसम्बन्धावच्छिन्न प्रकारताशाल्यनाहार्याप्रामाण्यज्ञानानास्क-न्दितनिश्चयत्वावच्छिन्नं प्रतिबन्धकमित्यर्थः पर्यवस्यति।

एवं तद्वत्ताबुद्धौ तदभावव्याप्यवत्तानिश्चयस्यापि प्रतिबन्धकत्वं कल्प्यते। यतः "ह्रदो वह्न्यभावव्याप्यवान्" इति ह्रदे वह्न्यभावव्याप्यवत्ता-निश्चयसत्वे तदुत्तरं ह्रदे वह्न्यभाववत्ताबुद्धेरनुदयात्। तथा च पूर्वोक्ततादृशबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छन्नविशेष्यतानिरूपित-तदभावव्याप्यत्वावच्छिन्नप्रकारताशालितादृशनिश्चयत्वावच्छिन्नं प्रतिबन्धकम् इति पर्यवस्यति।

 ISSN – 2249-538X

ह्रदो वह्निमानित्यादि तद्वत्ताबुद्धौ ह्रदो वह्न्यभावाभावदवृत्तिजलवान् इति पूर्वपक्षीयव्याप्तिविषयकनिश्चयस्य, "वह्निव्यापकीभूताभाव-प्रतियोगिजलवान् ह्रदः" इति व्यतिरेकव्याप्त्यवगाहिनिश्चयस्य, "जलव्यापक-वह्न्यभाव-समानाधिकरणजलवान् ह्रदः" इत्यादि सिद्धान्तव्याप्ति-विषयकनिश्चयस्य च तदभावव्याप्यवत्तानिश्चयविधयैव प्रतिबन्धकत्वमुपेयते। तथापि "ह्रदो वह्निमान्" ह्रदे वह्निमत्ताबुद्धौ "वह्निव्यापकीभूताभाव-प्रतियोगिजलवान् ह्रदः" इति व्यतिरेकव्याप्तिविषयकविशिष्टनिश्चयस्य "वह्निव्यापकीभूताभावप्रतियोगिजलम्" इति निश्चयविशिष्टस्य "जलवान् ह्रदः" इति निश्चयस्य च प्रतिबन्धकत्वात् तयोरेकरूपेणैव प्रतिबन्धकत्वं स्वीक्रियते, न तु पृथग्रूपेण गौरवात्। तच्च रूपं – वह्निव्यापकीभूताभावप्रतियोगित्वत्वाव-च्छिन्नप्रकारतानिरूपितजलत्वावच्छिन्नविशेष्यताशालिनिश्चयविशिष्ट जलत्वा-वच्छिन्नप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यताशालितादृशनिश्चयत्वम् । निश्चये निश्चयवैशिष्ट्यं च स्वसमानकालीनत्व-समवायद्वयघटित-स्वसमानाधिकरण्योभयसंबन्धेन बोध्यम् । परन्त्वत्र "वह्निव्यापकीभूता-भावप्रतियोगिजलवान् ह्रदः" 'वह्निव्यापकीभूताभावप्रतियोगिमीनवान् ह्रदः' 'वह्निव्यापकीभूताभावप्रतियोगिशैवालवान् ह्रदः' इत्यादिनिखिलनिश्चयानां पूर्वोक्तनिश्चयविशिष्टनिश्चयसाधारणरूपेण वह्निव्यापकाभावप्रतियोगित्व-विशिष्टविषयकनिश्चयविशिष्टह्रदविषयकनिश्चयत्वादिना प्रतिबन्धककल्पनं तु न युज्यते । तथा सति "वह्निव्यापकीभूताभावप्रतियोगि शैवालम्" इति निश्चयविशिष्ट "मीनवान् ह्रदः" इति निश्चयादीनामपि ह्रदे वह्निमत्ताबुद्धौ प्रतिबन्धकत्वापत्तेः। परन्तु तेषां निश्चयानां वह्निव्यापकीभूताभाव-

प्रतियोगित्वत्वावच्छिन्नप्रकारता-निरूपितप्रकारतानिरूपितह्रदत्वावच्छिन्न-विशेष्यताशालितादृशनिश्चयत्वात्मकैकरूपेण निश्चयविशिष्टनिश्चया-साधारण्येन ह्रदे वह्निमत्ताबुद्धौ प्रतिबन्धकत्वं शक्यते वक्तुम्।

ह्रदो वह्निमान् इति बुद्धौ 'जलव्यापको वह्न्यभावः जलवान् ह्रदः' इति निश्चयविशिष्टनिश्चयस्य 'जलव्यापकवह्नभावसमानाधिकरणजलवान् ह्रदः' 'जलव्यापकवह्नभावसमानकालीनजलवान् ह्रदः' इति विशिष्टनिश्चययोश्च एकरूपेण प्रतिबन्धकत्वं कल्पयितुं शक्यते। तच्च रूपं जलव्यापकत्व-त्वावच्छिन्नप्रकारतानिरूपित-वह्न्यभावत्वावच्छिन्नविशेष्यताशालिनिश्चय-विशिष्ट-जलत्वावच्छिन्नप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यताशालि-तादृशनिश्चयत्वम्।

एवं तद्वत्ताबुद्धिं प्रति तदभावावच्छेदकतया गृहीतधर्मवत्ता-निश्चयोऽपि प्रतिबन्धको भवति। तद्यथा- ह्रदो वह्निमान् इति बुद्धिं प्रति जलवान् वह्न्यभाववान् इति निश्चयविशिष्टः 'जलवान् ह्रदः' इति निश्चयः जलव्यापकवह्न्यभावप्रतियोगिक-स्वरूपसम्बन्धावच्छिन्नवह्न्यभाव-त्वावच्छिन्नप्रकारतानिरूपितजलावच्छिन्नविशेष्यताशालिनिश्चयविशिष्ट-जलत्वावच्छिन्नप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वेन प्रतिबन्धकः इति।

एवम् अनुमितित्वावच्छिन्नं प्रति साध्यसिद्धिः प्रतिबन्धिका। सिद्धिश्च प्रकृतपक्षे प्रकृतसाध्यतावच्छेदकसंबन्धेन प्रकृतसाध्यप्रकारकनिश्चयः। प्रकृतपरामर्शे सत्यपि सिद्धिसत्वे प्रकृतानुमितेरनुत्पादादयं प्रतिबध्य-प्रतिबन्धकभावः कल्प्यते। सामान्यतः अनुमितित्वावच्छिन्नं प्रति सिद्धेः

 ISSN – 2249-538X

प्रतिबन्धकत्वाङ्गीकारे प्रकृतसिद्ध्यनन्तरं भिन्नविषयकानु-मितेरनुत्पत्तिप्रसङ्ग इति सिद्ध्यनुमित्योः समानविषयकत्वं बोध्यम् । तथा च प्रकृतपक्षतावच्छेदकावच्छिन्नोद्देश्यतानिरूपितप्रकृतसाध्यतावच्छेदकधर्मसम्बन्धावच्छिन्न-विधेयताशाल्यनुमितित्वावच्छिन्नं प्रति प्रकृतपक्षता-वच्छेदकावच्छिन्नविशेष्यतानिरूपित-प्रकृतसाध्यतावच्छेदधर्मसम्बन्धावच्छिन्नप्रकारताशालिनिश्चयः प्रतिबन्धकः इति सिद्ध्यति । सिद्धिदशायामपि सिषाधयिषाबलादनुमितेरुत्पादात् सिषाधयिषाविरहविशिष्टसिद्धिरेव प्रतिबन्धिका । सिषाधयिषा च तत्साध्यविशिष्टतत्पक्षविषयकत्वप्रकारकानुमितिविषयकेच्छा । तत्रापि पक्षतावच्छेदकावच्छेदेन साध्यानुमितिं प्रति तादृश्येव साध्यसिद्धिः प्रतिबन्धिका, न तु पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिरपि । पक्षतावच्छेदकसामानाधिकरण्येन साध्यानुमितिं प्रति तु तदुभय-विधसिद्धिरपि प्रतिबन्धिका भवतीति विवेकः।

एवं समानविषयकानुमितिं प्रति सिषाधयिषाविरहविशिष्ट-प्रत्यक्षसामग्री प्रतिबन्धिका । भिन्नविषयकप्रत्यक्षं प्रति प्रत्यक्षेच्छाविरह-विशिष्टानुमितिसामग्री प्रतिबन्धिका । समानविषयकशाब्दबोधं प्रति शाब्देच्छाविरहविशिष्टानुमितिसामग्री प्रतिबन्धिका। भिन्नविषकानुमितिं प्रति सिषाधयिषाविरहविशिष्टशाब्दसामग्री प्रतिबन्धिका इति प्रतिबध्यप्रतिबन्धकभावविचारः।

****************

# तत्वचिन्तामणौ आकाङ्क्षास्वरूपविचारः

**डा. आर्. नवीनः**
संविदाध्यापकः, न्यायविभागः
राजीवगान्धीपरिसरः, शृङ्गेरी

अथ प्रत्यक्षानुमानोपमानशब्दभेदेन प्रमाणचातुर्विध्यमिति न्यायशास्त्रसम्मतमिति सर्वविदितमेव । तत्र शब्दप्रमाणजन्यशाब्दप्रमायां सहकारिकारणभूता भवति आकाङ्क्षा । तस्याः पदार्थयोः अविनाभावः, जिज्ञासा, अभिधनापर्यवसानमित्यादीनि स्वरूपाणि तत्वचिन्तामणिग्रन्थे अनूक्तानि । तत्र अविनाभावः, जिज्ञासा, ज्ञाप्यतदितरान्वयप्रकारक-जिज्ञासानुकूलपदार्थोपस्थितिजनकत्वे सति अजनितात्पर्यविषया-न्वयबोधत्वम्, इति आकाङ्क्षास्वरूपत्रयम् उपपाद्य, अभिधानापर्यवसान-माकाङ्क्षा इति मणिकारमतम् उपपाद्यते ।

## 1.अविनाभावः आकाङ्क्षा

अथ केयमाकाङ्क्षा ? न तावत् एकपदार्थस्य अपरपदार्थेन साकम् अविनाभावः आकाङ्क्षा । "नीलं सरोजं" इत्यादौ तदभावात् । अनीलस्यापि सरोजस्य सद्भावेन सरोजत्वावच्छेदेन नीलरूपाविनाभावविरहात्तत्र आकाङ्क्षानुपपत्तिःस्यात् । न च सरोजत्वसामानाधिकरण्येन नीलाविना-भावोऽस्ति इति वाच्यम् । "विमलं जलं नद्याः कच्छे महिषश्चरति"इत्यत्र

 ISSN – 2249-538X

जलान्वितनदीसम्बन्धाविनाभावस्य कच्छविशेषे सत्त्वेन कच्छस्य नदीपदोत्तरषष्ठ्यर्थसम्बन्धसाकाङ्क्षतापत्तिःस्यात् ।

**2 . समभिव्याहृतपदस्मारितपदार्थजिज्ञासा आकाङ्क्षा**

अथ समभिव्याहृतपदस्मारितपदार्थजिज्ञासा आकाङ्क्षा । समभिव्याहृतं यत् पदं तेन स्मारितो योऽर्थः तद्विषयकज्ञानेच्छा इत्यर्थः । तथा च प्रकृतपदसमभिव्याहृतयत्पदस्मारितार्थे येन सम्बन्धेन प्रकृतपदस्मारितस्य अस्यार्थस्यान्वयबोधः, तत्पदस्मारिते तत्र तेन सम्बन्धेन प्रकृतपदस्मारितस्य तस्य शाब्दबोधेच्छा तत्पदे तत्पदाकाङ्क्षा इति फलितोऽर्थः । उदासीनपदस्मारितार्थजिज्ञासायाम् अतिव्याप्तिवारणाय समभिव्याहृतेति । न च तत्पदस्मारितेति व्यर्थम्, तत्र तस्यान्वये तत्र तस्य शाब्दबोधेच्छा आकाङ्क्षा इत्यस्यैव सम्यक्त्वादिति वाच्यम् । प्रकारान्तरेणोपस्थिते घटादौ प्रकारान्तरेणोपस्थापितस्य नीलादेः शाब्देच्छायामपि “नीलो घटः” इत्यादि वाक्यात् घटादौ नीलाद्यन्वयबोधापत्तेः, आकाङ्क्षासत्वात् । न च तत्र आकाङ्क्षासत्त्वेऽपि कारणान्तरस्य पदजन्यपदार्थोपस्थितेर्विरहान्नन्वय-बोधापत्तिरिति वाच्यम् । एतादृशाकाङ्क्षावादिना पदजन्यपदार्थो-पस्थितेः पृथक् कारणत्वानभ्युपगमात् । स्मारितत्वं च वृत्त्या स्मारितत्वं बोध्यम् ।तेन कार्यत्वकारणत्वादिसम्बन्धेन घटादिपदस्मारिताकाशादिजिज्ञासा न आकाङ्क्षेति चेत् –

न । जिज्ञासारहितस्यापि पुंसः वाक्यार्थबोधोत्पत्त्या व्यक्तिरेकव्यभिचारात् ।

किञ्च "विश्वजिता यजेत" "द्वारम्" इत्यत्र अपदार्थयोरपि स्वर्गकामरूपाधिकारिणः पिधानस्य च आकाङ्क्षितत्वमिष्टम् । उक्तजिज्ञासायाः आकाङ्क्षत्वे तु तन्न स्यात्, अध्याहृतयस्वर्गकामादेः पदस्मारितत्वाभावेन तज्जिज्ञासायाः आकाङ्क्षात्वाभावात् ।

न च शब्दाध्याहारपक्षे नायं दोष इति वाच्यम् । तथापि " घटः कर्मत्वमानयनं कृतिः " इत्यत्र जिज्ञासितस्य निरूपकत्वादिसंसर्गक-कर्मत्वादिपदस्मारितकर्मत्वादिप्रकारकशाब्देच्छाविषयस्य आनयनादेः आनयनादिपदस्मारितस्य, आकाङ्क्षितत्वापत्तिःअर्थात् निरूपकतासंबन्धेन कर्मत्वपदस्मारितकर्मत्वसाकाङ्क्षतापत्तिः ।

### 3. सौन्दडीयम् आकाङ्क्षालक्षणम्

अथ ज्ञाप्यतदितरान्वयप्रकारकजिज्ञासानुकूलपदार्थोपस्थिति-जनकत्वे सति अजनिततात्पर्यविषयान्वयबोधत्वम् आकाङ्क्षा । तत्पदोपस्थाप्य-तत्पदोपस्थाप्येतरयोर्योऽन्वयः तत्प्रकारिका या जिज्ञासा, तदनुकूलपदार्थोप-स्थितिजनकत्वे सति अजनितः अनुत्पादितः, तात्पर्यविषयोन्वयबोधो येन तत्त्वम् आकाङ्क्षेति यावत् । "घटमानयति" इत्यत्र "घटं" इत्येतावन्मात्रे उक्ते "किं , आनयति पश्यति वा ?" 'किं घटनिष्ठकर्मतानिरूपकं आनयनं, दर्शनं वा' इति जिज्ञासा भवति । एवम् "आनयति" इत्येतावन्मात्रे उक्ते "किं घटमन्यद्वा" किं घटनिष्ठकर्मत्वं आनयननिरूपितम्, अन्यनिष्ठकर्मत्वं वा इति जिज्ञासा भवति । आद्ये ज्ञाप्यम् आनयनं, तदितरत् दर्शनं, तत्प्रकारकजिज्ञासानुकूला पदार्थोपस्थितिः = घटनिष्ठकर्मत्वोपस्थितिः, तज्जनकत्वं "घटम्" इति पदे वर्तते। द्वितीये ज्ञाप्यं

 ISSN – 2249-538X

घटनिष्ठकर्मत्वं, तदितरत् अन्यनिष्ठकर्मत्वं, तत्प्रकारकजिज्ञासानुकूला पदार्थोपस्थितिः आनयनोपस्थितिः, तज्जनकत्वम् आनयतिपदे वर्तते । अतः घटम् आनयति इति पदयोः निरूपकतात्मकसम्बन्ध-प्रकारकजिज्ञासानुकूलोपस्थितिजनकता । एवमजनितान्वयबोधत्वं चोभयोः पदयोरस्तीति तयोः आकाङ्क्षा अस्ति । ' घटः कर्मत्वमानयं कृतिः' इत्यत्र घटकर्मत्वयोरभेदान्वबोधानुकूलाकाङ्क्षा सत्त्वेऽपि योग्यताविरहात् नाभेदान्वयबोधः । आधेयतासंबन्धेन घटप्रकारक-कर्मत्वविशेष्यकबोधस्तु न भवति । आधेयत्वरोपसम्बन्धत्वविशेषणत्वेन घटस्यानुपस्थित्या, तथा उपस्थितेरेव च घटकर्मत्वयोः आधेयत्वरूप-संबन्धप्रकारकजिज्ञासा-जनकत्वात्, घटपदे च तज्जनकत्वाभावेन तादृशाकाङ्क्षाविरहात् नाधेयत्वसंसर्गकबोधः " अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम् " इत्यत्र राज्ञः" इत्यस्य पुत्रेण सह जनितान्वयबोधत्वात् न पुरुषेण सह आकाङ्क्षा । एवं च सत्यन्तानुपादाने "घटः कर्मत्वम्" इत्यादावप्याकाङ्क्षा स्यात् । अतस्तदुपादानम् । तन्मात्रोक्तौ " अयमेति पुत्रो राज्ञः " इत्यत्र राजपुत्रयोरन्वयबोधानन्तरं राजपुरुषयोः अन्वयबोधः स्यात्, तद्वारणाय विशेष्यम् । राजपुत्रयोरन्वयबोधमात्रतात्पर्यके "अयमेति" इत्यादौ तात्पर्यभ्रमेण राजपुत्रयोरन्वयबोधानन्तरं तात्पर्यप्रमया राजपुरुषयो-रन्वयबोधसम्पादनाय तात्पर्यविषयेति अन्वयबोधविशेषणम् इति चेत्

**4. सौन्दडीयलक्षणदूषणम्**

न । आधेयत्वादिसंबन्धविशेषणत्वेन घटाद्युपस्थितेरेव घटकर्मत्वाद्योः आधेयत्वादिसंबन्धप्रकारकजिज्ञासाजनकत्वे नाम-विभक्ति-धातु-

आख्यातार्थानां घट-कर्मत्वं-आनयन-कृतीनां स्वरूपेणोपस्थितिः न घटकर्मत्वाद्योः आधेयत्वादिसम्बन्धप्रकारकजिज्ञासानुकूलेति तत्र आकाङ्क्षा न स्यात् । यदि स्वरूपेणोपस्थितिरेव तदनुकूला, तदा "घटः कर्मत्वम् आनयं कृतिः" इत्यत्र "घटमानयति" इत्यत्रेव "घटादिकर्मकानयानानुकूलकृतिमान् इति बोधः स्यात् । स्वरूपेणोपस्थितेरुभयत्राविशेषात् ।

अपि च " अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम् " इत्यत्र त्रयाणां राजपुत्रपुरुषाणाम् एकदा स्वरूपेणोपस्थितौ सत्याम्, प्रथमम्= अजनितान्वयबोधदशायां राज्ञः पुत्रेणैवान्वयधीः न पुरुषेण इति कस्य हेतोः ? पुरुषेणान्वयबोधे तात्पर्यधीविरहात् इति चेत्, तर्हि तत एव पुत्रेणान्वयबोधोत्तरं पुरुषेणान्वयबोधस्य वारयितुं शक्यत्वात् व्यर्थम् अजनितान्वय-बोधत्वदलमिति।

**5. आकाङ्क्षायाः सिद्धान्तरीत्या लक्षणम्**

का तर्हि आकाङ्क्षा इति चेदुच्यते । अभिधानापर्यवसानमाकाङ्क्षा । यस्य येन विना न स्वार्थान्वयानुभावकत्वं तस्य तत् अपर्यवसानम् । अभिधानपदं करणव्युत्पत्त्या शब्दोच्चारणमभिधत्ते । तस्य अपर्यवसानं = फलान्वयानुत्पादः। तथा च तदुच्चारणजन्यशाब्दबोधे तदुच्चारण-जन्यतादृशशाब्दधीप्रागभावः आकाङ्क्षेति फलितम् । तच्च पूर्वोक्तरीत्या दुष्टम्। अतः अभिधानपर्यवसानमित्यस्य पारिभाषिकोर्थः उक्तः – यस्य येन विना इत्यादिना । तथा च 'यत्पदस्य यत्पदव्यतिरेकप्रयुक्तः यादृशान्वयबोधाभावः तत्पदस्य तत्पदवत्त्वं तादृशान्वयबोधे अभिधानापर्यवसानम्' इति फलितार्थः। तत्पदवत्त्वं च अव्यवहितपूर्ववर्तित्व- अव्यवहितोत्तरवर्तित्वान्यतर-

 ISSN – 2249-538X

रूपसमभिव्याहारसम्बन्धेन। प्रयुक्तत्वं च “कारणाभावात् कार्याभावः “ इति प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषः, तत्प्रतियोगिजन्यप्रतियोगिकत्वं वा । नाम-विभक्ति-धातु-आख्यातपदानां न परस्परं विना परस्पर तेषां स्वार्थान्वयानुभवजनकत्वम् । भवति हि घटपदस्य “घटकर्मत्वं” इत्यन्वयबोधजनकत्वाभावः अम्पदव्यतिरेकप्रयुक्तः , अम्पदस्य तदभावश्च घटपदव्यतिरेकप्रयुक्त इति घटपदवत्त्वम् अम्पदे, अम्पदवत्त्वं च घटपदे आकाङ्क्षा । “घटः कर्मत्वं” इत्यादौ तु घटपदस्य “घटवत् कर्मत्वम्” इति बोधजनकत्वाभावः न कर्मत्वपदव्यतिरेकप्रयुक्तः, कर्मत्वपदे सत्यपि बोधानुदयात्, इति न तत्र आकाङ्क्षा।

***************

# ध्वन्यात्मभूते शृङ्गारे शब्दालङ्कारविनिवेशः

## (रसगङ्गाधरानुसारम् )

**आचार्यः वरप्रसाद राव्**

संस्कृतविभागाध्यक्षः

नागार्जुनविश्वविद्यालयः, आन्ध्रप्रदेशः

"ध्वन्यात्मभूते श्रृङ्गारे शब्दालङ्कारविनिवेशः" इति शीर्षिकाश्रवणमात्रेण कविराजस्य पण्डितराजस्य जगन्नाथस्य अपूर्वं विलक्षणं योगदानम् आलङ्कारिकाणां स्मृतिपथं समागच्छति। ध्वन्यात्मभूते श्रृङ्गारे शब्दालङ्गारविनिवेशरूपं प्रत्यग्रं पन्थानं प्रादर्शयत् पण्डितराजजगन्नाथः।

"ध्वन्यात्मभूते शृङ्गारे शब्दालङ्कारविनिवेशः" इति शीर्षिकाश्रवणमात्रेण, पठनमात्रेण वा केचन विस्मिताः भवेयुः, यतो हि ध्वनिकारस्य आनन्दवर्धनाचार्यस्य, लोचनकारस्य अभिनवगुप्तपादाचार्यस्य च सिद्धान्तानुसारं शृङ्गारे अङ्गिनि समुपनिबद्धे शब्दालङ्गाराः सर्वदा सर्वथा च हेयाः इति, कवेः प्रतिभायां विद्यमानायामपि शब्दालङ्गाराः नूनं परिहार्याः इति च निगद्यते। अलङ्कारशास्त्रे तावत् ध्वानिकारेण, लोचनकारेण च समाम्नातः सिद्धान्तोऽयं राजाज्ञाप्राय एव। अथापि प्रकरणेऽस्मिन् पण्डितराजजगन्नाथेन प्रत्यग्रः पन्थाः प्रदर्शितः। सिद्धान्तविशेषस्य भूमिका अवलोक्यताम् –

लोककल्याणाय प्रवर्तमाने रमणीये काव्ये जीवातुभूतः रसः इति आलङ्कारिकविचक्षणैः समाम्नात आस्ते।

 ISSN – 2249-538X

"न हि रसादृते कश्चिदर्थः प्रवर्तते"[1]।

इति भरतमुनिना रससम्प्रदायस्य बीजमुपक्षिप्तम् । यद्यपि भरतमुनिना रससंप्रदायस्य प्रवर्तनं, व्यवस्थापनञ्च बहोः कालात् प्रागेव विहितं; तथापि मध्ये तस्य विच्छेद इवाभूत् । भामहादय आलङ्कारिकाः रसादिमलक्षयन्तः अलङ्काररीत्याद्याः काव्यस्य जीवितमिति लक्षयाम्बभूवुः । परं तु गच्छता कालेन रसः पुनरुद्धृतोऽभवत् । ध्वनिकारस्तत्रभवान् आनन्दवर्धनाचार्यः;

"काव्यस्यात्मा स एवार्थः।"[2] इति

"कविना काव्यमुपनिबध्नता सर्वथा रसपरतन्त्रेण भवितव्यम् ।"[3]

इत्येवमादिभिर्वाचोयुक्तिभिः काव्यात्मत्वेन रसं प्रख्यापयामास ।

"एवं पञ्चात्मके ध्वनौ परमरमणीयतया रसध्वनेस्तदात्मा रसस्तावत्......।"[4] इति रसध्वनिं काव्यात्मत्वेन पण्डितराजः प्रतिष्ठापयामास ।

ध्वन्यमानो रसादिरूपो ध्वनिरेव काव्यात्मेति सिद्धान्तः । अलङ्क्रियतेऽङ्गी अनेनेति करणव्युत्पत्त्या अलङ्कारशब्दोऽसौ शब्दार्थालङ्कारावगमको वर्तते । अलङ्कारस्तु वस्तुतः अङ्गतया विद्यमानोऽङ्गिनं रसादिं परिपुष्णाति । यथा हार-नूपुरादयः शरीरशोभातिशायिनः शरीरमलंकुर्वन्तः शरीरद्वारा आत्मानम् अलङ्कुर्वन्ति तथैव यमकानुप्रासोपमारूपकादयः शब्दार्थरूपकाव्य

---

[1] द्.भरतमुनिः - नाटयशास्त्रम् VI/32

[2] द्.आनन्दवर्धनः - ध्वन्यालोकः I.5

[3] द्.तत्रैव तत्रैव III.पृ.368

[4] द्.पण्डितराजजगन्नाथः - रसगङ्गाधरः I.पृ.25

शरीरशोभातिशायिनः काव्यशरीरद्वारा काव्यात्मानं रसादिं परिपुष्णन्ति । तथा ह्यभिधीयते-

"तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः ।

अङ्गाश्रितास्त्वलङ्कारा मन्तव्या कटकादिवत् ॥"[1] इति

अलङ्कारशास्त्रे वाग्देव्यवतार इति संस्तुतेन ध्वनिसमर्थकेन मम्मटाचार्येण – "उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् । हारादिवदलङ्कारास्तेऽनु-प्रासोपमादयः॥"[2] इति अलङ्कारलक्षणं निगद्यते । किञ्च विश्वनाथकविराजेन तु,

"शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः ।

रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत् ॥"[3]

इति अलङ्कारलक्षणं विव्रियते । अनुप्रासोपमादीनामलङ्कारत्वं समर्थयताम् आलङ्कारिकाणां मतानां पर्यालोचनेन रसोत्कर्षप्रयोजकः शब्दार्थचारुत्वो-त्कर्षहेतुरलङ्कार इति लक्षितः लाक्षणिकैः । तथा चोच्यते –

"रस-भावादितात्पर्यमाश्रित्य विनिवेशनम् ।

अलङ्क तीनां सर्वासामलङ्कारत्वसाधनम् ॥"[4] इति ।

रस-भावादितत्परतया अलङ्काराणां विनिवेशनमेव यमकानु-प्रासोपमारूपकादीनाम् अलङ्कारत्वरव्यापकं तत्त्वम् इत्यवगन्तव्यम् ।

इह लोचनकारस्तत्रभवान् अभिनवगुप्तपादाचार्यः –

---

[1] द्. आनन्दवर्धनाचार्यः - ध्वन्यालोकः II.6

[2] द.मम्मटाचार्यः - काव्यप्रकाशः - IX.पृ.364

[3] द्.विश्वनाथकविराजः - साहित्यदर्पणः X.1

[4] द्.आनन्दवर्धनाचार्यः - ध्वन्यालोकः - II.पृ. 208

 ISSN – 2249-538X

“उपमया यद्यपि वाच्योऽर्थोऽलङ्क्रियते तथापि तस्य तदेवालङ्करणं यद्व्यङ्ग्यार्थाभिव्यञ्जनसामर्थ्याभिधानमिति वस्तुतोध्वन्यात्मैवालङ्कार्यः । कटककेयूरादिभिरपि शरीरसमवायिभिश्चेतन आत्मैव तत्रच्चित्रवृत्रिविशेषौ-चित्यसूचनात्मतयाऽलङ्क्रियते।

तथा हि – “अचेतनं शवशरीरं कुण्डलाद्युपेतमपि न भाति, अलङ्कार्यस्य अनौचित्यात्। न हि देहस्य किञ्चिदनौचित्यमिति वस्तुत आत्मैव अलङ्कार्यः, अहमलङ्कृत इति अभिमानात्।”[1] इति निर्दिश्यते।

“रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत्।

अपृथग्यत्ननिर्वर्त्यः सोऽलङ्कारो ध्वनौ मतः॥”[2] इति।

सुकविः सर्वदा प्रबन्धनिबन्धनावसरे अङ्गिनः रसस्य परिपोषणे एव प्रदत्तदृष्टिः स्यात् । ’अपृथग्यत्ननिर्वर्त्यः’ इत्येतत्पदप्रयोगमहिम्ना रससमवधानादन्येन यत्नेन विना अद्भुतप्रतिभानवतः महाकवेः अर्थालङ्कारवर्गः अहम्पूर्विकया परापतति । तादृशः अर्थालङ्कारवर्गः एव अङ्गिरसस्याङ्गत्वं भजति।

यदा कविना काव्ये रसराट् श्रृङ्गारः, विशिष्य विप्रलम्भश्रृङ्गरः अङ्गित्वेन समुपवर्ण्यते तदा शब्दालङ्काराः यमकानुप्रासादयः न कदापि विनिवेश्याः इति ध्वनिकारस्य, लोचनकारस्य च अभिप्रायः।

---

[1] द्.तत्रैव.....अभिनवगुप्तपादाचार्यः-लोचनम् II.पृ.209

[2] द्.तत्रैव अभिनवगुप्तपादाचार्यःध्वन्यालोकः II 16

तथा चोच्यते –

"शृङ्गारस्याङ्गिनो यत्नादेकरूपानुबन्धवान् ।
सर्वेष्वेव प्रभेदेषु नानुप्रासः प्रकाशकः ॥[1]
ध्वन्यात्मभूते श्रृङ्गारे यमकादिनिबन्धनम् ।
शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः॥"[2] इति ।

ध्वनिकारस्तावत् शब्दालङ्कारा: दुष्करश्लेष-यमकानुप्रासादयः नियततया परिहार्या इति सडिण्डिमं समुद्घोषयति । कवेः प्रतिभायां विद्यमानायामपि काव्ये श्रृङ्गारस्य (संयोगस्य), विप्रकम्भश्रृङ्गारस्य च ग्रथनावसरे शब्दालङ्काराः नैव प्रयोक्तव्याः यतः दुष्करशब्दालङ्कार –

ग्रथनावसरे नियमेन पृथक्तया कविसंरम्भः अपेक्ष्यते एव इति भावः ।

"एवं व्यङ्ग्यचर्वणातिरिक्तयोजना – विशेषापेक्षानापाततोऽधिकचमत्कारिणोऽनुप्रास- प्रबन्धान् यमकादींश्च सम्भवतोऽपि कविर्न निबध्नीयात् । यतो हि ते रसचर्वणायाम् अनन्तर्भवन्तः सहृदयहृदयं स्वाभिमुखं विदधाना रसपराङ्मुखं विदधीरन् । विप्रलम्भे तु सुतराम् । यतो मधुरतमत्वेनास्य निर्मलसितानिर्मितपानकरसस्येव तनीयानपि स्वातन्त्र्यमावहन् पदार्थः, सहृदयहृदयारुन्तुदतया न सर्वथैव सामानाधिकरण्यमर्हति ।"[3] इति । एष ध्वनिकारस्य मतानुवादमात्र एव ।

---

[1] द्.तत्रैव अभिनवगुप्तपादाचार्यःध्वन्यालोकः ॥ 14

[2] द्.तत्रैव तत्रैव अभिनवगुप्तपादाचार्यःध्वन्यालोकः ॥ 15

[3] द्. पण्डितराजजगन्नाथः - रसगङ्गाधरः ।.पृ,.89

 ISSN – 2249-538X

"ये तु पुनरक्लिष्टतयाऽनुन्नतस्कन्धततया च न पृथग्भावनामपेक्षन्ते, किन्तु रसचर्वणायामेव सुसुरवं गोचरीकर्तुं शक्याः, न तेषामनुप्रासादीनां त्यागो युक्तः।"[1] इति। स्वाभिप्रायं विलक्षणतया आविष्करोति जगन्नाथः।

इह तु रसगङ्गाधरकारस्य जगन्नाथस्य मतं ध्वनिकारस्य मतात् सर्वथा भिद्यते । पण्डितराजस्य निर्देशस्तावत् सूक्ष्मेक्षिकतया परिशीलनार्ह एव । कवेः रसपरिपोषप्रयासात् अभिन्नतया यः शब्दालङ्कारः निष्पद्यते,रसानुकूलतया च परिणमति सः शब्दालङ्कारः न परित्याज्यः, परं ग्राहय एव इति पण्डितराजजगन्नायस्य विलक्षणः सिद्धान्तविशेषः। यथा –

"कस्तूरिकातिलकमालि ! विधाय सायं,
स्मेरनानना सपदि शीलय सौधमौलिम्।
प्रौढिं भजन्तु कुमुदानि मुदामुदारा –
मुल्लासयन्तु परितो हरितो मुरवानि ॥"[2] इति।

अत्रोपनिबद्धः वृत्र्यनुप्रासः श्रृङ्गाररसानुकूलतया परिणमतीत्यतः धवन्यात्मभूते शृङ्गारे अनुप्रासोङ्गत्वं वहत्येव । कविसंरम्भश्चात्र सहृदयहृदयं रसचर्वणायां नितरां रमयति। यथा वा –

आयातैव निशा, निशापतिकरैः कीर्णं दिशामन्तरं
भामिन्यो भवनेषु भूषणगणैरुल्लासयन्ति श्रियम्।
वामे ! मानमपाकरोषि न मनागद्यापि रोषेण ते
हा ! हा ! बालमृणालतोऽप्यतितमां तन्वी तनुस्ताम्यति ॥"[1] इति।

---

[1] द्. तत्रैव पण्डितराजजगन्नाथः - रसगङ्गाधरः ।.पृ,.90

[2] द्. तत्रैव पण्डितराजजगन्नाथः - रसगङ्गाधरः ।.पृ,.90

इहापि संप्रयुक्तः अनुप्रासः विप्रकम्भशृङ्गाररसास्वादे अवश्यमङ्गत्वं भजत्येव।

यथा वा –

> "आसायं सलिलभरे सवितारमुपास्य सादरं तपसा।
>
> सरसिजकुलेन संप्रति भामिनि ! तव मुखतुलाधिगता॥" इति।

अत्र ग्रथितः अनुप्रासालङ्कारः श्रृङ्गरानुकूल एव। इत्यं पण्डितराजजगन्नाथेन- "ध्वन्यात्मभूते श्रृङ्गारे शब्दालङ्कारः विनिवेशयितुमर्हा एव" इति विलक्षणः सिद्धान्त विशेषः सुप्रतिष्ठापितः। एवं शब्दालङ्कारवैभवं पण्डितराजजगन्नाथेन सम्यक् पुरस्कृतमिति शम्।

***************

[1] द्. तत्रैव पण्डितराजजगन्नाथः - रसगङ्गाधरः I.पृ,.90

 ISSN – 2249-538X

# पण्डितराजजगन्नाथोक्तः काव्यकारणसिद्धान्तविशेषः

**आचार्यः वरप्रसाद राव्**

संस्कृतविभागाध्यक्षः

नागार्जुनविश्वविद्यालयः

आमुखम् –

“या स्मर्यमाणा श्रेयांसि सूते ध्वंसयते रुजः ।
तामभीष्टफलोदारकल्पवल्लीं स्तुवे शिवाम् ॥”

“छन्दः पादयुतां निरुकतनरवरां शिक्षादिजङ्घान्विताम् ऋक्सामोरुयुगामथर्व-जघनामध्वर्युवेदोदराम् । तर्क-न्यायकुचां पदस्मृतिभुजां काव्यारविन्दाननां वेदान्तामृतलोचनां भगवतीं वाग्देवतामाश्रये ॥” इति ।

अपारेऽस्मिन्नतिविचित्रकविपरम्परावाहिनि साहित्यसंसारे स्वकीय-काव्यामृतनिष्यन्देन दिगन्त–विश्रान्तकीर्तिः अनन्यासाधारणशेमुषीविलासः षड्दर्शनीवल्लभः नैकशास्त्रविहिंतविशेषपरिश्रमः ’वेगिनाटि’ वंशक्षीराम्बुधिचन्द्रमाः कविराजः पण्डितराजः जगन्नाथः तत्कर्तृकाः प्रबन्धविशेषाः इत्येतदुभयमपि न केवलम् आन्ध्रीयाणाम् अपि तु समेषां भारतीयानाम् अनल्पाय गौरवाय, सहृदयप्रवराणां सद्यः परनिर्वृतये च समुपकल्पन्ते इति नापरोक्षं समेषां विदुषाम् ।

महानदीनां, महापुरुषाणाञ्च जन्मभूः तीर्थपदेन प्रकीर्त्यते । पण्डितराजजगन्नाथः स्वजनुषा 'मुङ्गण्ड' ग्रामं भूषयामास इति हेतोः ग्रामोऽयं तीर्थस्थानं भजते । उक्तं चोपयुक्तमेव महाकविना भूवभूतिना –

"विलक्षणमहामतेरस्य जगन्नाथस्य देश-वंशगुरुपरम्परा-राजाश्रयादीन् अधिकृत्यात्र समासेन किञ्चित् प्रस्तूयते –

पण्डितराजस्य जगन्नाथस्य देश-वंशपरिचयः

भारतराष्ट्रस्य दक्षिणापथे राराजमाने आन्ध्रराज्ये पवित्रगोदावरीतीरे विद्यमाने 'कोनसीमा' प्रान्ते अमुलापुरसमीपवर्तीनि 'मुङ्गण्डे' संज्ञके ग्रामे 'मुनिरवण्ड' नाम्नि अग्रहारे 'वेगिइनाटि' शारवायाः 'उपद्रष्ट' गृहाभिधानेन समलङ्कृते परिवारे लब्धजन्मा परमतपस्वी विद्वदग्रेसरश्च पेरुभट्ट अथवा पेरम्भट्ट – नाम्ना प्रथितः द्विजर्षभः उवास । स तु सम्प्राप्ततारुण्यः लक्ष्मीनाम्नीं कन्यामणिं परिणीय जगन्नाथनामकम् आत्मजं लेभे । अद्वितीयप्रतिभासम्पन्नः जगन्नाथः कामेश्वर्यम्बाख्यायां द्वितीयायां पुत्रद्वयमधिजगाम । पण्डितराजस्य जगन्नाथस्य गुरुपरम्परा –

जगन्नाथः प्रारम्भिकशिक्षया सह दर्शनशास्त्रादीनि स्वपितुः 'सकलविद्याधर'इत्युपाधिभूषितात् पेरुभट्टादधीत्य निखिलनिगमागमागम-निष्णातः समभवत् । तदुक्तम् –

"तैलङ्गान्वयमङ्गलालयमहालक्ष्मीदयालालितः
श्रीमत्पेरमभट्टसू-सूनुरनिशं विद्वल्ललाटन्तपः ।
सन्तुष्टः कमलाधिपस्य कवितामाकर्ण्य तद्वर्णनं
श्रीमत्पण्डितराजपण्डितजगन्नाथो व्यधासीदिदम् ॥

 ISSN – 2249-538X

श्रीमज्ज्ञानेन्द्रभिक्षोरधिगतसकलब्रहमविद्याप्रपञ्चः
काणादीरक्षपादीरपि गहनूगिरो यो महेन्द्रादवेदीत् ।
देवादेवाध्यगीष्ट, स्मरहरनगरे शासनं जैमिनीयं
शेषाङ्कप्राप्तशेषामलभणितिरभूत् सर्वविद्याधरो यः ॥
पाषाणादपि पीयूषं स्यन्दते यस्य लीलया ।
तं वन्दे पेरुभट्टाख्यं लक्ष्मीकान्तं महागुरुम ॥" इति ।

जगन्नाथजनकः पेरुभट्टः ज्ञानेन्द्रभिक्षोः वेदान्तशास्त्रं, महेन्द्रपण्डितात् न्याय-वैशेषिकशास्त्रे, वाराणस्यां रवण्डदेव बुधवरात् पूर्वमीमासां, शेषवीरेश्वरविदुषः व्याकरण शास्त्रं चाधीत्य नानाशास्त्रपारदृश्वा बभूव ।

अत्र केचन् यत्तच्छब्दसम्बन्धमनवगच्छन्तः ज्ञानेन्द्रभिक्ष्वादयः जगन्नाथस्यैव आचार्यवर्या इति भ्रन्तिमाप्नुवन्ति । इह 'य' इत्यस्य (यस्य इत्यस्य च) तमित्युत्तरश्लोकेनान्वयः बोध्यः । जगन्नाथः "पाषाणादपि पीयूष" मित्यादिनिर्दिशन् पाषाणतुल्यस्य आत्मनः लेखनीतः रसगङ्गाधरनामा अमृतकल्पः अद्वितीय-ग्रन्थराजः विनिर्गतः इत्यत्र पितुः पेरुभट्टस्यालौकिकं वैदुष्यमेव एकमात्रं कारणमिति सप्रश्रयं न्यवेदयत् । जगन्नाथस्य राजाश्रयः –

जगन्नाथस्तु मुगलायिप्रभूणां मध्ये चतुर्थ-पञ्चमयोः कला-सौन्दर्यपोषकत्वेन सुविख्यातयोः जहाङ्गीर-षाजहान्भूपालयोः आस्थानसभां व्यभूषयत् । जगत्सिंह-प्राणनारायण-नरेन्द्रयोश्चास्थानीं जगन्नाथः भूषयामास। षाजहान्चक्रवर्ती जगन्नाथं 'पण्डितराज' इति उपाधिना

सभाजयामास । षाजहान्नरेशस्य ज्येष्ठंपुत्रः 'दारासिको' जगन्नाथस्य उत्तमसहाय आसीत् । उपरि निर्दिष्टानां भूपतीनां कालः सप्तदशशतकमिति चतित्रकाराः सोपपत्तिकं निर्धारयन्ति । अतः जगन्नाथस्य कालः सप्तदशश्तकमिति निर्धारयिदं शक्यते ।

पण्डितराजजगन्नाथस्य कृतिविशेषाः –

1) गङ्गालहरी – त्रिपञ्चाशत्पद्यैः पवित्रङ्गानदी संस्तुता । पीयूषलहरीति नामान्तरं चास्ति ।
2) अमृतलहरी – दशपद्यात्मिका यमुनास्तुतिः ।
3) सुधालहरी – त्रिंशत्पद्यैः सकलकर्मसाक्षिणः भगवतः सूर्यनारायणस्य स्तुतिः विहिता ।
4) लक्ष्मीलहरी – एकचत्वारिंशत्पद्यैः भगवतीलक्ष्मोः सुता ।
5) करुणालहरी – पञ्चषष्ठिपद्यैः भगवान् विष्णुः संस्तुतः ।
6) आसफविलासः – षाजहान्चक्रवर्तिनः श्वसुरस्य आसफखानस्य चरितं समुपवर्णितम् ।
7) भामिनीविलासः – करुण-श्रृङ्गार-वैराग्यद्यनेके विषयाः निरूपिताः ।
8) प्राणाभरणम् – कामरूपाधिपतेः प्राणनारायणस्य प्रशंसा विहिता ।
9) जगदाभरणम् – उदयापुराधीशस्य जगत्सिंहस्य प्रशास्तिवर्णनम् ।
10) चित्रमीमांसाखण्डनम् – अप्पयदीक्षितविरचितस्य चित्रमीमांसाग्रन्थस्य खण्डनम् ।
11) मनोरमाकुचमर्दनम् – भट्टोजिदीक्षितस्य मनोरमायाः खण्डनम् ।

 ISSN – 2249-538X

12) रसगङ्गाधरः – अलङ्कारशास्त्रविषयकः अद्वितीयः अपूर्णः ग्रन्थराजः।

13) पण्डितराजशतकसमुच्चयः

14) यमुनाचम्पूः – साम्प्रतं नोपलभ्यते।

अथालङ्कारशास्त्र आलङ्कारिकास्तु काव्यकारणसिद्धान्तं बहुधा विचारयामासुः । काव्यकारणसिद्धान्तं प्रतिपादितवताम् आलङ्कारिकाणां मध्ये विलक्षणविचक्षणः पण्डितराजजगन्नाथः अनितरसाधारणं स्थानम् अलङ्करोतीत्यत्र नास्ति संशयलेशः। तथा हि –

"तस्य (काव्यस्य) च कारणं कविगता केवला प्रतिभा । सा च काव्यघटनानुकूलशब्दार्थोपस्थितिः । तद्गतं च प्रतिभात्वं काव्यकारणातावच्छेदकतया सिद्धो जातिविशेष उपाधिरूपं वारवण्डम् । तस्याश्च हेतुः कवचिद् देवता महापुरुषप्रसादादिजन्यमदृष्टम् । कवचिच्च विलक्षण व्युत्पत्रिकाव्यकरणाभ्यासौ । न तु त्रयमेव । बालादेस्तौ विनापि केवलान्महापुरुषप्रसादादपि प्रतिभोत्पत्रेः ।" इति (रसगङ्गाधरः पृ.संख्या-९,२०,११)

"प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता ।" इति प्रतिभा लक्षिता विद्यते । प्रतिभा तावत् निसर्गतः वासनाबलात् अर्यात् संस्कारवशात् सिद्धयति।

काव्यम्

↓

प्रतिभा

↓

(क) देवताप्रसादः

(ख) महापुरुषप्रसादः

(ग) विलक्षणव्युत्पत्तिकाव्यकरणाभ्यासौ।

इह काव्यस्य मूलं कारणं तु प्रतिभा। तस्याः प्रतिभायाः उदयः त्रिधा संभवतीति पण्डितराजोऽभिप्रैति। प्रकारत्रयेण प्रतिभा उदियात् उद्घोषयत् जगन्नाथः।

(क) देवताप्रसादः – इह दृष्टान्तभूतस्तु आदिकविः वाल्मीकिः, कविकुलगुरुः कालिदासश्च।

दैवानुग्रहवशादेव तौ कविपुङ्गवौ बभूवतुः।

(ख) महापुरुषप्रसादः – नैषधीयचरितमहाकाव्य-कर्तुः श्रीहर्षस्य बाल्ये कश्चन योगीन्द्रः तस्मै चिन्तामणिमन्त्रोपदेशं चकार। तच्चिन्तामणिमन्त्रोपासनाबलात् श्रीहर्षः अलौकिकी प्रतिभाम् अध्यगच्छत्। तथा प्रतिभयामहाकाव्यं लिलेख श्रीहर्षः।

(ग) विलक्षणव्युत्पत्ति – काव्यकरणाभ्यासौ –

अत्र दृष्टान्तभूतः कविस्तु मुरारिः। अनर्घराघवनाटककर्ता तत्प्रस्तावनायां –

“देवीं वाचमुपासते हि बहवः सारं तु सारस्वतं


ISSN – 2249-538X

जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः।

अब्धिर्लङ्घितवानरभटैः किन्त्वस्य गम्भीरता-

मापातालनिमग्नपीवरतनुर्जानाति मन्थाचलः ॥”

इत्यनेन पद्येन प्राक्तनान् कतिपयकवीन् उपहसति।

गुरुकुले बहूनि वर्षाणि यावत् स्थित्वा गुरुजनमनोनुकूलां स्थितिं सम्पाद्य असाधारणव्युत्पन्नः समभवत् मुरारिः। गुरुकुलवासात् संप्राप्ताभ्यां विलक्षणव्युत्पत्तिकाव्यकरणाभ्यासाभ्यां मुरारिः अनर्घराघवाख्यं नाटकं प्रणिनाय इति तृतीयप्रकारस्य दृष्टान्तभूतः मुरारिः।

एतावता विस्तरेण सूक्ष्मेक्षिकतया च नान्येन केनचिदालङ्कारिकेण काव्यकारणसिद्धान्तविशेषः विवेचित इति सुस्पष्टं तत्त्वमास्ते । इत्थं काव्यकारणसिद्धान्तं गदितवताम् अलङ्कारिकाणां मध्ये पण्डितराजजगन्ताथ उत्कृष्टं स्थानं भजते इति शम्।

***************

# साहित्यशास्त्रे तात्पर्यवृत्तिविचारः

**आचार्या पि. इन्दिरा**

साहित्यविभागाध्यक्षा

राजीवगान्धीपरिसरः, शृङ्गेरी

आसंसारमुदारैर्विबुधैः प्रतिदिनगृहीतसारोऽपि।

अद्याप्यभिन्नमुद्रो विभाति वाचां परिस्पन्दः॥

इति वाक्परिस्पन्दस्य आनन्त्यम् आचार्यराजशेखरेणोक्तम् । भरतमुनिना शास्त्राणां वाङ्मयत्वं वाङ्निष्ठत्वं च नाट्यशास्त्रे एवं निरूपितम् –

वाङ्मयानीह शास्त्राणि वाङ्निष्ठानि तथैव च।

तस्मात् वाचः परं नास्ति वाग्घि सर्वस्य कारणम्॥ इति।

वाङ्मये सर्वत्र विवक्षावशात् अर्थरूपता विस्तृततया विधीयते । 'वाचामेव प्रसादेन लोकयात्रा प्रवर्तते' इति आचार्यदण्डिना उक्तरीत्या शब्दादर्थस्य बोधो भवति, अर्थोऽपि शब्देन सहैव तिष्ठति । केनापि व्यापारेण विना शब्दात् अर्थस्य बोधो न जायते । शब्दव्यापारे प्रमाणमिदम्। वृत्तिशब्दः व्यापारशक्त्यादिपदैः आचार्यैः व्यवह्रियते । वृत्तित्वं तु शाब्दबोधजनकज्ञानविषयपदार्थसम्बद्धत्वम् ।

व्यापारसङ्ख्याविषये मतभेदा विद्यन्ते। अयञ्च अभिधैव इति केचन, अभिधा लक्षणा चेति द्वौ इत्यन्ये, अभिधा, लक्षणा व्यञ्जना चेति त्रय इत्यपरे, तात्पर्यमिति चतुर्थमपि व्यापारम् इतरे च स्वीकुर्वन्ति।

 ISSN – 2249-538X

शब्दार्थसम्बन्धं नित्यं मन्यमाना मीमांसकाः अभिधानामकमेकमेव व्यापारं स्वीकुर्वन्ति । यत्परः शब्दः स शब्दार्थ इति तेषां सिद्धान्तः । अभिधावृत्तिमातृकाकारः मुकुलभट्टाचार्योऽपि केवलम् अभिधाया काव्ये सद्भावमङ्गीकृत्य अनया सर्वेषां काव्यार्थानां बोधनसमर्थतामपि निरूपितवान् । महिमभट्टस्तु अभिधया सङ्केतितार्थस्य मुख्यार्थस्य प्रतीतिः, अनुमानेन अर्थान्तरप्रतीतिरिति स्वीकरोति, 'शब्दस्यैकाभिधाशक्तिरर्थस्यैकैव लिङ्गता' इति । यथा बाणः एकेनैव वेगेन शत्रोः कवचं भिनत्ति, उरः छिनत्ति, प्राणान् हरति च तथा शब्दः एकेनैव व्यापारेण सर्वानर्थान् बोधयतीति भट्टलोल्लटमतम् ।

मीमांसकेषु एकदेशिनः शब्दस्य व्यापारद्वयं स्वीकुर्वन्ति । मुकुलभट्टः मुख्या लाक्षणिका चेति अभिधाया द्वैविध्यं प्रतिपादितवान् । आनन्दवर्धनाचार्यादयः शब्दस्य अभिधा-लक्षणा-व्यञ्जना इति व्यापारत्रयवादिनः ।

मीमांसकेषु अभिहितान्वयवादिनः भाट्टाः तात्पर्यार्थमपि व्यापारं स्वीकुर्वन्ति । व्यापारोऽयं वाक्यनिष्ठः, न तु पदरूपशब्दनिष्ठः । वाक्ये प्रथमं तावत् प्रत्येकपदानाम् अभिधया अर्थबोधानन्तरं, संसर्गमर्यादया अपदार्थः कश्चन वाक्यार्थः बुद्ध्यते । अयमेव तात्पर्यार्थः, तदर्थबोधकव्यापारः तात्पर्यव्यापारः । एवं वाक्यात् वाक्यार्थस्य बोधकव्यापारः तात्पर्यमिति तेषां मतम् ।

आलङ्कारिकेषु तात्पर्याख्यवृत्तिविचारः सर्वप्रथमम् आचार्य अभिनवगुप्तेन प्रस्तुतः । वाक्यार्थप्रत्यायनाय अभिहितान्वयवादिभिः

तात्पर्याख्यवृत्तिः स्वीकृतेत्यभिप्रैति लोचनकारः। समयापेक्षया वाच्यार्थावगमनशक्तिरभिधा, पदार्थेषु सामान्यात्मसु अभिधाव्यापारवत्त्वात् । अभिधाशक्तिसहाया परस्पर-पदार्थान्विताभिधानक्षमा शक्तिः तात्पर्यशक्तिः । मुख्यार्थबाधादिसहकार्यपेक्षा अर्थप्रतिभासनशक्तिः लक्षणाशक्तिः । अभिधातात्पर्यलक्षणाव्यतिरिक्तचतुर्थकक्षानिविष्टः प्रतिपत्तृप्रतिभासहाया अर्थद्योतनशक्तिः व्यञ्जनाशक्तिः ।

किन्तु काव्यशास्त्रे शब्दशक्तेः विशदविचारकत्वेन प्रसिद्धेन आनन्दवर्धनाचार्येण वक्तुः अभिप्रायविशेषस्य विषये तस्या अर्थस्य निर्णये प्राधान्ये वा निरूपयन्नपि कुत्रापि तात्पर्याख्यवृत्तिविषये न किमपि उल्लिखितम् । शब्दव्यवहारे त्रयः प्रकारा अभ्युपेतव्या इत्यभिप्रायं निरूपयन् आनन्दवर्धनाचार्यः वाचकत्वगुणवृत्तिव्यञ्जनाख्याः तिस्रो व्यापारभेदाः ध्वन्यालोकस्य वृत्तौ प्रपञ्चयति- 'तदेवं शाब्दे व्यवहारे त्रयः प्रकाराः-वाचकत्वं गुणवृत्तिर्व्यञ्जकत्वं चेति । तत्र व्यञ्जकत्वं यदा व्यङ्ग्यप्राधान्यं तदा ध्वनेस्तस्य च अविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति द्वौ प्रभेदावनुक्रान्तौ' इति ।

तात्पर्यस्य विषये तस्य महत्त्वविषये वा प्रपञ्चयन्नपि यस्मात् प्रायेणैव वाक्यानां वाच्यव्यतिरिक्ततात्पर्यविषयार्थावभासित्वं इत्यादिना तस्य वृत्तित्वं नैव प्राह आनन्दवर्धनाचार्यः ।

शृङ्गारप्रकाश-सरस्वतीकण्ठाभरणनाम्नोः ग्रन्थयोः सङ्ग्रथनात् नितरां प्रसिद्धस्य भोजराजस्याविर्भावः साहित्यशास्त्रे ध्वनिविरोधिवादस्य मूर्धन्यावस्थायामेव आसीत् । तदानी आनन्दवर्धनाचार्येण व्यञ्जनाशब्दवृत्त्या प्रतीतिविषयतां प्रापितस्य प्रतीयमनार्थस्यान्तर्भावः अनुमेयार्थे तात्पर्यार्थे वा

 ISSN – 2249-538X

समुपदिश्यते समीक्षकैः । भोजदेवेनापि शब्दार्थस्वरूपं विवृण्वता, पदेन अभिप्रायस्य अप्रकाशनात् वाक्येनैव तत्सम्भवात् तस्य वाक्यप्रतिपाद्यत्वं तात्पर्यविषयीभूतत्वं च अङ्गीकृतम् । तेनोक्तं शृङ्गारप्रकाशे-“यत्परः शब्दः स शब्दार्थः इति तात्पर्यम् । तच्च वाक्य एवोपपद्यते । पदमात्रेण अभिप्रायस्य प्रकाशयितुमशक्यत्वात् । वाक्यप्रतिपाद्यं तद्वस्तु त्रिरूपं भवति । अभिधीयमानं प्रतीयमानं ध्वनिरूपं च” इति ।

यत्र यदुपात्तशब्देषु मुख्यगौणीलक्षणाभिः शब्दशक्तिभिः स्वमर्थम् अभिधाय उपरतव्यापारेषु आकाङ्क्षा-सन्निधि-योग्यतादिभिः वाक्यार्थमात्रमभिधीयते, तदभि-धीयमानम् । यथा गौर्गच्छति । गौः गच्छतीत्युक्ते सास्नादिविशिष्टा गोत्वजातिमती व्यक्तिर्गच्छतीत्यभिधीयते ।

वाक्यार्थावगतेरुत्तरकालं वाक्यार्थ उपपद्यमानः अनुपपद्यमानो वा अर्थप्रकरणौचित्यादिसहकृतौ यत्प्रत्याययति तत्प्रतीयमानम् । यथा ‘विषं भक्षय मा चास्य गृहे भुङ्क्थाः’ इत्युक्ते सति वरं विषं भक्षितं, न पुनरस्य गृहे भुक्तम् इति प्रतीयते । अत्र परिपूर्णे वाक्ये नार्थः परिपूर्णः इति तात्पर्यशक्तेरवकाशः ।

अर्थशब्दोपायादुपसर्जनीकृतस्वार्थौ वाक्यार्थावगतेरनन्तरमनुनादरूपं प्रतिशब्दरूपं वा अभिव्यञ्जयति, तद् ध्वनिरूपम् । तच्च न सार्वत्रिकम् । तथा हि यथा निवृत्ते अभिघाते कस्यचिदेव कांस्यादेर्द्रव्यस्यानुनादो जायते, कस्यचिदेव कन्दरादेः प्रतिशब्दः श्रूयते, तथा कस्यचिदेव वाक्यस्य अभिधीयमान-प्रतीयमानवाक्यार्थप्रतीतेरनन्तरं ध्वनिरुपलभ्यते इति । यथा ‘निमिषत्येषा’ इत्युक्ते अक्ष्णोः निमेषोऽभिधीयते, देवी न भवतीति प्रतीयते,

रूपातिशयश्च ध्वनतीति । एतेषां त्रयाणां तात्पर्यप्रभेदानाम् अनेके भेदाः सम्भवन्ति इति शृङ्गारप्रकाशे उक्तं च।

तेन अभिधीयमानं चतुर्धा विभक्तम् – विधिरूपम्, निषेधरूपम्, विधिनिषेधरूपम् अविधिनिषेधरूपं चेति । प्रतीयमानस्यानेकविधत्वं भोजदेवेन प्रोक्तम् । ध्वनिश्च प्रथमं द्विधा विभक्तः-अर्थध्वनिः शब्दध्वनिश्च । तद्द्वयमपि अनुनादरूपप्रतिशब्दरूपत्वात् पुनः द्विविधं इति प्रतिपादितं च। अत्र व्यञ्जनाव्यापारः भोजराजेन नाभ्युपगतः।

अभिधीयमान-प्रतीयमानव्यापारैः सहैव तात्पर्यमपि ध्वन्यमानं भवति । तदर्थं पृथक् व्यञ्जनाव्यापारो नावश्यक इति तदीयमतम् । इत्थम् वाक्यात् प्रतिपद्यमानं तात्पर्यमेव मुख्यत्वेन अङ्गीकृत्य तद्भेदत्वेन अभिधीयमान-प्रतीयमान-ध्वनिरूपार्थाः भोजदेवेन वर्णिताः।

ध्वनिरूपार्थस्तु तात्पर्यस्यैव भेद इति अस्य मतम् । उक्तं च तेन शृङ्गारप्रकाशस्य षष्ठप्रकाशे -

तात्पर्यमेव वचसि ध्वनिरेव काव्ये।
सौभाग्यमेव गुणसम्पदि वल्लभस्य।
लावण्यमेव वपुषि स्वदतेऽङ्गनाय
शृङ्गार एव हृदि मानवतो जनस्य॥ इति।

ध्वनितात्पर्ययोः विशेषः क इति भोजराजेन एवमुक्तम्-

यदवक्रं वचःशास्त्रे लोके च वच एव तत्।
वक्रं यदर्थवादादौ तस्य काव्यमिति स्मृतिः॥
यदभिप्रायसर्वस्वं वक्तुर्वाक्यात् प्रतीयते।

 ISSN – 2249-538X

तात्पर्यम् अर्थधर्मस्तच्छब्दधर्म पुनर्ध्वनिः ॥

सौभाग्यमिव तात्पर्यमान्तरो गुण इष्यते ।

वाग्देवतायां लावण्यमिव बाह्यस्तयोर्ध्वनिः ॥

द्वादशविधसम्बन्धयुक्तत्वं साहित्यस्येति अनेन प्रत्यपादि । उक्तं च-

तत्राभिधा-विवक्षा-तात्पर्य-प्रविभाग-व्यपेक्षा-सामर्थ्य-अन्वय-एकार्थीभाव-दोषहान-गुणोपदान-अलङ्कार-रसवियोगरूपाः शब्दार्थयोः द्वादशसम्बन्धाः साहित्यमुच्यते । साहित्याद्भिन्नं यद् वाङ्मयं भवति तद् दोषहानगुणोपादान-अलङ्कार-रसवियोगरूपत्रिभिः सम्बन्धैः रहितं भवति । अष्टाभिः सम्बन्धैः युक्ते वाङ्मये यद् तात्पर्यं तदेव वक्रत्वविशिष्टे काव्ये ध्वनिपदेनोच्यते । काव्यस्य व्यवच्छेदकं वक्रत्वं, तस्यैव च द्वादशविधसम्बन्धसमवेतत्वं च । एवं काव्य-अकाव्ययोः सद्भावात् तात्पर्यस्य व्यापकत्वम्, ध्वनेश्च काव्यमात्रे सद्भावात् व्याप्यत्वम् इति अस्याशयः ।

शब्दशक्तिविषयेऽनेन उद्घोषितम्-अभिधा-गौणी-लक्षणेति तिस्रः शब्दशक्तयः । तेषु शब्दस्य अर्थाभिधायिनी शक्तिः अभिधा, तया स्वरूप इव अभिधेये प्रवर्तमानः शब्दः वृत्तित्रयेण वर्तते, ताश्च मुख्या गौणी लक्षणा । तत्र साक्षात् अव्यवहितार्थाभिधायिका मुख्या । गम्यमानशौर्यादिगुणयोगव्यवहितार्था गौणी, स्वार्थाविनाभूतार्थान्तरोपलक्षणा तु लक्षणेति ।

यदा तु शब्दः स्वार्थतः क्रियासिद्धौ साधनभावं गन्तुमसमर्थः, तदा अभिधेयाविनाभूतमर्थान्तरं लक्षयति तदा सा लक्षणावृत्तिः । उक्तं च-

अभिधेयाविनाभूतप्रतीतिर्लक्षणेति या ।

सैषा विदग्धवक्रोक्तिजीवितं वृत्तिरिष्यते ॥

प्रत्येकं च यदा तिस्रोऽपि द्विधाभूय पृथक् षोढा भिद्यन्ते ।

इत्थम् अनेन शब्दवृत्तित्रयं प्रतिपाद्य अभिधाशक्तेश्च मुख्यत्वं प्रदर्श्य वाक्यार्थतया अभ्युपपन्नस्य अर्थस्य अभिधीयमान-प्रतीयमानध्वनिभेदात् त्रैविध्यमभ्यधायि । न तत्र ध्वनिशब्देन कश्चित् शब्दव्यापारः भोजराजस्य अभिमत इति प्रतिभाति।

अभिधीयमानस्य ये अभिधा-लक्षणा-गौण्यः व्यापाराः, प्रतीयमानस्य च तात्पर्याख्यो व्यापारः, ध्वन्यमाने अन्तर्हितो वर्तते । अभिधीयमान-प्रतीयमानयोः ये व्यापाराः तैः सह एव तात्पर्यं ध्वन्यमानं वर्तते । तन्मते ध्वन्यमानोऽपि तात्पर्यरूपः । तात्पर्यप्रत्यायनार्थं व्यञ्जनाव्यापारः पृथक् नैव अङ्गीकार्य इति अस्याभिप्रायः। तात्पर्यं महाविषयं सर्ववादिसम्प्रतिपन्नं चेति अस्य मतम्। उक्तञ्च-

अभिधात्री मता शक्तिः पदानां स्वार्थनिष्ठता।
तेषां तात्पर्यशक्तिस्तु संसर्गावगमावधि ॥ इति।

एवं तात्पर्यं व्यापको धर्मः, त्रिषु अभिधीयमान-प्रतीयमान-ध्वन्यमानेषु वर्तमानत्वात्। तात्पर्याख्यशक्तिस्तु केवलं प्रतीयमानवर्तिनी। सा तु पदार्थस्य निराकाङ्क्षप्रत्ययोत्पादनपर्यन्तत्वात् पदानां संहत्यकारिताजनिता च । पदानां संहत्यकारित्वादेव संसर्गावगमः । परस्परमपेक्षितानि पदानि संहत्य कार्यं करिष्यन्ति।

प्रकृतिप्रत्ययौ यद्वत् अपेक्ष्येते परस्परम्।
पदं पदान्तरं तद्वद्वाक्यं वाक्यान्तरं तथा ॥

 ISSN – 2249-538X

इति श्लोकवार्तिककारिकानुसारम् अनेन निरूपितम्।

ध्वनिवादिभिः अर्थप्रकरणादिवशाच्च अर्थशक्तिमूलव्यञ्जनायाः यत् प्रतिपादनं कृतम्, यथा-"वक्तृप्रतिपत्तृप्रतिभासहकारित्वं ह्यस्माभिर्द्योतनस्य प्राणत्वेन उक्तम्" इत्यादि, तदनुसारी एव भोजराजेन प्रतीयमानार्थस्य स्थितिरङ्गीकृता इति ज्ञातुं शक्यते। किन्तु तात्पर्यान्त-र्गतत्वेन प्रतिपादितम्। प्रतीयमानस्य विविधप्रकाराणां निरूपणप्रसङ्गे उदाहरणान्यपि क्वचित् ध्वन्यालोकानुसारीण्येव। यथा क्वचित् विधौ निषेधः, "भ्रम धार्मिक" इति, क्वचिन्निषेधे विधिः यथा "श्वश्रूरत्र निमज्जती"त्यत्र इत्यादि। एवं ध्वनिरूपतात्पर्यस्य अर्थध्वनिशब्दध्वन्योः भेदनिरूपणप्रसङ्गे अनुनादध्वनिम् एवं लक्षयति-"योऽभिधीयमान-वाक्यार्थानुस्यूतमेव कांस्यानुनादरूपम् अर्थान्तरं ध्वनति, तद्यथा-शिखरिणि क्व नु नाम इत्यत्र अश्रुतवाक्यार्थः वर्णनीयाया स्वानुरागप्रकाशनं ध्वनति"। इति। एवम् इदमवगन्तुं शक्यते यत् अत्रापि ध्वन्यालोककारानुसारित्वं वर्तते इति।

तात्पर्यानतिरेकाच्च व्यञ्जकत्वस्य न ध्वनिः।
ध्वनिश्चेत् स्वार्थविश्रान्तं वाक्यमर्थान्तराश्रयम्।
तत्परत्वं त्वविश्रान्तौ, तन्न, विश्रान्त्यसम्भवात्।
एतावत्येव विश्रान्तिस्तात्पर्यस्येति किं कृतम्॥
यावत्कार्यप्रसारित्वात् तात्पर्यं न तुलाद्धृतम्।
प्रतिपाद्यस्य विश्रान्तिरपेक्षापूरणादिति।
वक्तुर्विवक्षताप्राप्तेरविश्रान्तिर्न वा कथम्॥
पौरुषेयस्य वाक्यस्य विवक्षापरतन्त्रता।

वक्त्रभिप्रेततात्पर्यमतः काव्यस्य युज्यते ॥

इति श्रीधनिकेन दशरूपके चतुर्थप्रकाशे-“यथा अवोचाम काव्यनिर्णये” इति काव्यनिर्णयान्तर्गतकारिकाः उद्धृताः । वाक्यार्थनिरूपणे परिकल्पित-अभिधादिशक्तिवशेनैव समस्तवाक्यार्थावगतिः, न रसादीनां काव्येन सह व्यङ्ग्यव्यञ्जकभाव इति तदीयं मतम् उल्लिखितं च। काव्ये प्रयुक्तानां शब्दानां तात्पर्यभूतोऽर्थः रस एव विभावाद्यर्थाः पदार्थस्थानीयाः, रसादिरूपोऽर्थः वाक्यार्थस्थानीय इत्यतः न काचिदपरा शक्तिः तदर्थमावश्यकीति तस्य मतम् । तात्पर्यशब्दे तच्छब्दः रसादिरूपस्य वाक्यार्थस्य वाचकः, तस्मिन् पराः तत्पराः, तेषाञ्च भावः तात्पर्यम् इत्यर्थोऽभिप्रेतः । कुमारिलभट्टेन पदार्थानां क्रियाकारकसम्बन्धान्वयप्रत्ययार्थं वाक्यार्थबोधजनिका तात्पर्यवृत्तिः कल्पिता । किन्तु पदार्थान्वयातिरिक्तरसादिरूपवाक्यार्थप्रत्यायनार्थं व्यञ्जनाव्यापारनिरासार्थं च तात्पर्यवृत्तिस्वीकरणं तत्र कृतं वर्तते।

भावप्रकाशने शारदातनयेन एवमुदीरितम्-

वाक्यार्थं प्रति शेषत्वं यत्स्यादुच्चारणस्य तु।
तद् तात्पर्यं, त्रिधा तद् स्यात् वाक्यार्थः त्रिविधत्वतः।
एवं त्रिरूपं तात्पर्यं तत्तत्तात्पर्यवेदिभिः।
वक्तृद्वारा वाक्यधर्म एवेति परिकीर्त्यते ॥

इति। ध्वनितात्पर्ययोः भेदः ब्राह्मणब्रह्मचारिवत् भवतीति अस्य मतम्।

विद्यानाथेन तथा वृत्तिकारेण कुमारस्वामिना च प्रतापरुद्रयशोभूषणे-‘तात्पर्यार्थोऽपि व्यङ्ग्यार्थ एव, न पुनः पृथग्भूतः। तस्मात् व्यञ्जनाऽपरपर्यायमेव

 ISSN – 2249-538X

तात्पर्यं कविभिरङ्गीकृतम्, नान्यदिति सिद्धम्’-इत्यादिना शारदातनयमते विप्रतिपत्तिरपि प्रकटिता।

अभिनवगुप्तेन तात्पर्यशक्त्यैव अन्वयप्रतिपत्तिः इति वाक्यार्थस्य अन्वयमुखेन प्रतिपादनाय तात्पर्यशक्तेः उपयोगः अङ्गीकृतः। मम्मटाचार्योऽपि तात्पर्यवृत्तिविचारं लक्षणग्रन्थे काव्यप्रकाशे कृतवान् । तात्पर्यार्थ्योऽपि केषुचित् इति आकाङ्क्षा-योग्यता-सन्निधिवशात् वक्ष्यमाणस्वरूपाणां परस्परसमन्वये तात्पर्यार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थः समुल्लसतीत्यभिहितान्वयवादिनां मतम् इति । एवं ,

तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने।
तात्पर्यार्थं तदर्थं च वाक्यं तद्बोधकं परे॥

इति साहित्यदर्पणकारेणाप्युक्तम् । वाक्येन तात्पर्यार्थः प्रत्याय्यते, स च तात्पर्यार्थः वाक्यार्थ एव इति अस्य मतम्। पण्डितराजेन तात्पर्यस्य वृत्तित्वं नोक्तम्, तथापि नानार्थस्थले तात्पर्यस्य उपयोग इति –‘तर्हि तात्पर्यज्ञानस्य कुत्रोपयोग इति चेत् अस्मिन्नर्थेऽयं शब्दः प्रमाणवेद्य इत्यादिनिर्णये प्रवृत्त्याद्युपयोगिनीति गृहाण’ इत्यादिना तात्पर्यविचारः विहितः।

एवं साहित्यशास्त्रे तात्पर्यवृत्तिनिरूपणं विविधैः आचार्यैः विभिन्नरीत्या कृतं वर्तते ।

**व्यतिरेकालङ्कारः**

लौकिकपदार्थानाम् अलौकिकविभावादिरूपेण समर्पणार्थमेव शब्दगतानाम् अर्थगतानां चालङ्काराणां प्रयोगः कविभिः क्रियते । ललितोचितसन्निवेशचारुणः काव्यस्य चारुत्वस्थाने भवतः शब्दार्थौ,

चारुत्वहेतवश्चालङ्कारादयः । 'सौन्दर्यमलङ्कारः' इति ब्रुवाणेन वामना-चार्येण सौन्दर्यम् अलङ्कारशब्दस्य पर्यायत्वेन निर्दिश्य काव्यसौन्दर्याधायकाः सर्वे घटकाः अलङ्कारपदव्यपदेश्या इति प्रतिभाति । एवं व्यापकरूपसौन्दर्यमित्यर्थे व्याप्यरूपकटककुण्डलादिसदृश इत्यर्थेऽपि अलङ्कारशब्दस्य प्रयोगः अलङ्कारशास्त्रे दृश्यते ।

आचार्यवैद्यनाथेन अलङ्कारचन्द्रिकायाम् एवमुक्तम्-"अलङ्कारत्वञ्च रसादिभिन्न-व्यङ्ग्यभिन्नत्वे सति शब्दार्थान्यतरनिष्ठा या विषयतासम्बन्धा-वच्छिन्ना चमत्कृतिजनकता-वच्छेदकता तदच्छेदकतया तदवच्छेदकत्वम्" इति । समवायसम्बन्धावच्छिन्न-चमत्कारत्वावच्छिन्न-चमत्कारनिष्ठजन्यता-निरूपिता जनकता अनुप्रासादिविशिष्टशब्दज्ञाने, उपमादिविशिष्टार्थज्ञाने च, तदवच्छेदकता विषयतासम्बन्धेन अनुप्रासादिविशिष्टे शब्दे, उपमादि-विशिष्टेऽर्थे च तदवच्छेदकत्वम् अनुप्रासादित्वम् उपमादित्वं च अलङ्कारत्वम् इति ।

सङ्क्षेपेण इदं वक्तुं शक्यते यत् रसादिभिन्नत्वे सति व्यङ्ग्यादिभिन्नत्वे सति शब्दार्थनिष्ठत्वे सति काव्यचमत्कारोत्पादकत्त्वम् अलङ्कारत्वम् इति ।

अर्थालङ्कारेषु व्यतिरेकालङ्कारः औपम्यमूलक-भेदप्रधानालङ्कारः भवति । व्यतिरिच्यते उपमानाद् व्यावर्त्यते अनेन उपमेयमिति व्युत्पत्तिः । विशेषप्रकारेण अतिरेकः अथवा आधिक्यं पदस्यास्यार्थः । गुणविशेषेण उपमानापेक्षया उपमेयस्योत्कर्षोऽत्र दृश्यते । स्वभावतो न्यूनगुणस्य उपमेयस्य उत्कर्षवर्णने चमत्कारः अनुभूयते । वैधर्म्यप्राधान्यात् उपमानोपमेययो-

भेदप्रतीतिरपि अत्र वर्तते । उपमेयस्याधिक्यवर्णने तात्पर्यात् उपमानस्यापकृष्टत्वमपि सञ्जायते । एवं व्यतिरेकः औपम्यमूलक-भेदप्रधानालङ्कार इति सिद्धम् ।

भामहादारभ्य विश्वेश्वरभट्टपर्यन्तैः सर्वैः आलङ्कारिकैः व्यतिरेकालङ्कारमधिकृत्य विवेचनम् कृतम् । व्यतिरेकालङ्कारस्वरूपनिरूपणे तेषां मतभेदोऽपि अस्ति । उपमानादुपमेयस्य गुणविशेषवत्त्वेन उत्कर्षः व्यतिरेकः इति पण्डितराजकृत-व्यतिरेकालङ्कारलक्षणम् । सादृश्यस्य प्रकरणात् तदपेक्षया व्यतिरिच्य पृथक्कृत्य कथनं व्यतिरेकः, स च योगार्थः । उपमानापेक्षया उपमेयस्य गुणविशेषशालिताहेतुकोत्कर्षः व्यतिरेकः । अत्र व्यतिरेकपदार्थः उत्कर्षाधिक्यमेव, उपमेयस्य गुणविशेषवत्वमेव तद्धेतुः, प्रतीपालङ्कारेऽतिव्याप्तिवारणाय गुणविशेषवत्त्वेन इति तृतीयान्तं पदम् । तस्यार्थश्च वैधर्म्यम् । तृतीयार्थो हेतुः । प्रतीपादौ उपमेयस्य केवलेन उपमानस्वरूपलाभेन उपमानकृत एव उत्कर्षः, न तु वैधर्म्यहेतुकः । एवञ्च उपमानापेक्षया उपमेयस्य वैधर्म्यहेतुकोत्कर्षः व्यतिरेकः इति सिद्धम् ।

अधिकगुणवत्त्वमात्रम्, उपमानगत अपकर्षमात्रं वा न व्यतिरेकस्वरूपम्, किमिति चेत् तयोरुपमेयोत्कर्षाक्षेपमन्तरेणासुन्दरत्वात् । अधिकगुणवत्त्ववर्णने तथा सादृश्याभाववर्णने वा यदि उपमेयोत्कर्षो न प्रतीयते, तदा चमत्काराभावादलङ्कारत्वमपि न सिद्ध्यति । एवं सादृश्याभावमात्रमपि न व्यतिरेकः । साधारणधर्मप्रयोज्यसादृश्यमेव साधर्म्यपदस्यार्थः, तद्वैपरीत्यमेव वैधर्म्यम् (सादृश्याभावः) । न

केवलमुपमानादुपमेयस्य उत्कर्षे सादृश्याभावः, किन्तु अपकर्षेऽपि । अपकर्षलब्धः सादृश्याभावः कविप्रतिभयाऽसम्पृक्तत्वेनासुन्दरः । असुन्दरत्वादेव नालङ्कारत्वम् । एवम् उपमेयोत्कर्षपर्यवसायी सादृश्याभावो व्यतिरेक इति लक्षणस्वीकरणमेव युक्तम् । उदाहरणम्-

अनिशं नयनाभिरामया रमया संमदिनो मुखस्य ते ।
निशि निःसरदिन्दिरं कथं तुलयाम कलयापि पङ्कजम् ॥

इति । अत्र उपमेये मुखे निश्यपि अविनाशिशोभावत्त्वमधिको गुणः, प्रकर्षहेतुरुक्तः । उत्तरार्द्धे च उपमानापकर्षः सादृश्याभावश्च । एवम् उपमेयोत्कर्षत्वम्, सादृशाभाववत्त्वं चात्र वर्तते इत्यतोऽयं व्यतिरेकालङ्कारोदाहरणमेव ।

विश्वेश्वरभट्टः अलङ्कारकौस्तुभे व्यतिरेकालङ्कारमेवं निरूपयति- "उभयोः साम्यप्रोक्तौ विशेष उपमेयगे व्यतिरेकः इति । व्यतिरिच्यते उपमानाद्व्यावर्त्यते अनेन उपमेयमिति व्युत्पत्तिः । उपमानोपमेययोः सादृश्ये केनचिद्धर्मेण यदि उपमानापेक्षया उपमेयस्य विलक्षणता वर्ण्यते तत्र व्यतिरेकालङ्कारः । एवमुपमानापेक्षयोपमेये वैशिष्ट्यम् उपमेयोत्कर्षवत्त्वं च । अलङ्कारसर्वस्वकारः रुय्यकः व्यतिरेकलक्षणम् एवमुक्तवान्-

"भेदप्राधान्ये उपमानादुपमेयस्याधिक्ये विपर्यये वा व्यतिरेकः इति । उपमानादुपमेयस्य अधिकगुणत्वे, न्यूनगुणत्वे वा व्यतिरेकालङ्कार इति आचार्यस्य मतम् । उपमेयस्य न्यूनत्वमूलकव्यतिरेकालङ्कारम् एवमुदाहरति -

क्षीणः क्षीणोऽपि शशी भूयो भूयोऽभिवर्धते सत्यम् ।
विरम प्रसीद सुन्दरि यौवनमनिवर्ति यातं तु ॥

 ISSN – 2249-538X

इति । प्रियहितकारिण्याः दूत्याः वचनमिदम् । यौवनम् सर्वप्रकारेण सर्वासु उत्तममपि गतं सत् गतमेव, पुनरागमनाभावात्  न्यूनता ततो वर्तते, चन्द्रस्तु क्षीणताप्राप्त्यनन्तरं भूयोऽपि वृद्धिं प्राप्नोत्येव इति ततोऽधिकः । अतः उपमानाद् चन्द्रात् उपमेयस्य यौवनस्य न्यूनतायामिदमुदाहरणम् इति रुय्यकमतम् ।

अलङ्कारसर्वस्वव्याख्याने विमर्शिनीकारः एवं विवृणोति- “उपमानादुपमेयस्य न्यूनत्वम् अहृद्यत्वात् न स्वीकरणीयमिति यदुक्तं तन्न । अस्मिन्नुदाहरणे इदं यौवनं यातं सत् पुनर्नागच्छतीति ईर्ष्यादिविघ्नपरिहारेण निरन्तरेण प्रियेण सह जन्म सफलयितव्यम्, कुरु प्रसादम् इत्युपदेशे प्रियं प्रति कोपशमनाय चन्द्रापेक्षया यौवनस्य अपुनरावर्तनं न्यूनगुणत्वेन विवक्षितम् । अतः न्यूनत्वेऽपि व्यतिरेकः, प्रकृतोपरञ्जकत्वात् हृद्यत्वं च इति ।

एतन्न युक्तमिति पण्डितराजः । यतः अस्मिन् वचने यौवनस्य न्यूनतावर्णनरूपनिरूपणेन, ‘किमेवं रूपयौवनस्य कृते मया मानाद्विरंस्यते, यातु नाम यौवनमिति प्रतिकूलेनार्थेन प्रकृतार्थेऽपुष्टतापत्तेः । तस्मादत्र चन्द्रादपि अधिकगुणत्वमेव विवक्षितं, न न्यूनगुणत्वम् । चन्द्रः पुनःपुनरागमनेन लोके सुलभः, सुलभत्वादेव नात्र माहात्म्यम्, किन्तु यौवनम् अपुनरागमनेनातिदुर्लभतरम्, अत एवोत्कृष्टमिति माहात्म्यमधिकम् । सर्वगुणनिदानत्वं यौवनस्य इत्याद्यनुपात्तगुणकृतोत्कर्षोऽपि प्रकृत-वाक्यार्थपरिपोषाय सहृदयमनसि आविर्भवति ।

अलङ्कारकौस्तुभे विश्वेष्वरभट्टस्तु एवमभिप्रैति-“क्षीणः क्षीणेति श्लोके चन्द्रयौवनयोः उपमानोपमेयभावः नात्र विवक्षितः, किन्तु चन्द्रक्षय-यौवनक्षययोरेव । चन्द्रक्षयस्तु वृद्धियुक्ततया अपकृष्टः, यौवनक्षयस्तु तस्मिन् शरीरे पुनरप्राप्ततयोत्कृष्टः इति उपमेयस्य उत्कृष्टत्वं साधितं च । एवं प्रकृतार्थानुकूलस्य मानत्यागस्य अत्र आवश्यकत्वमस्ति । एवं निरूपणादेव प्रकृतानुकूलरसपरिपोषकत्वं हृद्यत्वं च सिद्ध्यति । अतः अस्मिन् श्लोके व्यतिरेकालङ्कारः। सर्वत्र उपमेयोत्कर्षे एव व्यतिरेकालङ्कारस्य चारुता इति,

हनुमदाद्यैर्यशसा मया पुनर्द्विषां हसेत् दूतपथस्सितीकृतः।

इत्यनेन विशदयति कौस्तुभकारः । अत्र उत्कर्षापकर्षौ न वास्तवाभिमतौ, किन्तु प्रकृतार्थातिशायकत्व-अनतिशायकत्वस्वरूपौ। अत्र नलस्य स्वनिन्दया लब्धनिर्वेदातिशयरूपप्रकृतस्य दौत्यनिष्ठोक्तापकर्षेणापि उत्कृष्टत्वम् । अत एव नलेन हनुमदादिदूत्यपेक्षया स्वकृतदूत्ये हीनत्वं प्रदर्श्यते। तस्मात् अत्र उपमानादुपमेयस्यापकर्ष इति पूर्वपक्षो निरस्तः । एवम्, ‘जनस्थाने भ्रान्तं कनकमृगतृष्णान्धितधिया—’ अत्र राजसेवानिर्विण्णस्य कवेः उक्तिरियम् । उपमेये वक्तरि कुशलवसुताप्राप्त्यभावस्य न्यूनतारूपस्यापि दैन्यादिसमुत्कर्षकत्वात् उपमेयप्रकर्ष एव।

मम्मटपक्षेऽपि क्षीणः क्षीणोऽपि इत्यत्र उपमेयोत्कर्ष एव। यतः अत्र यौवनगतास्थैर्याधिक्यस्यैव विवक्षितत्वात्, यथा चन्द्रोऽपि क्षीणः तथा यौवनमपि। परं चन्द्रः क्षीणो भूत्वाऽपि पुनर्वर्धते, यौवनं नेति क्षीणताधिक्यं यौवने। तदा उपमानात् चन्द्रात् उपमेयस्य यौवनस्य आधिक्य एव व्यतिरेकः, न न्यूनतायाम्। नागेशभट्टेनापि अयमाशय उल्लिखितः।

 ISSN – 2249-538X

एवमेव विश्वेश्वरभट्टः अलङ्कारकौस्तुभे उपमेयस्य न्यूनत्वं व्यतिरेके नाङ्गीकरोति।

अप्पय्यदीक्षितमतमपि एवं खण्डयति-

रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियायाः गुणै-

स्त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्ताः सखे मामपि।

कान्तापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः

सर्वं तुल्यमशोक केवलमहं धात्रा सशोकः कृतः॥

अत्र नायके अपकर्षः व्यतिरेकस्वरूपतां गच्छति। यतः सर्वैरपि धर्मैः समानयोः उपमानोपमेययोः केनापि धर्मेण प्रतीयमानं वैलक्षण्यं व्यतिरेकः, तच्च उपमेयस्योत्कर्षो वा अपकर्षो वा उभयाभावतः स्ववैचित्र्यमात्रविश्रान्तभाग्भवति । अत्र नायकस्य सशोकत्वेन अशोकत्वापेक्षया अपकर्ष इति अप्पय्यदीक्षितमतम्।

पण्डितराजस्तु एतच्चिन्त्यमेव इति वदति। यतः उपमेयस्य आधिक्ये सत्येव व्यतिरेकत्वे एव व्यतिरेकः, न तु न्यूनत्वे। नायकस्य सशोकत्वं वास्तवम्, वृक्षस्याशोकत्वं संज्ञा एव । अत एव व्यतिरेके हृद्यत्वाभावात् नालङ्कारत्वम् । यथा सुरतावसरे रत्याद्यनुकूलतया भूषणदूरीकरणमेव भूषणम्, तथा उपमादूरीकरणमेवात्र रसानुगुणतया चमत्कारि । तदर्थं सः ध्वनिकारमतमपि प्रदर्शयति - "अत एव ध्वनिकृता सहृदयधुरन्धरेण- 'सुकविस्तु रसानुसारेन क्वचिदलङ्कारसंयोगं क्वचिदलङ्कारवियोगञ्च कुर्यात्' इत्युक्त्वा रक्तस्त्वम्---इति पद्यं सादृश्यदूरीकरणे उदाजह्रे।

एवं मम्मटभट्टेनापि उपमेयस्य आधिक्यमात्रं व्यतिरेक इत्युक्तम् । व्यतिरेके न्यूनत्वमनेनापि निरस्तम् । एवम् उपमानादुपमेयस्य उत्कर्षः व्यतिरेकः इति स्पष्टम् । धर्मान्तरप्रयुक्तसादृश्यविवक्षागर्भ धर्मविशेषप्रयुक्तसादृश्यनिषेध एव व्यतिरेकः । सादृश्यप्रयोजकधर्मप्रयुक्त-सादृश्यनिषेधेन उपमेयोत्कर्ष व्यतिरेकालङ्कार इति सिद्धञ्च ।

***************

 ISSN – 2249-538X

# उपमादोषाणां पदादिदोषानतिरिक्तत्वनिरूपणम्

**डा. राघवेन्द्रभट्टः**
सहायकाचार्यः, साहित्यविभागः
राजीवगान्धीपरिसरः, शृङ्गेरी

काव्यप्रकाशे दशमोल्लासे उपमादोषविचारः प्रस्तुतः। प्रथमे उल्लासे तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापीति[1] काव्यलक्षणमुक्तम्। शब्दार्थशरीरं काव्यं माधुर्यादिगुणसहितम् अनुप्रासोपमाद्यलङ्कारसहितं च्युतसंस्कृतित्वादिदोषरहितमिति तदर्थः। तत्र दोषः मुख्यार्थहतिः[2]। काव्यस्य मुख्यार्थः रसः। हतिः अपकर्षः। रसापकर्षकः दोषः इति फलति। तत्र केचन पदपदांशवाक्यार्थगतत्वेन अन्ये च साक्षात् रसं दूषयन्तीति मुख्यतया दोषः पञ्चप्रकारकः प्रतिपादितः। यमकानुप्रासोपमाद्यलङ्कारगता दोषाः प्राचीनैः परिगणिताः। आचार्येण मम्मटेन एते पदादिदोषेष्वेव अन्तर्भवन्तीति न पृथक् परिगणिताः। उक्तञ्च,

**एषां दोषा यथायोगं सम्भवन्तोऽपि केचन ।**
**उक्तेष्वन्तर्भवन्तीति न पृथक्प्रतिपादिताः** ॥इति।[3]

तत्र उपमायाम् उपमानस्य जातिगतन्यूनत्वम्, उपमानस्य जातिगताधिकत्वम्, उपमानस्य प्रमाणगतन्यूनत्वम्, उपमानस्य प्रमाणगताधिकत्वम्, धर्मगतन्यूनत्वम्, धर्मगताधिकत्वम्, उपमानोपमेययोर्भिन्नलिङ्गकत्वम्, उपमानोपमेययोर्भिन्नवचनकत्वम्, कालभेदः, पुरुषभेदः, विधिभेदः,

असादृश्यम्, असम्भवञ्चेति त्रयोदश दोषाः सम्भवन्ति। ते दोषाः तेषामितरेष्वन्तर्भावाश्च क्रमेण प्रस्तूयन्ते।

**१.उपमानस्य जातिगतन्यूनत्वम्** सामान्यं जातिः । नित्यमनेकानुगतं सामान्यम्। उपमायाम् उपमेयापेक्षया उपमानस्य जातिगतन्यूनत्वे असौ दोषः। यथा

चण्डालैरिव युष्माभिः साहसं परमं कृतम् ॥[४]

युष्माभिः चण्डालैरिव परमं साहसं कृतमित्यन्वयः। उपमेयभूतयुष्मदपेक्षया उपमानस्य चण्डालस्य दुष्कर्मकारित्वादिना जातिगतन्यूनत्वम् ।

**२.उपमानस्य जातिगताधिकत्वम्** उपमायाम् उपमेयापेक्षया उपमानस्य जातिगताधिकत्वे असौ दोषः। यथा

अयं पद्मासनासीनश्चक्रवाको विराजते ।
युगादौ भगवान् वेधा विनिर्मित्सुरिव प्रजाः ॥[५]

अयं चक्रवाकः पद्मासनासीनः युगादौ प्रजाः विनिर्मित्सुः वेधा इव विराजते इत्यन्वयः। अत्र उपमेयस्य चक्रवाकस्य अपेक्षया उपमानस्य ब्रह्मणो ब्रह्मत्वजातिगताधिकत्वम्। ब्रह्मत्वजातिः ब्रह्मणः कल्पभेदमादायोक्ता ।

**३.उपमानस्य प्रमाणगतन्यूनत्वम्** उपमायाम् उपमेयापेक्षया उपमानस्य परिमाणगतन्यूनत्वे असौ दोषः। यथा

वह्निस्फुलिङ्ग इव भानुरयं चकास्ति ।[६]

अयं भानुः वह्निस्फुलिङ्ग इव चकास्तीत्यन्वयः। अत्र उपमेयस्य भानोरपेक्षया अग्निस्फुलिङ्गस्य उपमानस्य परिमाणतो न्यूनत्वम्।

 ISSN – 2249-538X

**४.उपमानस्य प्रमाणगताधिकत्वम्** उपमायाम् उपमेयापेक्षया उपमानस्य परिमाणगताधिकत्वे असौ दोषः। यथा

पातालमिव ते नाभिः स्तनौ क्षितिधरोपमौ ।
वेणीदण्डः पुनरयं कालिन्दीपातसन्निभः ॥[७]

ते नाभिः पातालमिव, स्तनौ क्षितिधरोपमौ, अयं वेणीदण्डः पुनः कालिन्दीपातसन्निभः इत्यन्वयः। अत्र उपमेयस्य नाभेरपेक्षया उपमानं पातालं परिमाणतः अधिकम्। एवमितरत्र।

**५. असादृश्यम्** उपमायां द्वयोरुपमानोपमेयत्वेनाभिमतयोः सादृश्याभावः । यथा

ग्रथ्नामि काव्यशशिनं विततार्थरश्मिम् ।[८]

विततार्थरश्मिं काव्यशशिनं ग्रथ्नामीत्यन्वयः। काव्यं शशीव, अर्थाः रश्मय इवेत्युपमितसमासः। काव्यशशिनोः अर्थरश्म्योश्च साधर्म्यं कुत्रापि न प्रसिद्धम्। अतः असादृश्यदोषः।

**६. असम्भवम्** असम्भवतः अर्थस्य उपमानत्वेनोपादाने असौ दोषः।

निपेतुरास्यादिव तस्य दीप्ताः शरा धनुर्मण्डलमध्यभाजः ।
जाज्वल्यमाना इव वारिधारा दिनार्धभाजः परिवेषिणोर्कात् ॥९

धनुर्मण्दलमध्यभाजः, आस्याद्, इव दीप्ताः शराः दिनार्घभाजः, परिवेषिणः अर्कात् जाज्वल्यमानाः वारिधारा इव निपेतुः इत्यन्वयः। अत्र अम्बुधाराणां मेघमण्डलादुपरिस्थात् सूर्यमण्डलाद् निपातः असम्भव इत्यसम्भवत्वदोषः।

**अनुचितार्थत्वदोषे अन्तर्भावः**

उपमानस्य जातिगतन्यूनत्वम्, उपमानस्य जातिगताधिकत्वम्, उपमानस्य प्रमाणगतन्यूनत्वम्, उपमानस्य प्रमाणगताधिकत्वम्, असादृश्यम्, असम्भवञ्चेत्येते षडपि दोषाः अनुचितार्थत्वदोषे अन्तर्भवन्ति। एतदुक्तं काव्यप्रकाशे 'उपमायामुपमानस्य जातिप्रमाणगतन्यूनत्वमधिकता वा तादृशी अनुचितार्थत्वं दोषः।'[१०] 'असादृश्यासंभवावप्यु-पमायामनुचितार्थतायामेव पर्यवस्यतः'[११] इति।

अनुचितार्थत्वं विवक्षितार्थतिरस्कारकधर्मव्यञ्जकार्थवत्वम्। यथा

तपस्विभिर्या सुचिरेण लभ्यते प्रयत्नतः सत्रिभिरिष्यते च या।

प्रयान्ति तामाशु गतिं यशस्विनो रणाश्वमेधे पशुतामुपागताः॥[१२]

या तपस्विभिः सुचिरेण लभ्यते या सत्रिभिः प्रयत्नतः इष्यते, तां गतिं यशस्विनः रणाश्वमेधे आशु प्रयान्तीत्यन्वयः। अत्र पशुताम् इति पदं कातरार्थाभिव्यञ्जकम्। तेन विवक्षितस्य वीरोचितमरणस्य तिरस्कारादनुचितार्थत्वम्।

प्रकृते आद्यचतुष्टये चण्डालैरिव, वह्निस्फुलिङ्ग इव इत्यत्र निन्दाप्रतीतेः, अयं पद्मासनासीनः, पातालमिव ते नाभिः इत्यत्र उपहासप्रतीतेश्च अनुचितार्थत्वम्।

अनन्तरोक्ते असादृश्यस्थले काव्यशशिनोः अर्थरश्म्योश्च साधर्म्यं कुत्रापि न प्रसिद्धम्। अतः साधर्म्यप्रयोज्यं सादृश्यं सुतरां न भवतीति तत्र उपमानिबन्धनम् अनुचितार्थत्वमेव । असम्भवस्थलेऽपि अम्बुधाराणां मेघमण्डलादुपरिस्थात् सूर्यमण्डलाद् उपनिबध्यमानः असम्भवन्निपातः अनुचितार्थः एवेति अत्र अनुचितार्थत्वदोषः।

 ISSN – 2249-538X

**७. धर्मगतन्यूनत्वम्** उपमायाम् उपमानधर्मस्य न्यूनत्वे असौ दोषः । यथा

स मुनिर्लाञ्छितो मौञ्ज्या कृष्णाजिनपटं वहन् ।
व्यराजन्नीलजीमूतभागाश्लिष्ट इवांशुमान् ॥[१३]

मौञ्ज्या लाञ्छितः कृष्णाजिनपटं वहन् सः मुनिः नारदः नीलजीमूतभागाश्लिष्टः अंशुमान् इव व्यराजतेत्यन्वयः। अत्र उपमेयमौञ्जीस्थानीयः तडित्स्वरूपः उपमानस्य अंशुमतः धर्मः न केनापि पदेन निर्दिष्ट इत्यतः अत्र धर्मगतन्यूनत्वदोषः वामनेनोक्तः।

**न्यूनपदत्वदोषे अन्तर्भावः**

वस्तुतस्तु असौ धर्मगतन्यूनत्वदोषः उक्ते न्यूनपदत्वे अन्तर्भवति । न्यूनपदत्वम् अनुपात्तविवक्षितार्थकपदवत्त्वम्। यथा

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुशितं वल्कलधरैः।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने भजति नाद्यापि कुरुषु॥[१४]

वेणीसंहारे कुरुनिग्रहे अप्रवर्तमानं युधिष्ठिरमुपलम्भमानं भीमं प्रति सहदेवस्य 'आर्य कदाचित् खिद्यते गुरुः' इत्युपालम्भनिषेधपरवाक्यानन्तरं 'गुरुः किं खेदमपि जानाति?' इत्युपक्रम्य भीमसेनस्योक्तिः। नृपसदसि पाञ्चालतनयां तथाभूतां दृष्ट्वा वने व्याधैः सार्धं वल्कलधरैः सुचिरम् उषितम्। विराटस्यावासे अनुचितारम्भनिभृतं स्थितम्। गुरुः खिन्ने मयि खेदं भजति अद्यापि कुरुषु न (खेदं भजति) इत्यन्वयः।

अत्र उषितम् स्थितम् चेत्यनन्तरं कैरित्यकाङ्क्षोदयात् 'अस्माभिः' इति पदमपेक्ष्यते। तत्पदाभावे कर्ता न लभ्यते। खिन्ने इत्यस्य पूर्वम् 'इत्थम्' इति च पदं नास्ति। तत्पदाभावे एकवाक्यत्वं न सिद्ध्यति। एवञ्च अस्माभिः इत्थम् चेति पदद्वयस्य हीनत्वादत्र न्यूनपदत्वं दोषः। प्रकृते तडित्पदं न्यूनम् इत्यतः धर्मगतन्यूनत्वस्य न्यूनपदत्वदोषे अन्तर्भावः कर्तव्यः। तदुक्तं 'अत्रोपमानस्य मौञ्जीस्थानीयस्तडिल्लक्षणो धर्मः केनापि पदेन न प्रतिपादित इति हीनपदत्वम्'[१५] इति। हीनपदत्वं न्यूनपदत्वमेव।

**८. धर्मगताधिकत्वम्** उपमायाम् उपमानधर्मस्य अधिकत्वे असौ दोषः। यथा

स पीतवासाः प्रगृहीतशार्ङ्गो मनोज्ञभीमं वपुराप कृष्णः।
शतह्रदेन्द्रायुधवान्निशायां संसृज्यमानः शशिनेव मेघः॥[१६]

पीतवासाः प्रगृहीतशार्ङ्गः सः कृष्णः मनोज्ञभीमं वपुः आप । क इव? शतह्रदेन्द्रायुधवान् निशायां शशिना संसृज्यमानः मेघः इव इत्यन्वयः। अत्र उपमेये श्रीकृष्णे शङ्खादिनिर्देशः न कृतः । किन्तु उपमाने मेघे शङ्खतुल्यस्य चन्द्रस्य ग्रहणमतिरिक्तमिति उपमानधर्मस्याधिक्याद् धर्मगताधिकत्वदोषः वामनेनोक्तः।

**अधिकपदत्वदोषे अन्तर्भावः**

वस्तुतस्तु असौ धर्मगताधिकत्वदोषः उक्ते अधिकपदत्वे अन्तर्भवति। आधिकपदत्वम् अविवक्षितार्थकपदवत्त्वम्। यथा

स्फटिकाकृतिनिर्मलः प्रकामं प्रतिसङ्क्रान्तनिशातशास्त्रतत्त्वः।
अविरुद्धसमन्वितोक्तियुक्तिः प्रतिमल्लास्तमयोदयः कोऽपि॥[१७]

स्फटिकाकृतिवन्निर्मलः रागद्वेषादिरहितः अधिगतशास्त्रः लोकशास्त्राविरुद्धसमन्वितयुक्तिमान् प्रतिवादिनां पराभवकर्ता कोऽपि महापुरुषः इति तदर्थः। अत्र स्फटिकमेव महापुरुषस्य निर्मलतायाम् उपमानम्। निर्मलतायाः स्फटिकपदप्राप्तत्वादाकृतिपदमधिकम्। एवं प्रकृतस्थलेऽपि चन्द्रपदमधिकमित्यतः अधिकपदत्वदोषादेव अस्य चारितार्थ्यम्। उक्तञ्च 'अत्रोपमेयस्य शङ्खादेरनिर्देशे शशिनो ग्रहणमतिरिच्यते इत्यधिकपदत्वम्'[१८] इति। एवं धर्मगतन्यूनत्वं धर्मगताधिकत्वञ्च क्रमेण न्यूनपदत्वे अधिकपदत्वे च अन्तर्भवतीति 'धर्माश्रये तु न्यूनाधिकत्वे यथाक्रमं हीनपदत्वमधिकपदत्वं च न व्यभिचरतः'[१९] इत्यनेन उक्तम्।

### ९. उपमानोपमेययोः भिन्नलिङ्गकत्वम्

उपमायां साधारणधर्मवाचकपदस्य भिन्नलिङ्गयोरुपमानोपमेययोरेकतरानुसारिलिङ्गत्वे भिन्नलिङ्गकत्वम् । यथा

चिन्तारत्नमिव च्युतोऽसि करतो धिङ्मन्दभाग्यस्य मे ।[२०]

मन्दभाग्यस्य मे करतः चिन्तारत्नमिव च्युतोसि इत्यन्वयः। चिन्तारत्नं चिन्तामणिः। अत्र च्युतः इति वाच्यधर्मः पुल्लिङ्गके पुरुषे उपमेये एव अन्वेति न तु नपुंसके चिन्तारत्ने उपमाने। एवञ्चात्र उपमानोपमेययोः उपमेयमात्रानुसारि लिङ्गमिति भिन्नलिङ्गकत्वदोषः प्राचीनैरुक्तः।

### १०. उपमानोपमेययोः भिन्नवचनकत्वम्

उपमायाम् साधारणधर्मवाचकपदस्य भिन्नवचनयोरुपमानोपमेययो-एरेकतरानुसारिलिङ्गत्वे भिन्नवचनकत्वम् । यथा

सक्तवो भक्षिता देव शुद्धाः कुलवधूरिव। [२१]

देव, कुलवधूरिव शुद्धाः सक्तवः भक्षिता इत्यन्वयः। अत्र बहुत्वविशिष्टः शुद्धत्वरूपः साधारणधर्मः बहुत्वविशिष्टेषु सक्तुषु एवान्वेति न तु एकत्वविशिष्टे कुलवधूरूपे उपमाने। एवञ्चात्र उपमानोपमेययोः उपमेयमात्रानुसारि वचनमिति भिन्नवचनकत्वदोषः प्राचीनैरुक्तः।

**११. कालभेदः** उपमायाम् उपमानोपमेययोः भूतभविष्यद्वर्तमानरूपकालभेदः। यथा

अतिथिं नाम काकुत्स्थात्पुत्रमाप कुमुद्वती।
पश्चिमाद्यामिनीयामात्प्रसादमिव चेतना ॥[२२]

कुमुद्वती काकुस्थात् शुकनामकराजात् अतिथिं नाम प्रसिद्धं पुत्रम् आप। कथं? चेतना बुद्धिः पश्चिमात् चरमात् यामिन्याः रात्र्याः यामात् प्रसादमुद्बोधमिव । अत्र चेतना प्रसादमाप्नोति इत्युपमाने वर्तमानकालः कुमुद्वती पुत्रमाप इत्युपमेये भूतकालश्च प्रतिपादित इति कालभेदः प्राचीनैरुक्तः।

**१२.पुरुषभेदः** उपमायाम् उपमानोपमेययोः प्रथममध्यमोत्तमरूपपुरुषभेदः। यथा

प्रत्यग्रमज्ञ्जनविशेषविविक्तमूर्तिः कौसुम्भरागरुचिरस्फुरदंशुकान्ता।
विभ्राजसे मकरकेतनमर्चयन्ती बालप्रवालविटपप्रभवा लतेव ॥[२३]

वासवदत्तां प्रति वत्सरास्योक्तिरियम्। प्रत्यग्रमज्ञ्जनविशेषविविक्तमूर्तिः, कौसुम्भरागरुचिरस्फुरदंशुकान्ता, मकरकेतनमर्चयन्ती, बालप्रवालविटप-

 ISSN – 2249-538X

प्रभवा लता इव विभ्राजसे इत्यन्वयः । हे सखि त्वं लतेव विभ्राजसे इत्युक्तम्। अत्र लता विभ्राजते त्वं विभ्राजसे इति प्रथममध्यमपुरुषभेदः प्राचीनैरुक्तः ।

**१३.विधिभेदः** उपमायाम् उपमानोपमेययोः अप्रवृत्तप्रवर्तनारूपो लिङ्लोट्तव्यप्रत्ययार्थो विधिः, तद्भेदः विधिभेदः। यथा

गङ्गेव प्रवहतु ते सदैव कीर्तिः।[२४]

हे राजन् ते कीर्तिः गङ्गा इव सदा प्रवहतु इत्यन्वयः। अत्र उपमानगङ्गायां प्रवहतीति लट् उपमेयकीर्तौ प्रवहत्विति लोट् अभिप्रेतः। न तु कीर्ताविव गङ्गायामपि प्रवहतु इति अप्रवृत्तप्रवर्तनारूपः विधिः इत्यतः विधिभेदः प्राचीनैरुक्तः ।

**भग्नप्रक्रमत्वत्वदोषे अन्तर्भावः**

वस्तुतस्तु भिन्नलिङ्गकत्वभिन्नवचनकत्वदोषौ कालपुरुषविधिभेदश्च भग्नप्रक्रमत्वे अन्तर्भवति। भग्नप्रक्रमत्वं भग्नः प्रक्रमः प्रस्तावः यस्मिन् तद्वाक्यं भग्नप्रक्रमम्, तस्य भावः। यथा

उदेति सविता ताम्रः रक्त एवास्तमेति च।[२५]

सविता तम्र एव उदेति रक्त एवास्तमेति इत्यन्वयः। अत्र रक्त एवास्तमेति इति पदान्तरप्रतिपादितः ताम्र एवार्थः अर्थान्तरं प्रतिपादयतीति भासते इत्यतः अत्र भग्नप्रक्रमत्वदोषः। प्रकृते लिङ्गभेदस्थले उपमेये च्युतः इति वाच्यो धर्मः, चिन्तारत्ने च्युतमिति उपमाने लिङ्गविपरिणामेन प्रतीयमानो धर्मः। वचनभेदस्थले बहुत्वविशिष्टेषु उपमेयसक्तुषु बहुत्वविशिष्टः शुद्धत्वरूपः वाच्यः साधारणधर्मः, कुलवधूरूपे उपमाने एकत्वविशिष्टः प्रतीयमानः सः

साधारणधर्मः । एवं वाच्यधर्मविशिष्टप्रतीयमानधर्मविशिष्टयोः उपमेयोपमानत्वप्रतीतिः भग्नप्रक्रमत्वमेव। उक्तं 'लिङ्गवचनभेदोऽपि उपमानोपमेययोः साधारणं चेद्धर्ममन्यरूपं कुर्यात् । तदा एकतरस्यैव तद्धर्मसमन्वयावगतेः सविशेषणस्यैव तस्योपमानत्वमुपमेयत्वं वा प्रतीयमानेन धर्मेण प्रतीयते इति प्रक्रान्तस्यार्थस्य स्फुटमनिर्वाहादस्य भग्नप्रक्रमरूपत्वम्'[२६] इति।

कालभेदस्थले उपमानसम्बन्धी कालः उपमेये नान्वेति इति भग्नप्रक्रमत्वम्। पुरुषभेदस्थले उपमाने अन्वितः पुरुषः उपमेये नान्वेतीति भग्नप्रक्रमत्वम्। विधिभेदस्थले आशीर्विहितलोट्प्रत्ययस्य अन्वयः उपमेयकीर्तौ भवति, उपमानगङ्गायां न भवतीति भग्नप्रक्रमत्वम्। उक्तम् 'कालपुरुषविध्यादिभेदेऽपि न तथा प्रतीतिरस्खलितरूपतया विश्रान्तिमासादयतीत्यसावपि भग्नप्रक्रमतयैव व्याप्तः'[२७] इति।

इत्थम् उपमादोषाः दोषप्रकरणे उक्तेषु अनुचितार्थत्वादिशु अन्तर्भवन्तीति काव्यप्रकाशग्रन्थानुसारं निरूपितम्।

सन्दर्भः

१. काव्यप्रकाशः १.१

२. काव्यप्रकाशः ७.७१

३. काव्यप्रकाशः १०.२१२

४. काव्यालङ्कारसूत्रवृत्तिः ४.२.९

५. सरस्वतीण्ठाभरणम् १.५१

६. काव्यालङ्कारसूत्रवृत्तिः ४.२

७. काव्यालङ्कारसूत्रवृत्तिः ४.२.११

८. काव्यप्रकाशः १०. उदाहृतपद्यवृत्तिः ५९४

९. काव्यालङ्कारसूत्रवृत्तिः २,४.१६

१०. काव्यप्रकाशः १०.२१२ वृत्तिः

११. काव्यप्रकाशः १०.
उदाहृतपद्यवृत्तिः ५९७

 ISSN – 2249-538X

१२. काव्यप्रकाशः ७.७२.६

१३. काव्यालङ्कारसूत्रवृत्तिः ४.२.९

१४. वेणीसंहारम् १.११

१५. काव्यप्रकाशः

१०.उदाहृतपद्यवृत्तिः ५८८

१६. काव्यालङ्कारः २.५८

१७. काव्यप्रकाशः ७.७५.२२१

१८. काव्यप्रकाशः

१०.उदाहृतपद्यवृत्तिः ५८९

१९. काव्यप्रकाशः १०.२१२वृत्तिः

२०. रुद्रटकाव्यालङ्कारः ११.२०

२१. काव्यपरीक्षा ३३४

२२. रघुवंशम् १७.१

२३. रत्नावली १.२०

२४. काव्यपरीक्षा ३३९

२५. काव्यप्रकाशः ७.७५

२६. काव्यप्रकाशः १०.

उदाहृतपद्यवृत्तिः ५९०

२७. काव्यप्रकाशः १०.

उदाहृतपद्यवृत्तिः ५९४

***************

# अदोषावित्यत्र नञर्थः कः ?

**डा. चन्द्रकला आर्. कोण्डी**

सहायकाध्यापिका, साहित्यविभागः

राजीवगान्धीपरिसरः, शृङ्गेरी

निर्दुष्टं काव्यं कस्य वा मनो न हरति ? काव्यं तदैव मनोहारि भवति यदा रसविघातकदोषेभ्यो विरहितं भवति । तादृशमेव काव्यमुद्दिश्य मम्मटाचार्यैः काव्ये शब्दार्थौ अदोषौ भवेताम् इत्युक्तम् । तर्हि कीदृशमदोषत्वमपेक्षितमिति सन्देह उदेति । अतः मतान्तरपर्यालोचनपूर्वकम् अदोषत्वस्य स्वरूपं ज्ञेयम् । तदर्थं अदोषावित्यत्र वर्तमानस्य नञः कोऽर्थ इति ज्ञातव्यम् ।

नञः षडर्था एवं निरूपिताः सन्ति-

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥

न केवलं मम्मटाचार्यैः किन्तु अन्यैरपि काव्यलक्षणविधायिभिः काव्यलक्षणे शब्दार्थयोरदोषत्वं प्रकारान्तरेणोक्तमेव। विद्यानाथेन- 'गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ' इति । धर्मसूरिणा 'सगुणालङ्कृती काव्यं पदार्थौ दोषवर्जितौ' ।

 ISSN – 2249-538X

तर्हि कीदृशमदोषत्वमपेक्षितमिति सन्देह उदेति । अतः मतान्तरपर्यालोचनपूर्वकम् अदोषत्वस्य स्वरूपं ज्ञेयम् । तदर्थं अदोषावित्यत्र वर्तमानस्य नञः कोऽर्थ इति ज्ञातव्यम् ।

नञः षडर्था एवं निरूपिताः सन्ति-

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥

एतेषु दोषसादृश्यम्, दोषान्यत्वम्, दोषादप्राशस्त्यम्, दोषविरोधः- एतेऽर्थाः न भवन्त्येव काव्यलक्षणोक्तस्यादोषस्य । अल्पार्थः, अभावार्थश्च तत्र अङ्गीकृतौ, तत्रापि अल्पार्थः अन्ततो गत्वा निरस्तो भवति । यतः अल्पार्थे स्वीकृते अल्पदोषसहितौ शब्दार्थौ काव्यमिति वक्तव्यतया काव्ये दोषाणामपि गुणानामिव नियता स्थितिः स्यात् । लोकेऽस्मिन् शतांशेन दोषराहित्यं कस्यापि नास्त्येव । कविरपि मानुषधर्मवान् कैश्चिद्दोषैः युक्त एव भवेत्, तेन सर्वथा अभाव इत्यर्थः अङ्गीकर्तुं न शक्य इति भाति ।

अत्र नञः अल्पार्थकत्वं केचन वदन्ति । परन्तु अल्पार्थकत्वे स्वीकृते रसविघातकत्वाभावः न सिद्ध्यति । यतो हि अल्पोऽपि दोषः तस्यास्वादं प्रतिबध्नाति । अत एवोक्तम्-

तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन ।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम् ॥

इति । अपि च यथा अन्यकाव्यतत्त्वानि रससम्बन्धेनैव तत्त्वं प्राप्नुवन्ति, अर्थात् रसधर्मत्वेन गुणाः गुणत्वं, रसपोषकत्वद्वारा काव्यसौन्दर्यवर्धनेन अलङ्काराः अलङ्कारत्वं प्राप्नुवन्ति तथैव रसविघातकत्वेनैव दोषाणां दोषत्वं,

नान्यथा । अतः रसविघातकत्वमेव दोषसामान्यलक्षणम् । तन्मास्तु काव्ये इत्येव अदोषावित्यत्र नञोऽर्थः, अर्थादभावार्थ एव, न तु अल्पार्थः । दोषे सत्यपि तस्य अकिञ्चित्करत्वे तस्य अभाव एव वक्तुमुचितः । तथा अभावार्थे स्वीकृते दोषविशेषाभावो वा दोषसामान्याभावो वा इति सन्देह उदेति । तत्र निश्चितमेव उत्तरं यत् दोषसामान्याभाव इत्येव इति । यतः दोषविशेषाभावे तत्सामान्याभावः स्वयं सिद्ध्यति, किन्तु दोषविशेषसत्त्वेऽपि दोषसामान्याभावः सिद्ध्यतीत्येतदेव तत्र हेतुः । उदाहरणार्थं-

न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः ।
धिग्धिक्छक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः ॥

अत्र हि श्लोके भूयसा सर्वेषामप्येषां स्फुटमेव व्यञ्जकत्वं दृश्यते । तत्र 'मे यदरयः' इत्यनेन सुप्-सम्बन्ध-वचनानामभिव्यञ्जकत्वम् । 'तत्राप्यसौ तापस' इत्यत्र तद्धित-निपातयोः इत्यादिरीत्या व्यञ्जकभूयस्त्वे घटमाने काव्यस्य सर्वातिशायिनी बन्धच्छाया समुन्मीलति इति आनन्दवर्धनाचार्येण अस्य पद्यस्य उत्तमकाव्यत्वं प्रदर्शितम् । मया अस्मिन् सन्दर्भे पद्यमिदं तदर्थमुदाहृतं यत् दोषविशेषसत्त्वेऽपि दोषसामान्याभावः सिद्धतीत्येतस्य समर्थनाय । पद्यमिदम् आरम्भे अन्ते च दोषयुक्तं वर्तते । अविमृष्टविधेयांशदोषः उभयत्रापि । एष दोषः उद्देश्यवचनादपि पूर्वं विधेयवचनेन, विधेयस्य समासगतत्वेन अप्राधान्यप्राप्त्या चेति रीत्या द्विधा सम्भवति । अस्मिन् पद्ये उभयथापि अयं दोषः वर्तते । 'न्यक्कारो ह्ययमेव' इत्यत्र 'अय'मिति उद्देश्यवचनादपि पूर्वं 'न्यक्कार'

इति विधेयवचनमुक्तमिति स दोषः। 'स्वर्ग-ग्रामटिकाविलुण्ठनवृथोच्छूनैः' इत्यत्र 'वृथा' इति विधेयपदं समासगतत्वात् अप्रधानतां गतमिति द्वितीयप्रकारः स दोषः । किन्तु व्यञ्जकव्यङ्ग्यादीनां प्रवाहे स दोषोऽन्तरित इति तस्य अकिञ्चित्करत्वात् तस्य रसविघातकत्वाभावः, तेन दोषसामान्याभाव एवाङ्गीकरणीयः। एतादृशमदोषत्वमेव मम्मटाचार्यादिभिः अदोषपदेन विवक्षितम् । एतद्रहस्यमजानता विश्वनाथेन अत्र दोषे सत्यपि काव्यत्वमस्ति इति दोषविशेषाभावाभावमादाय काव्यलक्षणस्थमदोषपदमेव दूषितम् । [1]

पण्डितराजजगन्नाथस्य तु अभिप्रायः कथमङ्गीकरणीय इति चिन्तनीयम् । यतः अदोषशब्दे लक्षणे निवेशिते सति 'दुष्टकाव्यम्' इति व्यवहारः न सङ्गच्छते इति सोऽभिप्रैति । दुष्टत्वं काव्यत्वञ्च सहैव भवतः किमित्यत्र विमर्शका एव प्रमाणम् ।

महाकवीनां काव्येष्वपि दोषविशेषाः भवन्ति । कविरत्नमिति संज्ञितः कालिदासोऽपि नैतस्यापवादः । विश्वप्रसिद्धेऽभिज्ञानशाकुन्तले मङ्गलश्लोक एव 'श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्' इत्यत्र क्लिष्टदोषः किञ्चित् स्पृष्ट इव, न तु बलवान् ।

कुमारसम्भवे पञ्चमसर्गे ब्रह्मचारिवेषेणागतः परमेश्वरः पार्वतीं परीक्षते-

वपुर्विरूपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद्बालमृगाक्षि मग्यते तदस्ति किं व्यस्तमपि त्रिलोचने ॥

[1] साहित्यदर्पणम्-प्रथमपरिच्छेदः

इति। अस्मिन् श्लोके 'अलक्ष्यजन्मता' इत्यत्र अविमृष्टविधेयांशदोषः दर्शितः मम्मटाचार्यैः। तस्य पदस्य स्थाने अलक्षिता जनिरिति पाठः युक्त इति तैरेव तत्समीकृतम्। काव्यप्रकाशस्य सारबोधिनीटीकाकारोऽपि तदेवं समर्थितवान्-'वस्तुतस्तु त्रिलोचने जन्मनोऽप्यसिद्धतया विशिष्टस्य अलक्षितजन्मनो विधेयतया अलक्षितेत्यस्य विशेषणस्य पूर्वोपादानमुचितमिति रचितः पाठः समीचीनः' इति।

काव्यलक्षणे मम्मटाचार्यैः नञ् उभयथा प्रयुक्तः। अदोषावित्यत्र, अनलङ्कृती इत्यत्र च। किन्तु वृत्तौ अनलङ्कृतशब्दार्थयोस्स्पष्टीकरणं दत्तम्, 'यत् सर्वत्र सालङ्कारौ क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानि'रिति। किन्तु अदुष्टशब्दार्थयोः तादृशं स्पष्टीकरणं नास्ति-'दोषः ईषदस्ति चेदपि काव्यं भवती'ति। यतः अलङ्काराणामीषत्त्वं रसपोषकमेव भवति। यः कौमारहरः इत्यादौ पद्ये, 'अत्र रसस्य हि प्राधान्यात् नालङ्कारता' इति तद्दर्शितम्।

अत एव इदं ध्यातव्यमस्माभिः यत्,

दोषः सर्वात्मना त्याज्यो रसहानिकरो हि सः।
अन्यो गुणोऽस्तु वा मास्तु महान् निर्दोषता गुणः॥

अतः अदोषावित्यत्र नञ् अभावपर एव। इति शम्।

***************

 ISSN – 2249-538X

# करुणादिरसस्थायिनः शोकादेः सुखजनकता

**डा. कोम्पेल्लि विनयकुमारः**
संविदाध्यापकः, साहित्यविभागः
राजीवगान्धीपरिसरः, शृङ्गेरी

काव्यनाटकादिषु रसानाम् आनन्दमयत्वमेव स्वीक्रियते, परन्तु तेषु करुण-बीभत्स-भयानकादीनां रसानां दुःखप्रधानत्वात् रसत्वं (तत्परत्वम्, आनन्दमयत्वम्) न स्यादिति प्रश्नः स्वभावादेव उदेति। अयं च प्रश्नः काव्यशास्त्रस्य मौलिकः महत्त्वशाली च । अतः विश्वनाथाचार्येण उच्यते यत् -

**करुणादावपि रसे जायते यत्परं सुखम्।**

**सचेतसामनुभवः प्रमाणं तत्र केवलम्**[1]।।इति।।

करुणबीभत्सभयानकादौ अश्रुपातभयघृणादिदर्शनेन दुःखमयत्वनिश्चये रसेऽपि यत् अत्यन्तं सुखं जायते, तस्मिन् जायमाने सुखे (उपचारात् तत्सत्तायामपि) सहृदयानाम् अनुभव एव केवलं प्रमाणम्। अर्थात् रसादीनामेव शोकदुःखे तज्ज्ञातृणां सामाजिकानां तु सुखमेव जायते इत्यत्र सहृदयानाम् अनुभव एव प्रमाणम् इति। तथापि करुणादिरसानामपि सुखमयत्वे सिद्धेऽपि अज्ञातकाव्यसुखानाम् असहृदयानां मुखव्यापारसङ्कोचनाय अपरः पक्षः उच्यते –

**किञ्च तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः**[2]।

यदि करुणादिरसेषु दुःखं स्यात्, तर्हि कोऽपि करुणादिरसास्वादनोत्कण्ठितः न स्यात् इति। यतः करुणादिरसानां

दुःखमयत्वमेव तर्हि यः कोऽपि सहृदयः स्वस्य दुःखाय (कष्टाय) न प्रवर्तते। करुणादिरसेषु सर्वस्यापि जनस्य ( अर्थात् सहृदयस्य असहृदयस्य च) साभिनिवेशप्रवृत्तिदर्शनात् तेषां सुखमयत्वमेव इति। अन्या उपपत्तिरपि -

**तथा रामायणादीनां भविता दुःखहेतुता**[3]**।।** इति।।

शोकस्थायिभावकरुणाख्यरसस्य दुःखकारणत्वे करुणरसमुख्य-रामायणादिकाव्यानां दुःखकारणताप्रसङ्गः स्यात् इति । यथाह – आनन्दवर्धनाचार्योऽपि रामायणे हि करुणो रसः स्वयमादि-कविना सूत्रितः शोकः श्लोकत्वमागतः इत्येवंवादिना, निर्व्यूढश्च स एव सीतात्यन्तवियोगपर्यन्तमेव स्वप्रबन्धमुपरचयता इति।

यदि करुणरसस्य दुःखमयत्वं स्यात् तदा तदङ्गिरामायणादिकाव्यानि प्रति जनानां प्रवृत्तिः न स्यात्, अपि तु भवत्येव सर्वाधिक्येन इति करुणरसस्यापि सुखमयत्वमेव इति भावः। पण्डितराजः जगन्नाथोऽपि रसगङ्गाधरे करुणादिरसस्थायिनः शोकादेरपि सुखजनकता एव, न तु दुःखजनकता इति प्रतिपादयति। तत्र शोकादीनां सुखजनकत्वाभावः पूर्वपक्षत्वेन एवमुपन्यस्तः –

**शोकादेः दुःखजनकत्ववादिनः**- एते अभिप्रयन्ति यत् – रसः यद्यपि स्वतः सुखरूपो न, तथापि अनिर्वचनीयरत्यादि-स्थायिभावस्वरूपस्य रसस्य प्रतीतेरनन्तरं यद्विलक्षणं सुखमुत्पद्यते, तस्मात् सुखात् रत्यादिरूपरसस्य भेदो न ज्ञायते, अतः रसः सुखरूपः कथ्यते इत्यादिविवेचनद्वारा अनिर्वचनीयस्थायिभावात्मकरसप्रतीत्यनन्तरं या विलक्षणसुखोत्पत्तिः स्वीकृता, सा सर्वांशेन समीचीना इति वक्तुं न शक्यते।

 ISSN – 2249-538X

यतः वास्तविकी शकुन्तलारतिः वास्तविके दुष्यन्ते सुखं जनयति इति, कल्पितशकुन्तलाविषयकरतिः कल्पितदुष्यन्तरूपसहृदयेऽपि सुखं जनयितुं शक्नोति। यतः रतिः इति स्थायिभावः स्वभावत एव मधुरः, सर्वप्राणिसमानश्चेति सहृदयानां कृतेऽपि ते काव्यार्थभावनया परिपक्वरत्यादयः सुखरूपा इति वक्तुं न कोऽपि बाधः। किन्तु वास्तविकशोक-भय-क्रोधादयस्तु लोके दुःखजनकतया एव प्रसिद्धाः। ते यत्र कल्पिताः सन्तः रसत्वं प्राप्नुवन्ति, तत्र सहृदयेषु कथं सुखमुत्पद्येत ? नैव उत्पद्यते। तर्हि रसस्य सुखरूपत्वं कथम् ? किन्तु एतद्विपरीततया वास्तविकनायके यथा दुःखमुत्पन्नमासीत् तथैव सहृदयेऽपि दुःखमेव उत्पद्येत इत्येव वक्तव्यम्।

**सुखजनकत्ववादिनः –**

वास्तविकदुःखादिभिः दुःखमुत्पद्यते, न तु कल्पितदुःखादिभिः। अतः वास्तविकनायकादिषु (रामादिषु) येषु दुःखं सत्यमासीत् तेषु दुःखमेव भवेत्, किन्तु कल्पितशोकाद्यनुभववति सहृदये दुःखं नोत्पद्यते।

**दुःखजनकत्ववादिनः –**

तन्न समीचीनम्। कल्पितसर्परूपरज्ज्वा भीतिः जायत एव खलु ? भवन्मतानुसारं तन्न भवेत्, किन्तु भवत्येवेति लोकानुभवः। अपि च यदि भवद्भिः कल्पितशोकादिभिः दुःखोत्पत्तिः नाङ्गीक्रियते, तर्हि सहृदयेषु कल्पितरत्या सुखोत्पत्तिरपि अङ्गीकर्तुं न शक्यते। किन्तु शृङ्गाररसस्थले तदङ्गीकृतमस्ति।

**सुखजनकत्ववादिनः –**

शृङ्गारप्रधानशाकुन्तलाद्यभिनयदर्शनात् रसास्वादसमये सहृदयानां यथा लेशतोऽपि दुःखानुभवो न जायते, तथैव करुणरसप्रधान-उत्तररामचरिताद्यभिनयदर्शनादपि रसास्वादावसरे दुःखानुभवो न जायत इत्येव यदि सहृदयहृदयप्रमाणसिद्धं भवति, तर्हि कार्यानुरोधेन कारणानि कल्प्यन्त इति सिद्धान्तानुसारं लोकोत्तरव्यापारस्य (विलक्षणभावना-रूपदोषस्य) आह्लादप्रयोजकत्वं यथा अङ्गीकृतं तथैव दुःखप्रतिबन्धकत्वमपि अङ्गीकरणीयम्। तेन शाकुन्तलादिषु आह्लादप्रयोजकत्वम्, उत्तर-रामचरितादिषु दुःखप्रतिबन्धकत्वमिति वक्तुं शक्यते।

यदि आह्लाद इव दुःखमपि प्रमाणसिद्धम्, अर्थात् शाकुन्तलादिषु सुखानुभवः, उत्तररामचरितादिषु सुखेन सह दुःखमपि अनुभूयत इति सहृदयहृदयानुभवः तर्हि विलक्षणभावनायाः दुःखप्रतिबन्धकत्वं न कल्पनीयम्। यतः तत्र सुखस्य कारणात् सुखोत्पत्तिः, दुःखस्य कारणात् दुःखोत्पत्तिरिति कारणभेदादेकत्र विरुद्धयोः सुखदुःखयोरुत्पत्तौ न कोऽपि बाधः।

**दुःखजनकत्ववादिनः –**

सर्वथा तत्र यतनीयमिति मम्मटाचार्यैः काव्ये कवीनां सहृदयानां च प्रवृत्तिरवश्यं भवेदित्युक्तम्। शृङ्गाररसप्रधानकाव्येषु तद्भवति सुखरूपत्वात् तस्य। किन्तु यदि करुणादिरसप्रधानकाव्येभ्यः सुखमिव दुःखमपि जायते तर्हि तत्र काव्यं कर्तुं कवीनां श्रोतुं च सहृदयानां प्रवृत्तिः कथं भवेत् ? यतः इष्टसाधनताज्ञानं प्रवृत्तिं प्रति कारणम्। इदं काव्यं मदिष्टसाधनम्

 ISSN – 2249-538X

इत्याकारकम् इष्टसाधनताज्ञानं तत्र नास्ति, प्रत्युत दुःखरूपानिष्टसाधनत्वग्रहस्यैव सद्भावः, तत्र अनिष्टसाधनमिदमिति भावयता कविना सहृदयेन च अवश्यं काव्यवैमुख्यमेव सञ्जायते।

**सुखजनकत्ववादिनः -**

सम्भणन्ति यत् - "इष्टस्य आधिक्यात् अनिष्टस्य च न्यूनत्वात् चन्दनद्रवलेपनादाविव प्रवृत्तेरुपपत्तेः" इति । अर्थात् लोकेऽस्मिन् सर्वमपि आधिक्येन वा अल्पतया वा दुःखग्रस्तमेव। किन्तु यत्र दुःखस्य अल्पत्वं सुखस्य आधिक्यिं तत्र प्रवृत्तिः, दुःखस्य आधिक्ये सुखस्य अल्पत्वे तु निवृत्तिः लोके सर्वत्रापि दृश्यत एव। चन्दनेन लभ्यमानस्य सौरभशीतलादि-सुखाधिक्यस्य आकाङ्क्ष्या तस्य घर्षणश्रमजन्यमल्पं दुःखं सहन्ते, चन्दनलेपने प्रवृत्तिं च विन्दन्ति, न तु घर्षणश्रमजन्यमल्पं दुःखं दूरीकर्तुं सौरभ्यादि-महत्सुखदायकात् चन्दनलेपनात् निवर्तन्ते। तथैव शोकादिप्राधान्यकाव्येऽपि आनन्दांश एव अधिकः, दुःखांशस्तु अत्यल्प एव। अतः जनानां प्रवृत्तिर्जायत एव। ये केवलमाह्लादमेव अङ्गीकुर्वन्ति तेषां मते तु प्रवृत्तिः निर्बाधा इति।

**दुःखजनकत्ववादिनः –**

तत्र प्रथममते दुःखं नाङ्गीकृतं खलु ! तर्हि तत्र दुःखस्य कार्याणि अश्रुपातादीनि कथं भवन्ति ?

**सुखजनकत्ववादिनः –**

अश्रुपातादयः केवलं दुःखादेव जायन्ते इति नास्ति नियमः। उच्यते च यथा -

**अश्रुपातादयस्तद्वद्द्रुतत्वाच्चेतसो मताः**[4]।।

इत्युक्तरीत्या आनन्दादपि जायन्त एवेति लोकानुभवः। भगवद्भक्ताः भगवद्वर्णनश्रवणादि-जन्यसुखात् अश्रूणि पातयन्ति। न तत्र दुःखस्य लेशोऽपि वर्तते।

**दुःखजनकत्ववादिनः –**

"न च करुणरसादौ स्वात्मनि शोकादिमद्दशरथादितादात्म्यारोपे यद्याह्लादः, तदा स्वप्नादौ सन्निपातादौ वा स्वात्मनि तदारोपेऽपि स स्यात्, आनुभविकं च तत्र केवलं दुःखमिति इहापि तदेव युक्तमिति वाच्यम्"।अर्थात् यदि करुणरसादौ स्वात्मनि (सहृदये) दशरथाद्यारोपेण सुखं जायत इत्युच्यते, तर्हि सन्निपातादिरोगावस्थायामपि तादृशारोपात् सुखमेव स्यात्। किन्तु तदा दुःखमेव जायते इति तु अनुभवसिद्धम् अतः करुणादिरसादावपि दुःखमेव अङ्गीकरणीयम्।

**सुखजनकत्ववादिनः –**

न तथा। सन्निपादिरोगावस्थायां क्रियमाणे आरोपे आनन्ददायकस्य लोकोत्तरव्यापारस्य न किमपि पात्रं भवतीति तत्र दुःखमेव। किन्तु काव्ये तादृशारोपे अलौकिकः व्यापार आनन्दं जनयतीति द्वयोरपि भिन्नैव स्थितिः। अयं हि लोकोत्तरकाव्यव्यापारस्य व्यञ्जनाख्यस्य महिमा। शोकादयः पदार्था अरमणीया अपि व्यञ्जनाप्रयोज्या आह्लादमलोकिकं जनयन्ति। यद्यपि काव्यमलौकिकं तथापि –

 ISSN – 2249-538X

**देवानामिदमामनन्ति मुनयः शान्तं क्रतुं चाक्षुषं**
**रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा।**
**त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते**
**नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्**[5]॥

इति महाकविकालिदासोक्त्यनुसारम् (अत्र श्लोके तृतीयपादे) लोकवृत्तान्त एवात्र नानारसयुक्तो भवति। अतः काव्यविषयविमर्शे लोकवृत्तान्तोऽपि आधारत्वेन परिगणनीय एव। अस्मिन्विषयेऽपि तथैव। यतो हि सुखदुःखात्मकत्वं लोके सामान्यम्, लोके यथा धर्मपराः दुःखमपि सुखत्वेन परिगणयन्ति। भगवन्निष्ठमानसानां तेषां मनसि दुःखमपि भगवदनुग्रह एवेति धिया यथा दुःखं नानुभूयते, किञ्चिद्दुःखमपि भगवन्मुखत्वात् महत्सुखे विलीनं भवति, तथैव काव्येऽपि भावनामहिम्ना अलौकिकव्यापारसहकारेण करुणादिविषयेष्वपि आनन्दानुभव एव जायते।

केचन सामान्यजनाः किञ्चिद्दुःखमपि महदिव परिगणयन्ति, तेन सहैव वर्तमानं सुखं न पश्यन्ति। किन्तु अन्ते सुखमनुभवन्ति। तेषां कृते काव्ये भावनायाः प्राबल्येनापि न सम्पूर्णतया सुखमेव लभ्यते। किन्तु दुःखवैचित्र्यानुविद्धरसास्वाद एव।

अत एव भोजराजेन - **रसाः सुखदुःखावस्थारूपाः**[6], **मनोऽनुकूलेषु दुःखादिष्वपि सुखानुभवाभिमानो रसः**[7] इति करुणादौ पृथक् पृथक् अनुभवो निरूपितः। विश्वनाथोऽपि -

**किञ्च तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः।**
**तथा रामायणादीनां भविता दुःखहेतुता**[8]॥इति॥

अपि च –

**हेतुत्वं शोकहर्षादेर्गतेभ्यो लोकसंश्रयात्।**

**शोकहर्षादयो लोके जायन्तां नाम लौकिकाः।।**

**अलौकिकविभावत्वं प्राप्तेभ्यः काव्यसंश्रयात्**

**सुखं सञ्जायते तेभ्यः सर्वेभ्योऽपीति का क्षतिः[१]।।**

इति आह्लादवादिनामुक्तिमपि स्पष्टीकृतवान्। यथा दन्तक्षतादयो दुःखकारणान्यपि सुरतसमये सुरतानन्दजन्यपरिशोधेन तेभ्यः सुखातिशय एव तथैव लोके शोकहर्षादयः। लौकिके व्यवहारे शोकहर्षादिरेव जायते किन्तु काव्याश्रयतः लोकोत्तरचमत्कारचमत्कृतेभ्यः विभावादिभ्यः सर्वेभ्य एव सुखमेव जायत इति। एतदाधारेणैव करुणादावपि सुखानुभवं निरूपितवान्। एतत्तु लोकोत्तरकाव्यव्यापारस्यैव महिमा, येन अरमणीयाः शोकादयोऽपि पदार्थाः परिष्कृता भूत्वा अलौकिकानन्दं ददति। अत एव अलौकिकानन्ददायकं लोकोत्तरवर्णनानिपुणकविकर्म किञ्चिद्विलक्षणमेव।

करुणरसः उदाह्रियते –

करुणरसस्य स्थायिभावः शोकः। तल्लक्षणं तु - **पुत्रादिवियोग-मरणादिजन्मा वैक्लव्याख्यश्चित्त-वृत्तिविशेषः शोकः** इति।

बन्धुजननाशादीनि अस्य आलम्बनानि, तत्सम्बद्धगृहवस्त्वित्यादीनां दर्शनम्, अन्यैरुक्तानां तत्सम्बद्धविषयाणां श्रवणमित्यादीनि उद्दीपनानि, भूमौ देहस्य पातनम्, अश्रुपात इत्यादयः अनुभावाः, ग्लानि-क्षय-मोह-विषाद-चिन्ता-औत्सुक्य-दीनता-जडतादयः व्यभिचारिणः। यथा -

**अपहाय सकलबान्धवचिन्तामुद्वस्य गुरुकुलप्रणयम्।**

 ISSN – 2249-538X

**हा तनय ! विनयशालिन् ! कथमिव परलोकपथिकोऽभूः।।** इति ।।

हे पुत्र ! सर्वानपि बन्धुजनान् त्यक्त्वा, गुरुकुलस्य चिन्तामपि त्यक्त्वा कथं परलोकं प्रति गतवानसि? अत्र श्लोके मृतपुत्रः आलम्बनम्, तत्समये बान्धवानां दर्शनम् उद्दीपनम्, रोदनमनुभावः, दैन्यचिन्तादयः व्यभिचारिणः।

बीभत्सरसः उदाह्रियते –

बीभत्सरसस्य स्थायिभावः जुगुप्सा। तल्लक्षणं तु **कदर्यवस्तुविलोकनजन्मा विचिकित्सा-ख्यश्चित्तवृत्तिविशेषो जुगुप्सा** इति। कुत्सितवस्तूनां दर्शनेन मनसि जायमाना विचिकित्सा(घृणा) इति नाम चित्तवृत्तिः जुगुप्सा इति। यथा - श्मशानं वर्ण्यतेऽत्र –

**नखैर्विदारितान्त्राणां, शवानां पूयशोणितम्।**

**आननेष्वनुलिम्पन्ति हृष्टा वेतालयोषितः।।**इति।।

अत्र श्लोके विपुलभक्ष्यलाभात् प्रसन्नाः (वेतालयेषितः) भूतविशेषस्त्रियः नखैः विदारितान्त्राणां शवानां पूयशोणितम् (पीतावशेषम्) स्वमुखेषु अनुलिम्पन्ति इति।

अत्र शवाः आलम्बनम्, अन्त्रविदारणादि उद्दीपनम्, आक्षिप्ताः रोमाञ्चनेत्रनिमीलनादयोऽनुभावाः, आवेगादयः सञ्चारिणः इति।

भयानकरसः उदाह्रियते –

अस्य स्थायिभावः भयम् – तल्लक्षणं तु - **व्याघ्रदर्शनादिजन्मा परमानर्थविषयको वैक्लव्याख्यः स भयम्** । व्याघ्रादीनां सद्यो मरणकारणादीनां दर्शनेन जायमाना मरणाद्यनर्थसम्पादकश्चित्तवृत्तिः भयम् इति। यथा - श्येनाद्भीतस्य लावकस्य वृत्तं वर्णितमत्र -

**श्यनमम्बरतलादुपागतं शुष्यदाननविलो विलोकयन्।**

**कम्पमानतनुराकुलोक्षणः स्पन्दितुं न हि शशाक लावकः।।**इति।।

आकाशमण्डलात् सन्निकृष्टं श्येनं पश्यन् मृत्युभययुक्तः कम्पमानशरीराकुलेक्षणः लावकनामकः वर्तकजातीयः पक्षिविशेषः ईषत् चलितुमपि न शशाक इत्यर्थः। अत्र श्येनः आलम्बनम्, सवेगापतनम् उद्दीपनम्, आननशोषादयः अनुभावाः, दैन्यादयः सञ्चारिणः।

इत्थं करुणबीभत्सभयानकादौ अश्रुपातभयघृणादिदर्शनेन दुःखमयत्वनिश्चये रसेऽपि यत् अत्यन्तं सुखमेव जायते, तस्मिन् जायमाने सुखे सहृदयानाम् अनुभव एव केवलं प्रमाणमिति विश्वनाथाचार्येणोक्तम्-

**करुणादावपि रसे जायते यत्परं सुखम्।**

**सचेतसामनुभवः प्रमाणं तत्र केवलम्**[10]।।इति।।

अपि च -

**लौकिकत्वे तु शोकादेर्जायतां दुःखहेतुता।**

**अलौकिकत्वे तस्यापि स्यादेव सुखहेतुता।।**

**भावकत्वप्रभावाद्वा योगात्साधारणीकृतेः।**

**आत्मनो रसभावाद्वा प्रमातुः सर्वथा सुखम्।।**इति।।

रसमहत्त्वविषये सूक्तिरियं विद्वत्समाजे प्रसिद्ध्यति यत् -

**कविता कोमलवनिता रसयति रसिकं रसेन मिलिता।**

**सा यदि दुर्जनहस्ते पतिता प्रतिपदभग्ना संशयमग्ना।।**इति।।

**पादटिप्पण्यः –**

1. सा.द.3.प-4-का.
2. सा.द.3.प –5-का.
3. सा.द.3.प –5-का.
4. सा.द.3.प-8का.
5. मा.मि.1-4
6. शृ.प्र.पृ-437
7. शृ.प्र.पृ-437
8. सा.द.3.प-5का.
9. सा.द.3.प.-9,10का.
10. सा.द.3.प-4-का.

**आधारग्रन्थाः –**


1. साहित्यदर्पणः
2. रसगङ्गाधरः
3. शृङ्गारप्रकाशः
4. मालविकाग्निमित्रम्
5. रसगङ्गाधरनिबन्धनिचयः


****************

# जननसमयनिर्णयस्यावश्यकता अस्ति वा ?

**ता. पे. राधाकृष्णन् नम्पूतिरिः**

प्राचार्यः, मद्रपुरी संस्कृतमहाविद्यालयः,

मयूरपुरी, चेन्नै - ४

अस्मिन् काले शस्त्रक्रियासहितशिशुजननप्रक्रियाः बहवः संभवन्ति।तत्र सत्समयनिर्णयार्थं जनाः दैवज्ञसाहाय्यं स्विकुर्वन्ति च।तस्य आवश्यकता अस्ति व न वा इति विचारः अत्र क्रियते। अद्यापि ब्रह्माण्डस्थितरहस्येषु अद्भुततमं जीवोत्पत्तिरहस्यं भवति।प्रकृतिस्थ वायुसूर्यप्रकाशादिकं उपयुज्य विद्युच्छक्तिनिर्माणम्-एकनिमेषाभ्यन्तरे भस्मीकरणशक्तिसहित-अण्वायुधनिर्माणं इत्यादीनि प्रपञ्चरहस्यविषये उदाहरणभूतानि सन्ति। प्रकृतिस्थरहस्येषु भूमिपुत्रे कुजग्रहे भूस्वभावः एवं चन्द्रे जलं इत्यादयः बहुकालभूरिपरिश्रमात् गवेषणद्वारा ज्ञातवन्तः । अपि च अस्मदीयाः भारतीयमहर्षयः गवेषणादिकं विना बहुषु संहिताग्रन्थेषु सुस्पष्टम् उल्लिखितवन्तः ।

केचित् पारमार्थिकाः केचित् व्यवहारार्थिकाः प्रतिपादिताः सन्ति। ज्योतिषशास्त्रे सूर्यगतिः इति वर्तते । वस्तुतः सूर्यस्य गतिः नास्ति। भूगतिरेव सूर्यगतिः। अत्र व्यावहारिकम् अन्यत् पारमार्थिकम् अन्यत्। एवं वातपित्तकफाः अपि व्यावहारिके रोगरूपाः मलविशेषाः च। पारमार्थिके तु द्रव्यतन्मात्रिकपरमाणवः। वेदान्ते 'अन्नं ब्रह्मेति व्यजनात्' इति वर्तते। सत्यम्। बुभुक्षितस्य अन्नं ब्रह्मरूपमेव भवति। एवञ्च व्यावहारिकपारमार्थिकरूपाणि

 ISSN – 2249-538X

प्रपञ्चरहस्यानि सन्ति। तादृशरहस्यानां द्रष्टारः मुनयः। तद्वत् जीवोत्पत्तिकारकः परमात्मा ईश्वरः। तत्र सत्समयनिर्णयः अयं मनुष्यः करोतीति चिन्तनीयोऽयं विषयः।

अत्र शस्त्रक्रियाद्वारा शिशुजननम्। 'इञ्जक्षन्' इत्यादिकं कृत्वा अपि शीघ्रप्रसवव्यवस्थां कुर्वन्ति भिषग्वराः। अत्र दैवज्ञानां का शिरोवेदना इत्युक्ते शस्त्रक्रियया जननस्य मुहूर्तदानम् अथवा प्रसवकालस्य समयदानं कथमिति। भिषग्वराः अपि सत्समयदानार्थं पित्रोः निकटे निर्दिशन्ति। अत्र जननस्य मुहुर्तनिर्णयस्यावश्यकता अस्ति वा न वेति विचारः। तत्र तावत्प्रथमं जीवशास्त्रानुसारेण चिन्तयामः। सृष्टिरहस्यं प्रपञ्चे परमरहस्यरूपेण भवति इति सर्वत्र विदितमेव। शास्त्रपुरोगतिः तु पुरुषबीजं स्त्रियः अण्डं च बहिः परीक्षणनालिमध्ये संस्थाप्य तत् गर्भे निक्षिप्य 'टेस्ट् ट्यूब्' शिशोः उत्पादनपर्यन्तं गन्तुं व्यवस्था दत्ता। तत्रापि आधुनिकचिकित्साविदग्धभिषग्वरवचनानि तु - शुक्लशोणितसंयोगं परीक्षणनालिकायां कृत्वा गर्भपात्रनिक्षेपणपर्यन्तं मम कर्म इति कल्पितेऽपि तच्छेषं चतुर्विंशतेः घण्टानन्तरमेव तत् जीवरूपं स्वीकृतं वा न वा इति वक्तुं शक्यते इति। तस्मात् शुक्लशोणितसंयोगानन्तरं जीवलक्षणाण्डोत्पत्तिः चतुर्विंशतिघण्टामध्ये अज्ञातनिमेषे एव सम्भवति। तन्निमेषं ज्ञातुं उपायाः न सन्ति। तस्मात् गर्भे जीवोत्पत्तिकर्म दैवायत्तमेव। तस्य परिवर्तनं कर्तुं जन्मकालनिर्णयेन न पार्यते। ज्योतिषशास्त्रे तस्य आधानकालः इति वक्ष्यते। आधानकालस्य निर्णयं कर्तुं अशक्यत्वात् जननकालिकम् अथवा शिशोः भूस्पर्शनकालिकं जातकं कृत्वा तत्कालीनग्रहस्थितिवशात्

शुभाशुभफलनिर्णयं कुर्वन्ति। प्रायशः मेघगर्भस्य वृक्षगर्भस्य उदकार्गलप्रवचनञ्च मनुष्याः कुर्वन्ति। तद्वत् जननकालनिर्णयरूपं प्रवचनमपि कर्तुमिच्छन्ति।

अत्र जननकालनिर्णये केवलं नक्षत्रनिर्णयः, गुरोः इष्टभावनिर्णयः इत्यादीन् द्वित्रान् अंशान् एव विचिन्त्य शुभकालदानस्य सामर्थ्यम्। तथपि दैवज्ञाः प्रसवसमयदानं कथञ्चित् कुर्वन्ति। एतद्विषये लौकिकरीत्या वैदिकरीत्या च शास्त्रीयता नास्ति। नवग्रहाणां द्वादशराशिषु स्थितिरेव खलु जातकम्। तत्र एकः ग्रहः षष्टिप्रकारशुभाशुभफलदाता। शुभाशुभफलानां मध्ये शुभफलानुभवः अशुभफलानुभवश्च जन्मान्तरकृतप्रारब्धवशादेव संभवति। तस्मात् जातके ग्रहस्य बलाधिक्ये फलस्याधिक्यं बलराहित्ये फलराहित्यं इति निष्कृष्टतया वक्तुं न शक्यते। एकः गुणः बहुदोषहर्ता तथा एकः दोषः बहुगुणहर्ता इति अतिशयः जातकचिन्तने दृश्यते अनुभूयते च। अत्र मिहिरवचनम् --

**कथितफलविपाकैः तर्कयेद्वर्तमानां**

**परिणमति फलोक्तिः स्वप्नचिन्तास्ववीर्यैः ॥**

(बृहज्ज्ञातकम् ८अ. २२श्लो.) इति ।

एवञ्च ग्रहबले सत्यपि फलानुभवयोगाभावः । ग्रहबलन्यूनतायां सुखजीवितम् उभयमपि लोके दृश्यते।तदुक्तं --

**सुखदुःखकरं कर्म शुभाशुभमुहूर्तजं।**

**जन्मान्तरेऽपि तत्कुर्यात् फलं तस्यान्वयेऽपि वा॥**

(प्रश्नमार्गः १अ. ३८श्लो.)

 ISSN – 2249-538X

एवञ्च जन्मजन्मान्तरकृतप्रारब्धविशेषाः जातकफलस्य वैविध्ये कारणमिति ज्ञायते।तत्रापि वंशदोषः जातकफलस्य परिवर्तनं करोतीति **'फलं तस्यान्वयेऽपि वा'** इत्यनेन सूच्यते। वंशीयपापविशेषाः अपि शुभफलानुभवप्रतिबन्धकाः भवन्ति। एवञ्च एकस्य ग्रहस्य उच्चादि गुणसहितेष्टभावे सत्यपि शुभफलानुभवः भवितुमर्हति। इदमित्थमिति निष्कृष्टतया वक्तुं ज्योतिषशास्त्रे व्यवस्था नास्ति। वास्तविकतया ग्रहास्तु सूचकाः, न तु दायकाः इति ज्ञायते।

**पूर्वजन्मार्जितं कर्म शुभं वा यदि वाशुभम्।**

**तस्य पक्तिं ग्रहाः सर्वे सूचयन्तीह जन्मनि।**

(लघुजातकम् १अ. २श्लो.)

इति लघुजातकवचनमपि वर्तते। तेन ग्रहाः कर्मफलपाकसूचकाः इति ज्ञायते । जन्मजन्मान्तरविहितपुण्यपापानां प्राबल्योद्रेकादि-विषयसहितजातकचिन्तनं प्रारब्धसञ्ज्ञी भवति। तदुक्तम् प्रश्नमार्गे यथा -

**प्राग्जन्मार्जितपुण्याघप्राबल्योद्रेकहेतवः।**

**प्रारब्धसंज्ञी मनुष्यजातौ जातकचिन्तनम्॥**

(प्रश्नमार्गः १अ. ३९श्लो.)

तस्मात् प्रारब्धवशात् एकः दोषः विषस्य क्षीरघटे पतनवत् सर्वक्षीरदोषाय भवति। एकः गुणः सिंहदृष्टमत्तगजयूथवत् पलायनयोग्याः अपि भवितुमर्हन्ति। लब्धजातकस्य शास्त्रीयफलचिन्तनायां दैवज्ञस्य प्रवचनसामर्थ्यं एवं प्रष्टुः पुण्यपापानि च विषयीभूतानि भवन्ति इति अवस्था दृश्यते।

एवञ्च जननकालिकमुहूर्तदर्शनस्य उपदेष्टारः भवन्ति बन्धुवर्गभिषग्वरादयः। तैरपेक्षितं शुभकालं दृष्ट्वा तन्निर्देशकः भवति दैवज्ञः। जननप्रक्रिया नाम ईश्वरप्रेरणया कल्पितः। तत् शस्त्रक्रियया सुखप्रसवेन वा भवतु, तस्य समयनिर्णये यत्किमपि प्रयोजनं नास्ति इति अभिप्रायः पूर्वोक्तलेखनात् लभ्यते। सुखप्रसवजन्मकालतः अथवा शस्त्रक्रियाजन्मकालतः जन्मकालीनजातकं दृष्ट्वा फलप्रवचनं प्रकृत्या दैवेच्छया लब्धजातकेनैव कर्तुं शक्यते। तदर्थं ज्योतिश्शास्त्रे सरला प्रामाणिकव्यवस्था वर्तते। तत्र निर्णीतसमयस्य आवश्यकता नास्ति। तस्य प्रयोजनं शास्त्रीयता च नास्तीत्यास्तां विस्तरः॥

****************

 ISSN – 2249-538X

# सप्तर्षिचारः

**डा. मुरलीकृष्णः टि.**

संवदाध्यापकः, ज्यौतिषविभागः,

राजीवगान्धीपरिसरः, शृङ्गेरी

हिन्दूसम्प्रदायाचरणशीलानां परिचितमिदं सप्तर्षिनक्षत्रमण्डलम्। यतः विवाहसंस्काराङ्गतया संपत्स्यमाने कश्चित्कार्यक्रमे सप्तर्षिमण्डलदर्शनमप्यन्यतमम्। कार्यक्रमेऽस्मिन् आचार्येणोपदिष्टः वरः, आदौ सप्तर्षिमण्डलं, ततश्च तन्मण्डले विद्यमानं षष्ठम् वसिष्ठनक्षत्रम्, ततश्च तद्वामगम् अरुन्धतीनक्षत्रञ्च नवोढायै वध्वै प्रदर्शयति। आकाशे उत्तरस्यां दिशि स्थूलरूपेण सप्तर्षिमण्डलं दृश्यते। तत्र च पुनः सूक्ष्मं वसिष्ठं, ततोऽपि सूक्ष्मम् अरुन्धतीञ्च प्रदर्शयन्ति। अयमेव लोके अरुन्धतीदर्शनन्यायः इति प्रसिद्धः। यदि यं कमपि सूक्ष्मं विचारं निरूपयितुं स्थूलं किञ्चिद्विचारमादौ प्रस्तूयते तर्हि अयं न्यायः प्रयुज्यते।

**सप्तर्षिनक्षत्रमण्डलम् -**

वराहमिहिरविरचितायां बृहत्संहितायां, बल्लालसेनविरचिते अद्भुतसागराख्ये ग्रन्थे च सप्तर्षिनक्षत्रमण्डलस्य स्वरूपादिविषये विस्तृतं विवेचनं विहितम्। आचार्यः वराहमिहिरः बृहत्संहितायां सप्तर्षिमण्डलस्य शोभामेवमवर्णयत् -

**सैकावलीव राजति ससितोत्पलमालिनी सहासेव ।**

**नाथवतीव च दिग्यैः कौबेरी सप्तभिर्मुनिभिः ॥**

**ध्रुवनायकोपदेशान्नरीनर्तीवोत्तरा भ्रमद्भिश्च ।**

**यैश्चारमहं तेषामहं  कथयिष्ये वृद्धगर्गमतात् ॥**[1]

उत्तरस्यां दिशि ध्रुवनक्षत्रस्य स्थानम्। तत्पार्श्वे सप्तर्षिनक्षत्रमण्डलं शोभते। तच्च स्वामिना युक्ता नायिका इव शोभते। एवमेव नक्षत्रमण्डलमिदम् एकावली हार इव, हासयुता कन्या श्वेतोत्पलमालया शोभायमाना इव विलसति। न केवलं तावत् नायकस्य उपदेशानुसारं यथा नर्तक्यः नृत्यन्ति तथा ध्रुवं परितः नक्षत्रमण्डलस्य भ्रमणं नयनरमणीयमित्युपवर्णितम्। अत्र ध्रुव एव नायकः। सप्तर्षिमण्डले विद्यमानानि नक्षत्राण्येव नर्त्यक्यः इति सादृश्यं स्वीकृतम्।

**सप्तर्षिमण्डलस्थानां नक्षत्राणां परिचयः -**

सप्तर्षिनक्षत्रमण्डले सप्तनक्षत्राणि वर्तन्ते। एकैकस्य नक्षत्रस्य एकैकं नाम प्रदत्तम्। तदुक्तमस्मिन् श्लोके -

**पूर्वे भागे भगवान् मरीचिरपरे स्थितो वसिष्ठोऽस्मात् ।**

**तस्याङ्गिरास्ततोऽत्रिस्तस्यासन्नः पुलस्त्यश्च ॥**

**पुलहः क्रतुरिति भगवानासन्न अनुक्रमेण पूर्वाद्यात् ।**

**तत्र वसिष्ठं मुनिवरमुपाश्रितारुन्धती साध्वी ॥**[2]

पूर्वभागे मरीचिः। तस्मात्पश्चिमे वसिष्ठः, तस्मात् अङ्गिराः, तस्मात् अत्रिः, तस्यासन्नः पुलस्त्यः, ततः पुलहः, अन्ते च क्रतुः। एवं सप्तनक्षत्राणि।

---

[1] बृहत्संहिता - 13अ. 1-2श्लो.

[2] बृहत्संहिता - 13अ. 5-6श्लो.


ISSN – 2249-538X

वसिष्ठनक्षत्रमुपाश्रितमिव दृश्यमानं दक्षिणभागस्थं नक्षत्रम् अरुन्धती। आदौ ध्रुवनक्षत्रमवलोकयेत्। ततश्चाग्रे एकं सूत्रं पश्चिमदिग्भागं प्रसारितमिव कल्प्यते चेत्तत्र क्रतुपुलहयोः स्थितिः। ततः वक्ररूपेण अवशिष्टानि नक्षत्राणि अधोऽधः दृश्यन्ते।

सप्तर्षिनक्षत्रमण्डलविचारे अन्येऽपि केचन विचाराः प्रस्तूयन्ते। वैज्ञानिकानां मते अत्यधिकविस्तृतियुतेषु नक्षत्रपुञ्जेषु एतस्य तृतीयस्थानमुपकल्प्यते। तथा च विद्यमानेषु सप्तसु नक्षत्रेषु अत्रेः अधिका कान्तिरित्यामनन्ति। विदेशेषु सैनिकानां चयनकाले नयनयोः सामर्थ्यज्ञानाय अरुन्धतीं दर्शयन्त आसन्नित्युल्लेखोऽस्ति। कालज्ञानायापि नक्षत्रमण्डलमिदम् उपयुज्यते स्म। अस्माकं देशे वसन्ततौं (सामान्यतः एप्रिल्तः जून् पर्यन्तं) सप्तर्षिमण्डलं रात्रौ दृश्यते। भाद्रपदमासात् पौषमासपर्यन्तं रात्रेः पूर्वभागे अरुन्धत्याः दर्शनमशक्यम् । उत्तरयूरोपदेशेषु ध्रुवस्यौन्नत्यमधिकमित्यतः आरात्रं दृश्यते।

**सप्तर्षिचारः -**

अरुन्धतीसहिताः सप्तर्षयः एकैकस्मिन् नक्षत्रे शतं वर्षाणि तिष्ठन्ति। तदुक्तं यथा -

**एकैकस्मिन्नृक्षे शतं शतं ते चरन्ति वर्षाणाम् ।**
**प्रागुत्तरतश्चैते सदोदयन्ते ससाध्वीकाः ॥**[1]

भट्टोत्पलीयव्याख्याने काश्यपस्य वचनमुद्धृतं यथा-

[1]बृहत्संहिता - 13अ. 5श्लो.

**शतं शतं तु वर्षाणामेकैकस्मिन् महर्षयः ।**

**नक्षत्रे निवसन्त्येते ससाध्वीका महातपाः ॥**[1]

पूर्वक्षितिजे उदीयमानेन नक्षत्रेण सप्तर्षिमण्डलोदयं जानीयात्। तदर्थमेव सप्तर्षीणां चारः शतं वर्षेषु एकनक्षत्रात्मकमित्युक्तम्। तद्गणनाक्रमार्थमेनं श्लोकमाह -

**आसन्मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ ।**

**षड्द्विकपञ्चद्वियुतः शककालस्तस्य राज्ञश्च ॥**[2]

युधिष्ठिरनृपतेः शासनकाले मघानक्षत्रे सप्तर्षयः आसन्। अर्थात् पूर्वक्षितिजे मघानक्षत्रस्योदये जाते सप्तर्षय अपि उत्तरस्यां दिशि दृष्टिपथमायासिषुरित्यर्थः। युधिष्ठिरनृपतेः कालः कलिद्वापरयोः सन्धिकाल इति भट्टोत्पलीयव्याख्यानोक्तात् वृद्धगर्गवचनाज्ज्ञायते यथा -

**कलिद्वापरसन्धौ तु स्थितास्ते पितृदैवतम् ।**

**मुनयो धर्मनिरताः प्रजानां पालने रताः ॥**[3]

वराहमिहिरस्य ग्रन्थरचनाकाले युधिष्ठिरस्य पट्टाभिषेकात्परं 2526 वर्षाणि (**षड्द्विकपञ्चद्वियुतः** इति श्लोकोक्तप्रकारेण) गतानि। वराहमिहिरस्य कालः क्रि. श. 488 तः 587 पर्यन्तमिति इतिहासविद्भिर्निश्चितः। वराहमिहिरस्य कालादनन्तरं प्रायः 1600 वर्षाणि अतीतानीति स्वीकुर्मः। अतः अधुना प्रायः युधिष्ठिरकालात् 2526 + 1600 = 4126 वर्षाणि

---

[1]बृहत्संहिता - 13अ. 3श्लो. - भट्टोत्पलीयव्याख्या

[2]बृहत्संहिता - 13अ. 3श्लो.

[3]बृहत्संहिता - 13अ. 3श्लो. - भट्टोत्पलीयव्याख्या

अतीतानि। तदा 4126/100 = 41-26 इति। एवञ्चेत् मघातः द्विचत्वारिंशत्तमे नक्षत्रे सप्तर्षीणां स्थितिः। मघातः द्विचत्वारिंशत्तमं नक्षत्रं शतभिषक्। अतोऽनेन पूर्वस्यां दिशि शतभिङ्ननक्षत्रस्य उदयः जातस्तर्हि समकालमेव उत्तरस्यां दिशि सप्तर्षयः उदयं प्राप्नुवन्ति।

किञ्च बल्लालसेनविरचिते अद्भुतसागरे ध्रुवाद्यद्भुतावर्ताध्याये एवमुक्तम् -

**भुजवसुदश(1082)मितशाके श्रीमद्बल्लालसेनराज्यादौ।**
**वर्षैकषष्टि(61)भोगो मुनिभिर्विहितो विशाखायाम्॥**[1]

अतः बल्लालसेनस्य शासनं 1082तमे शके आसीत्। तस्मिन्काले 61 वर्षाणि अतीतानि। अपि च विशाखानक्षत्रोदयकाले सप्तर्षिमण्डलम् उदेति स्म। साम्प्रतं शकः 1939। ततः परं 856 वर्षाणि अतीतानि। तदा बल्लालसेनकालाद्गण्यमाने अष्टौ (856/100 = 8) नक्षत्राणि गतानि। अनूराधानक्षत्रादिना गण्यमाने सति अष्टमे पूर्वाभाद्रपदानक्षत्रे सप्तर्षीणामुदयः। वराहमिहिरस्य मतानुसारेण गण्यमाने शतभिषजि तथा बल्लालसेनस्य मतानुसारेण गण्यमाने पूर्वाभाद्रपदानक्षत्रे च उदयः। अत्र कालनिर्णयार्थमपेक्षितः शककालः कः स्वीकर्तव्य इति विषये इतिहासविदां विसंवादः वर्वर्ति। साम्प्रतं पूर्वाभाद्रपदानक्षत्रस्योदये सप्तर्षयः उत्तरस्यां दिशि दृष्टिपथमायान्तीत्यतः बल्लालसेनोक्तः क्रमः स्पष्टतरः प्रतिभाति।

---

[1]अद्भुतसागरः - 11अ. 11श्लो.

**शुभाशुभफलनिरूपणम् -**

यदि सप्तर्षिमण्डलम् उल्कया अशन्या धूमेन रजसा तुहिनेन वा हताः, वर्णरहिताः, अल्पकिरणाः, लघ्वाकाराः दृष्टाश्चेत् तत्तद्वर्गं नाशयन्ति। एतद्वैपरीत्येन पृथुबिम्बाः, कान्तियुक्ताः, निर्मलाश्च दृष्टाश्चेत् तत्तद्वर्गस्य पोषकाः भवन्तीति ज्ञेयम्। तदुक्तमस्मिन् श्लोके -

**उल्काशनिधूमाद्यैर्हता विवर्णा विरश्मयो ह्रस्वाः।**
**हन्युः स्वं स्वं वर्गं विपुलाः स्निग्धाश्च तद्वृद्धौ॥**[1]

पूर्वोक्तमेव विचारं विष्णुधर्मोत्तरपुराणान्तर्गतोऽयं श्लोकः अनुवदति। अद्भुतसागरेऽप्ययम् उद्धृतः यथा -

**उल्कयाभिहताः रूक्षाः स्फुरणा रजसा हताः।**
**ऋषयः सर्वलोकानां विनाशाय च भूभृताम्॥**[2]

अर्थात् उल्कादिभिः पीडिताः सप्तर्षयः राज्ञा सह प्रजाक्षयकराः भवन्ति। महाभारते भीष्मपर्वणि कुरुपाण्डवसैन्यवधस्य निमित्तरूपेण अयं श्लोकः उक्तः। अद्भुतसागरेऽपि तदुद्धृतं यथा-

**सप्तर्षीणामुदराणां समवच्छाद्यते प्रभा।**[3]

सामान्यतः अरुन्धतीनक्षत्रं वसिष्ठनक्षत्रमनुसरति। किन्तु यदि तन्नक्षत्रं वसिष्ठात्प्रागुदितञ्चेत् लोकक्षयं सूचयति। इदमपि लक्षणं कुरुक्षेत्रयुद्धकाले समवाप्तमित्युक्तं यथा -

---

[1] बृहत्संहिता - 13अ. 7श्लो.

[2] विष्णुधर्मोत्तरपुराणम् - 1.85.59; अद्भुतसागरः - 11अ. 16श्लो.

[3] महाभारतम्- 6.3.26; अद्भुतसागरः - 11अ. 15श्लो.


ISSN – 2249-538X

**या चैषा विश्रुता राजंस्त्रैलोक्ये साधुसत्तमा।**

**अरुन्धती तथाऽप्येष वसिष्ठः पृष्ठतः कृतः ॥**[1]

**सप्तर्षीणां वर्गाः -**

सप्तसु नक्षत्रेषु एकैकस्य नक्षत्रस्य कश्चन वर्गः प्रोक्तः। तदादौ मरीचेः वर्गः -

**गन्धर्वदेवदानवमन्त्रौषधिसिद्धयक्षनागानाम् ।**

**पीडाकरो मरीचिर्ज्ञेयो विद्याधराणाञ्च ॥**[2]

मरीचेः वर्गे गन्धर्वाः, देवाः, दानवाः, मन्त्राः, औषधयः, सिद्धाः, यक्षाः, नागाः, विद्याधराश्च भवन्ति। द्वितीयोऽस्ति वसिष्ठस्य वर्गः। तद्यथा-

**शकयवनदरदपारतकाम्बोजांस्तापसान् वनोपेतान् ।**

**हन्ति वसिष्ठोऽभिहतो विवृद्धिदो रश्मिसम्पन्नः ॥**[3]

शकाः, यवनाः, दरदाः, पारताः, काम्बोजाः, तापसाः, वनवासिनश्च वसिष्ठवर्गीयाः। वसिष्ठनक्षत्रम् उल्कादिभिः पीडितमाकाशे दृष्टञ्चेत् तद्वर्गीयानां नाशः ज्ञेयः। तृतीयः आङ्गिरसः। तदुक्तं यथा - **अङ्गिरसो ज्ञानयुता धीमन्तो ब्राह्मणाश्च निर्दिष्टाः ।**[4] ज्ञानयुक्ताः, धीमन्तः, ब्राह्मणाश्च आङ्गिरसवर्गीयाः स्युः। चतुर्थे आत्रेयवर्गे वनेषु समुत्पन्नाः, जलोत्पन्नाः (प्राणिनः वस्तूनि वा), समुद्राः, नद्यश्च स्युः। अत्र प्रमाणं यथा -**अत्रेः कान्तारभवाः**

[1]महाभारतम्- 6.2.30; अद्भुतसागरः - 11अ. 31श्लो.

[2]बृहत्संहिता - 13अ. 8श्लो.

[3]बृहत्संहिता - 13अ. 9श्लो.

[4]बृहत्संहिता - 13अ. 10श्लो.

**जलजान्यम्भोनिधिः सरितः ।**[1] पञ्चमे पुलस्त्यस्य वर्गे राक्षसाः, पिशाचाः, दानवाः, दैत्याः, सर्पाश्च भवन्ति। श्लोकस्तु यथा - **रक्षःपिशाचदानवदैत्यभुजङ्गाः स्मृताः पुलस्त्यस्य ।**[2] पुलहस्य उपान्तिमः वर्गः। **पुलहस्य तु मूलफलम्.... ।**[3] इत्युक्त्या सर्वे मूलयुक्ताः फलयुक्ताश्च पुलहवर्गीयाः भवन्ति। तथा सप्तमः अन्तिमश्च क्रतोः वर्गः। अस्मिन् यागाः यागकर्तारश्च अन्तर्भवन्ति। अत्र च बृहत्संहितायाः प्रमाणं यथा - **क्रतोस्तु यज्ञाः सुयज्ञकृतः ॥**[4] इति।

एवं क्रमशः मरीच्यादीनां सप्तानां ऋषीणां वर्गः निरूपितः। प्रागभिहितक्रमेण तत्तन्नक्षत्राणां दोषत्वे तत्तद्वर्गगतानां हानिः तथा तत्तन्नक्षत्राणां शुभत्वे तत्तद्वर्गगतानां सुखञ्च जायते।

***************

[1] तत्रैव

[2] बृहत्संहिता - 13अ. 11श्लो.

[3] तत्रैव

[4] तत्रैव

 ISSN – 2249-538X

# फलनिर्णये संज्ञायाः प्रयोजनम्

**डा. प्रसाद भट्टः**

अतिथ्यध्यापकः, ज्यौतिषविभागः

राजीवगान्धीपरिसरः, शृङ्गेरी

ज्योतिश्शास्त्रं गणितं फलितमिति द्विधा विभक्तम् । तत्र प्रसिद्धे फलिते पृच्छाजातकमिति प्रसिद्धं विभागद्वयम् ।

बुद्ध्वा शास्त्रं यथान्यायं बलाबलविधानतः ।
यथोक्तं जातके सर्वं तद्वत् प्रश्नेपि चिन्तयेत् ॥

इत्यादि शास्त्रवचनमाश्रित्य जातके प्रश्ने च विषयभेदः विद्यते तथापि फलचिन्तनप्रकारः समानः इत्यवगम्यते । इदानीं जिज्ञासा जागर्ति कथं फलचिन्तनम् इति । अत्र विमूढाः अशास्त्रिणः नास्तिकादयः स्वमतं ब्रुवन्ति ऊहापोहपटुत्वेनेति । अर्थात् पृच्छकस्य मुखादेव तस्य सुखदुःखादीन् विज्ञाय तस्मै पुनः प्रवचनमिति । कथं फलचिन्तनम् इत्यत्र शास्त्रज्ञोपि ऊहापोहपटुधिया इत्येव वदति किन्तु अस्य मार्गः भिन्नः । ऊहा नाम अवश्यं भवति अपोहः नाम अवश्यं न भवतीत्यात्मकशास्त्रपरिष्कृतज्ञानम् । अत्र शास्त्रकाराः दैवज्ञस्य लक्षणं वदन्ति –

अनेकहोरातत्त्वज्ञः पञ्चसिद्धान्तकोविदः ।
ऊहापोहपटुः सिद्धमन्त्रो जानाति जातकम् ॥ इति

अनेकहोराग्रन्थतत्वज्ञः पञ्चसिधान्तेष्वपि कोविदः सिद्धमन्त्रोपि यः अस्ति सः ऊहापोहपटुत्वेन जातकं ज्ञातुं समर्थोभवतीत्यर्थः । एवमेव

फलचिन्तनस्य काठिण्यं वराहमिहिरोऽपि बृहज्ज्ञातके सम्यक् प्रपञ्चितवान् द्वितीये श्लोके । तेनोच्यते होराफलज्ञप्तये पटुबुद्धिभिः पटुधियां शब्दन्याय-समन्वितेषु बहुशश्शास्त्रेषु दृष्टेष्वपि होरातन्त्रमहार्णवप्रतरणे भग्नोद्यमानेभ्यः अहं स्वल्पं शास्त्रप्लवं प्रारभे इति । एवं तर्हि फलचिन्तनमतीव कठिनतरं वा इत्युक्ते किञ्चित् सुलभमप्यस्ति । यः होरातत्वं जानाति तस्य सुलभसाध्यम् ।

ये फलितज्यौतिषं पठितुमिच्छन्ति तेषां सर्वेषामतीवकुतूहलः अहं भूतं वदिष्यामि अहं भविष्यं वदिष्यामि समीचीनं भवति वा न वा इत्यादि । किन्तु आरम्भे यदा ते जातकं गृण्हन्ति तदा तु द्वादशराशयः नवग्रहाः एव दृश्यन्ते न तु भूतभविष्यादयः । तदा गुरूणामाश्रयं स्वीकुर्वन्ति तेषामादेशानुसारं सम्पूर्णं ग्रन्थं कण्ठस्थं भवति पुनः जातकं गृण्हन्ति तदापि पूर्वतनस्थितिरेव द्वादशराशयः नवग्रहाः एव दृश्यन्ते । पुनः गुरूणां समीपे गच्छन्ति सम्यक् पठतु इति आदेशं स्वीकुर्वन्ति सम्यक् पठन्ति इदानीं काश्चित् भिन्ना स्थितिः । राशिफलं भावफलं योगादीन् अवगच्छन्ति किन्तु अनुभवयोग्यफलप्रवचनं न भवति । गजकेसरी योगः दृश्यते जातकस्य पार्श्वे धनं नास्ति । तस्य पुत्रस्यजातके अरिष्टयोगः अस्ति किन्तु सः आनन्देन क्रीडति । राशिफले भावफले तु केचन अनुभवयोग्याः केचन अनुभव-अयोग्याः । एवं पुनः गुरूणां समीपे गच्छन्ति ते तु इदानीं जातकशास्त्रतत्त्वं पाठयन्ति पूर्वं संज्ञाविशेषान् सम्यक् पठतु ततः परं राशिफलादयः इति ।

वस्तुतः राशिफलादयः अत्र संज्ञाविशेषाणां संयोगः एव । उदाहरणार्थं मेषराशिफलं पश्यामः । वृत्तातास्रदृगुष्णशाकलघुभुक् .......... । अत्र मेषस्य मेषाधिपकुजस्य चन्द्रस्य च फलं वर्वर्ति । वृत्तः अताम्रदृक्

 ISSN – 2249-538X

उष्णभुक् एते चन्द्रस्य। शाकभुक् क्षिप्रप्रसादः अटनः कामी दुर्बलजानुः शूरः अङ्गनावल्लभः कुनखी व्रणाङ्कितशिराः तोयेभीरुः एते अजस्य। अवशिष्टाः लघुभुक् अस्थिरधनः शूरः अङ्गनावल्लभः सेवाज्ञः मानी सहोत्थाग्रजः शक्त्या पाणितलेऽङ्कितोऽतिचपलः एते कुजस्य। अत्र फलं कथं वक्तव्यमित्युक्ते “बलवतिराशौ तदधिपतौ च स्वबलयुतः स्याद् यदि तुहिनांशुः” इति ग्रन्थोक्तप्रकारेण। अत्र चन्द्रस्य कुजस्य च बलाबलनिर्णयार्थं द्वितीये अध्याये षड्बलनिरूपणमकारि। राशिबलनिर्णयार्थं प्रथमाध्याये होरास्वामिगुरुज्ञवीक्षितयुता नान्यैश्च वीर्योत्कटा इत्युक्तवान्। यदि मेषे लग्नमस्ति तर्हि होराफलं लग्नपतेः समानमित्युक्तत्वात् पूर्वोक्तचन्द्रफलं विहाय राशेः राश्यधिपतेश्च बलाबलविवेकेन फलं विवेचनीयम्। रवेः मेषादिराशिस्थितिफलं प्रथितश्चतुरोटनोल्पवित्तइत्यादयः कुजस्य नरपतिसत्कृताटनचमूपेत्यादिसर्वं एवमेव सङ्गच्छते। तदर्थमेव –

संज्ञाध्याये यस्य यद्द्रव्यमुक्तं कर्माजीवे यस्य यच्चोपदिष्टम्।

भावस्थानालोकयोगोद्भवं यत् तत्तत् सर्वं तस्य योज्यं दशायाम् ॥इत्युक्तम्

सर्वेषु जातकग्रन्थेषु संज्ञाध्यायौ भवतः। तत्र प्रथमः अध्यायः राशिसम्बद्धविषयकः द्वितीयः ग्रहसम्बद्धविषयकः। राशिग्रहयोः सम्बन्धः देहात्मवत् अविनाभावः। तदर्थमेव वराहमिहिरः कालाङ्गानीति तथा कालात्मेत्यारब्धवान्। अर्थात् मेषादिराशयः कालपुरुषस्य अङ्गानि तथैव रव्यादयो ग्रहाः कालपुरुषस्य आत्मादयः इत्यवगम्यते। संज्ञाध्यायस्य प्रयोजनमवगन्तुं केचनश्लोकाः व्याख्यायन्ते।

तत्र प्रथमतया कालाङ्गानीत्यादिप्रथमश्लोकं पश्यामः । फलप्रवचनार्थं लग्नमपेक्षते । लग्नमङ्गस्पर्शेनापि लभ्यते तदर्थमेव मेषादयः वराङ्गादीनीति वर्णिताः । अर्थात् पृच्छकः प्रश्नसमये यं अङ्गं स्पृशति तस्याङ्गस्य प्रतिनिधीभूतराशिः लग्नमित्यर्थः । वराङ्गाद्यङ्गानामारम्भः यथा मेषादिः तथा लग्नादिराशौ अपि उपयुज्यते । अङ्गानां ह्रस्वदीर्घत्वं लग्नादिभावाश्रितवराङ्गाद्यवयवेषु वक्तव्यमिति प्रश्नमार्गस्याभिप्रायः । यस्मिन्नङ्गे शुभग्रहः तस्य पुष्टिः यत्र पापाः तत्र व्रणाद्युपद्रवाः ।

चक्रस्थिता राशयः इत्युक्तत्वात् राशिचक्रं चरचक्रं स्थिरचक्रमिति द्विधा । तत्र चरचक्रं जातके प्रश्नेच लग्नानयनार्थं स्थिरचक्रं दैवज्ञस्य समन्तात् “प्राच्यादिगृहे क्रियादयः द्वौ द्वौ कोणगता द्विमूर्तयः” इत्यनेन आरूढलग्नज्ञानार्थमुपयोगः । तत्र एकस्य अभीष्टस्य निर्णये षड्राशयश्चिन्त्याः इति “एकार्थसम्प्रत्यये” इत्यनेनावगम्यते । तत्र प्रश्ने आरूढोदयलग्नांशछत्रस्पृष्टाङ्गचन्द्राधिष्टितराशयश्चिन्त्याः इति तु विदितमेव । पुनः जातके लग्नराशिः चन्द्रराशिः तयोरधिपतिस्थितराशिः तयोः नवांशराशिश्च चिन्त्या इति विशेषः । एतेषु फलप्रवचनार्थं षड्वर्गः स्वीकर्तव्यः इत्यपि च ।

द्वितीये अध्याये “कालात्मा दिनकृन्मनस्तुहिनगुः इत्याद्यारब्धेन श्लोकेन कारकत्वचिन्तनं क्रियते । तद्यथा -

कालात्मा दिनकृत् । आत्मशब्देन देहाधिष्ठितजीवात्मा उच्यते । क्वचित् परमात्मा च । आत्मकारकः राजा च रविः ।

 ISSN – 2249-538X

तुहिनगुः चन्द्रः । अत्र मन इति मनोबुद्ध्यहंकारचित्तानामुपलक्षणम् । चन्द्रस्य स्त्रीग्रहत्वात् राज्ञी ।

सत्त्वं कुजः । सत्त्वशब्देन हर्षशोकेष्वविकारकरं सत्त्वं विवक्षितम् । विक्रमविषयभूतसत्त्वकारकत्वमपि कुजस्यैव । नेता च ।

ज्ञः वचः । ज्ञ इति बुधस्य ज्ञानकरकत्वं विद्याकारकत्वं च, पुनः ज्ञानिवत् सर्वभूतसुहृत्त्वम् अतो बुधो बन्धुकारकश्च । ज्ञ इति निर्देशान्मोक्षकारकत्वं च तथा ज्ञ इति नामैकदेशे नामग्रहणमिति ज्ञातिकारकत्वं च सूचितम् । राजकुमारः बुधः ।

जीवः ज्ञानसुखे । जीवशब्दप्रयोगात् आत्मेत्यपि गम्यते । तत्र सूर्यः परमात्मा अन्तर्यामी सर्वेषाम् । गुरुः जीवात्मा । जीव इति निर्देशात् विश्वजनकस्य ईश्वरस्य परमात्मनः पुत्राः सर्वे जीवाः अतो गुरोः पुत्रकारकत्वम् । ज्ञानसुखे इति गुरोरध्यात्मविद्याकारकत्वम् सुखकारकत्वं च । जीव इति कुटुम्बधनकारकत्वं अनेनैव लाभकारकत्वं च भवति । चकारेण मदनकारकोऽपि भवति । गुरुः कर्मसचिवः ।

सितश्च मदनः । शुक्रः मदनः स्त्रीग्रहत्वात् कलत्रकारकः सर्वसंसारसुखकामभोगकारकः च । सर्वाणि वाहनानि च शुक्रादेव चिन्त्यानि । चकारेण पूर्वोक्तज्ञानसुखे चेत्यूह्यम् । तत्र शुक्रस्य लौकिकविद्याकारकत्वम् । शुक्रः नर्मसचिवः ।

दिनेशात्मजः शनिः दुःखम् । दुःखमिति सर्वारिष्टकारकत्वम् । दुर्गमं खं दुःखमिति व्युत्पत्त्या दुःखशब्दस्य मोक्षपर्यायत्वात् शनेरपि

सर्वपुण्यपापक्षयद्वारा मोक्षकारकत्वं व्यञ्जितम् । आत्मकारकत्वात् सूर्यः अपि मोक्षकारकः । प्रेष्यस्सहस्रांशुजः ।

'राजानौ रविशीतगू' इत्यनेन रवीन्द्वोः द्वादशराश्यधिपत्यं सूचितम् । तत्र रविः स्वस्थानसिंहादारभ्य क्रमात् षड्राश्यधिपतिः । चन्द्रः स्वस्थानकटकादारभ्य प्रतिलोमेन षड्राश्यधिपः । कुजादीनां राश्यधिपत्यं रविचन्द्राभ्यां दत्तमेव । कुमारनेतृसचिवादीनां ताभ्यां चन्द्रसूर्याभ्यां राश्यधिपत्यं दत्तम् । कुमारस्य बुधस्य रविणा स्वस्थानाद्धनस्थानं दत्तं, पराक्रमसचिवस्य शुक्रस्य पराक्रमस्थानं दत्तं, सेनापतेर्बन्धुस्थानं दत्तम् । एवं प्रतिलोमेन चन्द्रेण च दत्तम् ।

पुनः मधुपिङ्गलदृगित्यादि ग्रहस्वरूपकथनावसरे **देशविशेषस्वरूपं वक्तव्यम्** । यथा भूमिप्रश्ने सूर्यस्तत्कालारूढाधिपश्चेन्मधुपिङ्गलदृगिति मधुवर्णमृदुतत्वं, चतुरश्रतनुरिति समचतुराकारत्वं, पित्तप्रकृतिरित्युष्णाधिक्ययुतत्वं, अल्पकच इति वृक्षराहित्यं च वाच्यम् ।

चन्द्रः आरूढाधिपश्चेत्, तनुवृत्ततनुरिति वृत्ताकृतित्वम् अविस्तृतत्वं च, बहुवातकफ इति वायुजलपूरितत्वं प्राज्ञ इति पण्डितबाहुल्ययुतत्वं, शुभदृगिति फलपुष्टियुतत्वं च वाच्यम् ।

कुजः आरूढाधिपश्चेत् क्रूरदृगित्यश्मसंयुतत्वं, तरुणमूर्तिरिति वासयोग्यत्वं, उदार इति व्ययकर्तृत्वं, पैतिक इत्युष्णाधिक्यजनितरोगयुतत्वं, सुचपल इत्यनिश्चितफलपुष्टिवत्त्वं, कृशमध्य इति विस्तृतोभयपक्षवत्त्वं च वाच्यम् ।

 ISSN – 2249-538X

बुधः आरूढाधिपश्चेत्, श्लिष्टवागित्यान्तरच्छिद्रयुतजनयुतत्वं, सततहास्यरुचिरिति हास्यप्रियजनयुतत्वं, पित्तमारुतकफप्रकृतिश्च इत्युष्णाधिक्यातिवृष्टिचण्डवातजनितदोषयुतत्वं च वाच्यम् ।

गुरुरारूढाधिपश्चेद् बृहत्तनुरित्यतिविस्तृतत्वं, पिङ्गलमूर्धजेक्षण इति पिङ्गलवर्णमृद्युतत्वं, श्रेष्ठमतिरिति सन्मार्गानुगामियुतत्वं, कफात्मक इति जलाधिक्ययुतत्वं च वाच्यम् ।

शुक्रः आरूढाधिपश्चेत् सुखी इत्यारोग्ययुतजनयुतत्वं, कान्तवपुरिति कमनीयशरीरमृदुवाग्जनयुतत्वं, सुलोचन इति सुगन्धमृद्युतत्वं, कफानिलात्मा इति कदाचिच्चण्डवातातिवृष्टिजनितदोषयुतत्वम् असितवक्रमूर्धज इति लताकृतकृत्रिममण्डपयुतत्वं च वाच्यम् ।

शनिरारूढाधिपश्चेत्, अलस इति रोगकर्तृत्वं, कपिलदृगिति ताम्रवर्णमृद्युतत्वं, कृशदीर्घगात्र इति तदाकारत्वं, स्थूलद्विज इति बृहत्पाषाणयुतत्वं, परुषरोमकचोऽनिलात्मा इत्यस्निग्धवृक्षयुतत्वं च वाच्यम् ।

एवं केचन श्लोकाः मया व्याख्याताः दिङ्मात्रेण । संज्ञाविशेषाः बहुषु अध्यायेषु उपलभ्यन्ते । उदाहरणार्थं दशान्तर्दशाध्याये "सौर्यां स्वं नखदन्तचर्म....इत्यादिसप्तश्लोकेष्वपि विद्यमानाः, चतुर्थाध्याये पितृव्यादयः सम्पूर्णद्रेक्काणस्वरूपाः इत्यादयाः । एतदर्थमेव आचार्याः गुरवः सम्पूर्णग्रन्थाध्ययनात्परमेव जातकतत्वं पाठयन्ति । एतत् सर्वं बलाबलपुरस्सरं विचिन्त्य फलादेशः विधेयः ।

***************

# गोचरफलचिन्तनक्रमः

**डा. रमानन्द भट्टः**

संविदाध्यापकः

राजीवगान्धीपरिसरः, शृङ्गेरी

ज्योतिश्शास्त्रमिदं लोकोपकाराय महर्षिभिः प्रणीतम् । अस्य शास्त्रस्योद्देश्यं केवलं न वेदोक्तनिखिलकर्मकालव्यक्तिः, किन्तु समग्रस्य जातस्य पुरुषस्य जीवनयात्राक्रमप्रदर्शनमपि । अतः परमकारुणिका मुनयः अनेकभेदविषयं शास्त्रमिदं प्रणिन्युः । अत्र फलकथनार्थं नैके उपायाः समाश्रिताः सन्ति । तत्रापि आचार्याणां मतिर्भिद्यते । तच्चोक्तं श्रीपतिना "**पाकं द्वादशधा वदन्ति मुनयः ......**[1]" इत्यादिना । यवनाः द्वादशधा, माणित्थाः दशधा, बादरायणः अष्टधा, सिद्धसेनः षोढा, देवलाद्याः चतुर्धा, श्रीविष्णुगुप्तः त्रिधा, सत्यो मुनिः द्विधा च पाकं कथयन्ति । तत्र द्वादशभेदाः प्रथमादिक्रमेण एवं सन्ति । नैसर्गिकः, दशा, अन्तर्दशा, विदशा, राशिसंज्ञः, भावफलाख्यः, योगाभिधः, दृष्टिफलाख्यः, अष्टवर्गः, होरादिवर्गः, प्रत्यब्दमासद्युनिशाफलानि, भोजनमैथुनादयः, सत्वशरीरधातुस्वरूपभेदाश्चेति । सत्येवं फलपाके त्रैविध्यं[2] चाचार्याभिप्रेतमिति तन्मतं दर्शयति रुद्रः –

**"दशाप्रभेदेन विचिन्तयेद् दृढं दृढेतरं चाष्टकवर्गगोचरैः ।**

---

[1] श्रीपतिपद्धतिः ७.२-६

[2] बृहज्जातकम् १.३ (रुद्रविवरणे)

रव्यादीनां एकैकस्मिन् राशौ सञ्चारकालः - "मासं शुक्रबुधादित्याः चन्द्रः पाददिनद्वयम् । भौमस्त्रिपक्षं जीवोऽब्दं सार्धवर्षद्वयं शनिः । राहुकेतू सदा भुङ्क्ते सार्धमेकं तु वत्सरम्"॥

 ISSN – 2249-538X

**दृढादृढं योगवशेन चिन्तयेदिति त्रिधा जातकसूक्ष्मसङ्ग्रहः"** ॥ इति ।

नैकविधफलपाके दृढकर्मफलं दशाभिः, अदृढकर्मफलं अष्टकवर्गचाराभ्यां, दृढादृढविमिश्रफलं योगवशेन विचिन्त्यमिति भावः । एवम् अनेकधा प्रकल्पिते फलपाके अष्टकवर्गस्वरूपमिदं मुहूर्तशास्त्रप्रसिद्धम् अदृढकर्मविपाकसूचकं गोचरफलं मयात्र किञ्चिदभिधास्यते । तत्रादौ गोचरशब्दार्थो ज्ञातव्यः । तथा च तदुक्तं वाचस्पत्ये – "**गवां व्योमगतिमतां चरः**" । चरश्चरणं चारो गतिरित्यर्थः । "**जन्मराशितः प्रोक्तनिषिद्धस्थानस्थितेन इदानीन्तनग्रहवशेन फलनिरूपणं गोचर इत्युच्यते**[1]" । जन्मकालीनचन्द्राधिष्ठितराशिवशेन प्रोक्तशुभाशुभस्थानव्यवस्थितेन ग्रहेण शुभाशुभं यत्फलं कथ्यते तस्य गोचरफलमिति नाम । गोचरफलं चन्द्रात् कथनीयम् । तदुक्तं मन्त्रेश्वरेण –

**सर्वेषु लग्नेष्वपि सत्सु चन्द्रलग्नं प्रधानं खलु गोचरेषु ।**
**तस्मात्तदृक्षादपि वर्तमानग्रहेन्द्रचारैः कथयेत्फलानि**[2] ॥

गोचरफलकथनार्थं शुभाशुभस्थानानां ज्ञानमपेक्षितं वर्तते । एतच्च चन्द्रादिति कृत्वा ग्रहाणामष्टकवर्गे चन्द्राद् यानि शुभाशुभस्थानानि निरूपितानि तान्येव गोचरे प्रोक्तानि । तत्सर्वं सङ्गृहीतं जातकादेशमार्गे–

**सर्वे लाभगृहस्थिताः त्रिखरिपुष्वर्कः कुजार्की त्रिषट्**
**प्राप्तौ त्र्याद्यखमन्मथारिषु शशी खास्तारिवर्ज्यं भृगुः ।**

---

[1] गोचरप्रकरणस्यादौ पीयूषधारायाम् । सारावल्यान्तु "उक्तो हि यवनवृद्धैः अष्टवर्गो निवेदयति पुंसाम् । हेतुं शुभाशुभं वा प्रतिदिवसं सम्भवन्तमिह" ॥ ५२.१ – अत्र प्रतिदिवसभवं फलम् अष्टवर्ग इत्युक्तम् । गोचरेऽपि अन्वयः स्याद् ? ।

[2] फलदीपिका – २६.१

**धीधर्मास्तधनेषु वाक्पतिररिस्वाष्टाम्बुखस्थो बुधः**

**श्रेष्ठो जन्मगृहाद्धि गोचरविधौ विद्धो न चेत्स्याद् ग्रहैः**[1] **॥**

अस्मिन् श्लोके यानि कथितानि तानि शुभस्थानानि । एतान्येव गोचरस्थानानि । अर्थात् शुभस्थानानामेव गोचरपदेन व्यवहारः । तच्चोक्तं प्रश्नमार्गे – "**इष्टस्थानं शिशिरकिरणात् गोचरः स्वाष्टवर्गे**[2]" इति । एभ्यः भिन्नानि स्थानानि अशुभानि भवन्ति । एतान्येव स्थानानि अष्टकवर्गे चन्द्रात् ग्रहाणां शुभस्थानत्वेन प्रोक्तानि । अस्य पूर्वोक्तश्लोकस्य तात्पर्यमेतत् । चन्द्राद् अर्थात् स्वजन्मराशितः तृतीय-षष्ठ-दशम-एकादशेषु स्थानेषु सञ्चरन् रविः इष्टप्रदो भवति । चन्द्रस्तु लग्न-तृतीय-षष्ठ-सप्तम-दशम-एकादशेषु, कुजशनी तृतीय-एकादश-षष्ठस्थानेषु, बुधस्तु द्वितीय-चतुर्थ-षष्ठ-अष्टम-दशम-एकादशेषु, गुरुः द्वितीय-पञ्चम-सप्तम-नवम-एकादशेषु, शुक्रश्च लग्न-द्वितीय-तृतीय-चतुर्थ-पञ्चम-अष्टम-नवम-एकादश-द्वादशेषु स्थानेषु गोचररीत्या सञ्चरन् इष्टदो भवति । **शनिवद्राहुर्ज्ञेयः** इति वचनाद् राहोरपि शनिवदेवायं विषयः, राहोः उपलक्षणात् केतोरपि । प्रश्नमार्गेऽपि "**फणिकेत्वोर्विंद्याद् वेधत्रितयं शनैश्चरवत्**[3]" इत्युक्तम् ।

यथा गोचरस्थानानि भवन्ति तथैव वेधस्थानान्यपि कथितानि । तच्च प्रश्नमार्गे –

[1] जातकादेशमार्गः ११.१

[2] प्रश्नमार्गः २२.३१

[3] प्रश्नमार्गः २२.४६

 ISSN – 2249-538X

"भ्रातृशुभावृत्वन्त्यौ खाब्धी लाभात्मजौ च जन्मर्क्षात् ।
अर्कस्य वेध्यवेधकराशिद्वन्द्वानि कथितानि ॥
जन्मसुतौ ब्रातृशुभौ रिपुव्ययौ सप्तमकुटुम्बौ ।
दशमाब्धी भवमृत्यू प्राग्वद्द्वन्द्वानि शीतांशोः ।
भ्रात्रन्त्यौ षष्ठगुरू भवात्मजौ भौममन्दयोः कथितौ ॥
स्वसुतौ बन्धुतृतीयौ रिपुधर्मौ अष्टमात्मानौ ।
आज्ञामृती भवान्त्यौ प्राग्वद्द्वन्द्वानि सौम्यस्य ॥
स्वान्त्यौ सुतसुहृदौ गुरुखौ मदसहजौ भवाष्टमौ च गुरोः ।
आद्यायुषी स्वकामौ त्र्याद्यौ बन्ध्वास्पदौ तनयधर्मौ ॥
रन्ध्रसुतौ धर्मायौ भवत्रिकौ व्ययरिपू भृगुसुतस्य ॥"[1] इति ।

तदेवं सङ्ग ह्यतेकोष्ठके –

<table>
<tr><th>ग्रहः</th><th colspan="9">ग्रहाणां गोचरस्थानानि तथा वेधस्थानानि</th></tr>
<tr><td rowspan="2">रविः</td><td>गोचरस्थानानि</td><td colspan="2">३</td><td colspan="2">६</td><td colspan="2">१०</td><td colspan="2">११</td></tr>
<tr><td>वेधस्थानानि</td><td colspan="2">९</td><td colspan="2">१२</td><td colspan="2">४</td><td colspan="2">५</td></tr>
<tr><td rowspan="2">चन्द्रः</td><td>गोचरस्थानानि</td><td>१</td><td colspan="2">३</td><td>६</td><td>७</td><td colspan="2">१०</td><td>११</td></tr>
<tr><td>वेधस्थानानि</td><td>५</td><td colspan="2">९</td><td>१२</td><td>२</td><td colspan="2">४</td><td>८</td></tr>
<tr><td rowspan="2">कुजः, शनिः, राहुः,</td><td>गोचरस्थानानि</td><td colspan="3">३</td><td colspan="2">६</td><td colspan="3">११</td></tr>
<tr><td>वेधस्थानानि</td><td colspan="3">१२</td><td colspan="2">९</td><td colspan="3">५</td></tr>
</table>

[1] प्रश्नमार्गः २२.४२-४५

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| केतुः | | | | | | | | | | |
| बुधः | गोचरस्थानानि | २ | ४ | ६ | ८ | १० | ११ | | | |
| | वेधस्थानानि | ५ | ३ | ९ | १ | ८ | १२ | | | |
| गुरुः | गोचरस्थानानि | २ | ५ | ७ | ९ | ११ | | | | |
| | वेधस्थानानि | १२ | ४ | ३ | १० | ८ | | | | |
| शुक्रः | गोचरस्थानानि | १ | २ | ३ | ४ | ५ | ८ | ९ | ११ | १२ |
| | वेधस्थानानि | ८ | ७ | १ | १० | ९ | ५ | ११ | ३ | ६ |

| | | | | |
|---|---|---|---|---|
| शुक्लपक्षीयः | गोचरस्थानानि | २ | ५ | ९ |
| चन्द्रः | वेधस्थानानि | ६ | ४ | ८ |

पूर्वोक्तवत् रविः चाररीत्या चन्द्रात् तृतीय-षष्ठ-दशम-एकादशस्थानेषु सञ्चरन् शुभदो भवति। किन्त्वयं नियमः सापवादः। यतः एतेषां शुभस्थानानां वेधस्थानानि कथितानि । उक्तानां तृतीयादिशुभस्थानानां क्रमेण नवम-द्वादश-चतुर्थ-पञ्चमस्थानानि वेधस्थानानि उक्तानि। उदाहरणार्थं यदा रविः स्वेष्टे तृतीये सञ्चरति तदैव तृतीयस्य वेधस्थाने नवमे अन्यः कोऽपि ग्रहः सञ्चरति चेत् तृतीयस्थाने सञ्चरता रविणा दीयमानानि शुभानि विद्धानि भवन्ति। अर्थात् नवमे स्थितो ग्रहः तृतीयस्थितस्य रवेः शुभफलं स्थगयति। न केवलमेतावता। शुभोऽपि रविः विद्धः सन् शुभस्थाने एव अशुभफलदाता भवतीति विशेषः। एवं तृतीये शुभेऽपि स्थाने स्थितः रविः नवमे वेधस्थाने ग्रहरहिते सत्येव शुभदो भवति । ग्रहसाहित्ये वेधराशौ

 ISSN – 2249-538X

ग्रहस्थितिकालपर्यन्तमपि अशुभफलमेव प्रयच्छति । एवं रवेः षष्ठादिषु स्थानेष्वपि वेधराशौ ग्रहराहित्ये एव शुभफलम् । ग्रहसाहित्ये अशुभमेव । अन्येषामपि अनेनैव क्रमेण गोचरफलं परिचिन्तनीयम् ।

अत्र चिन्तामणिकारः चन्द्रस्य शुक्लपक्षे विशेषमाह "**द्विकोणे शुभदः सितेऽब्जः**[1]" इति । शुक्लपक्षीयचन्द्रस्य पूर्वोक्तस्थानैः सह द्वितीय-पञ्चम-नवमानि शुभत्वेन परिगणनीयानि । एतेषामपि क्रमेण षष्ठ-चतुर्थ-अष्टमानि वेधस्थानत्वेन कीर्तितानि नारदेन । तदेवम् –

**शुक्लपक्षे शुभश्चन्द्रो द्वितीयनवपञ्चगः । रिपुमृत्व्यम्बुसंस्थैर्न विद्धो गगनेचरैः ॥**

शुभचन्द्रस्य, बुधस्य, शुक्रस्य च यानि प्रोक्तानि गोचरस्थानानि तेषु कानिचन वेधस्थानत्वेनापि कीर्तितानि । चन्द्रस्य षष्ठं स्थानं, बुधस्याष्टमं, शुक्रस्य च लग्न-तृतीय-पञ्चम- नवम-एकादशस्थानानि गोचरत्वेन, वेधराशित्वेनापि कीर्तितानि ।

यद्यपि गोचरस्थानानि शुभानि, अन्यान्यशुभानि । वेधस्थानानि अशुभेषु भवितुमर्हन्ति किन्तु वेधस्थानानि अशुभानीति वा अशुभस्थानान्येव वेधस्थानानि भवेयुरिति वा नास्ति नियमः । अत्र चन्द्रबुधशुक्राणां वेधस्थानानि गोचरतः शुभानीत्यपि कीर्तितानि । एतेभ्यः भिन्नानामन्येषां ग्रहाणां तु वेधस्थानानि अशुभेष्वेव पतितानीति सन्देहो नास्ति । तथापि शुक्रस्यापि प्रोक्तवदेव शुभाशुभानि ज्ञेयानि । अर्थात् गोचरस्थानानि शुभानि, अन्यान्यशुभानीति । एवं कृते उक्तेषु नवसु स्थानेषु शुक्रः शुभः । पुनः

[1] मुहूर्तचिन्तामणिः ४.४

अवशिष्टेष्वपि त्रिषु वक्ष्यमाणेन विपरीतवेधेन शुभो भवितुमर्हति । अतः अन्यत्र वेधस्थानेषु विपरीतवेधविचारानर्हत्वमिति ।

गुरोर्विषये तु लग्नं षष्ठं च गोचरे वा वेधे न पठिते । तथापि एतद्द्वयं शुभमिति पीयूषधारायां प्रोक्तम्[1] । एवमेतावद् यः प्रोक्तः वेधविधिः अस्य वेधः, क्रमवेधः, क्रमिकवेधः, दक्षवेधः इत्यपि नाम । पुनः वामवेधाख्योऽपि उक्तः । तस्य प्रतीपवेधः, विपरीतवेधः इत्यपि नामान्तरे वर्तेते । तेतत्सर्वं सुष्ठु प्रत्यपादि प्रश्नमार्गे –

**इष्टस्थानं शिशिरकिरणात् गोचरः स्वाष्टवर्गे**
**विद्धोऽत्रस्थो न खलु शुभकृद्वेधसंस्थेऽन्यखेटे ।**
**वेधर्क्षस्थो वितरति शुभं गोचरे वेध्यराशौ**[2]
**खेटोऽन्यश्चेदिति निगदितौ वेधवामाख्यवेधौ**[3] **॥**

पूर्वं क्रमवेधः प्रोक्तः । विपरीतवेधस्तु एवं भवति । स्वीये वेधराशौ ग्रहे सति तस्य वेधराशेः गोचरे अन्यग्रहागमनेन वेधराशिस्थग्रहो विद्धो भवति । अस्य वामवेधः इति नाम । यथा गोचरे ग्रहे सति तद्वेधस्थाने अन्यग्रहसत्त्वे शुभाभावः तथैव स्वस्य वेधराशौ सञ्चरन् ग्रहः वेध्यराशौ अर्थात् गोचरे अन्यग्रहस्थित्या स्वीयमशुभं हित्वा शुभमेव ददाति । एतदेवोक्तं रामदैवज्ञेन **"दुष्टोऽपि खेटो विपरीतवेधात् शुभः**[4]**"** इति[1] । एवं विपरीतवेधेन अशुभदा अपि

---

[1] "तत्र तु प्रथमषष्ठस्थानस्थो गुरुः शुभ एव" – मुहूर्तचिन्तामणेः पीयूषधाराख्यव्याख्यायाम् – ४.४

[2] गोचरे शुभराशिरेव वेध्यराशिः । वेधराशिरेव वेधकराशिः ।

[3] प्रश्नमार्गः २२.३१

[4] मुहूर्तचिन्तामणिः ४.४

 ISSN – 2249-538X

ग्रहाः शुभदाः, दक्षवेधेन शुभा अपि अशुभाः भवन्तीत्यतः गोचरे वेधविधेः महत्त्वं वरीवर्ति। तथाह श्रीपतिः -

**"ये विदन्ति खचरव्यधक्रमं नो ग्रहक्रमविदोऽपि गोचरे।**

**ते मृषावचनभाषिणो जना यान्ति हास्यमपकीर्तिलाञ्छिताः[2]"॥**

पूर्वोक्तरीत्या विपरीतवेधे शुक्रस्य अशुभस्थानेषु षष्ठसप्तमदशमेषु द्वादश-द्वितीय-चतुर्थस्थानस्थग्रहजनितवामवेधेन शुभत्वमेव । पुनश्च वेधे वामवेधे च अयं नियमः समाश्रयणीयः। स च जातकादेशमार्गे –

**"अर्कार्की सोमसौम्यौ द्वावन्योऽन्यं न च विध्यतः[3]"॥**

अस्य तात्पर्यन्तु शनिदिवाकरयोः, बुधचन्द्रमसोश्च पारस्परिको वेधः न शास्त्रविहितः। **"न पितृपुत्रयोर्वेधः"** इति परिनिष्ठितोऽर्थः।

एवं द्विविधे वेधे सति केचन तद्गणनां चन्द्राधिष्ठितराशितः इति, केचन ग्रहाधिष्ठितराशितः इत्यपि वदन्ति[4] । नारदादयः क्रमवामाख्योभयवेधेऽपि जन्मतः इति वदन्ति । कश्यपादयः यत्र स्थितेन ग्रहेण अभीष्टग्रहो विद्धो भवति तत्स्थानं ग्रहाक्रान्तराशितः इति ऊचुः । क्रमिकवेधः जन्मतः, वामस्तु अधिष्ठितराशितः इति स्वमतं प्रकाशयति

[1] "अज्ञात्वा द्विविधं वेधं यो ग्रहज्ञो बलं वदेत्। स मृषावचनाभाषी हास्यं याति जनैः सदा" इत्यनेन चिन्तामणिव्याख्यास्थितेन नारदकश्यपयोर्वचनेन विवाहादिसंस्कारे गुरुबलान्वेषणे च वेधविधिः अनुसर्तव्यः इति भाति।

[2] रत्नमाला १०.९

[3] जातकादेशमार्गः ११.१२

[4] "स्वजन्मराशेरिह वेधमाहुरन्ये ग्रहाधिष्ठितराशितः सः। हिमाद्रिविन्ध्यान्तर एव वेधो न सर्वदेशेष्विति काश्यपोक्तिः"॥ मुहुर्तचिन्तामणिः ४.५। किन्तु प्रश्नमार्गे, विद्यामाधवव्याख्याने माधवपुत्रेण विष्णुना च प्रोक्तत्वात् दक्षिणेऽपि अङ्गीकर्तव्यम्।

पीयूषधाराकारो गोविन्दः ।

एवं विहितं वेधविधिं सम्यग्विज्ञाय गोचरफलं कथयेत् । पुनश्च

**राशेरादिगतौ शुभाशुभफलाद्यर्कासृजौ यच्छतो**

**मध्यस्थौ गुरुभार्गवौ शशिशनी प्रान्ते बुधः सर्वदा ।**

**दुःस्थः सौम्यनिरीक्षितोऽशुभफलं सुस्थश्च पापेक्षितः**

**नो पूर्णं विहगः करोति शुभमप्यात्मोदितं देहिनाम्**[1] **॥**

**अनिष्टभावस्थितखेचरेन्द्रः स्वोच्चस्वगेहोपगतो यदि स्यात् ।**

**न दोषकृच्चोत्तमभावगश्चेत् पूर्णं फलं यच्छति गोचरेषु ॥**

**ग्रहेश्वरास्ते शुभगोचरस्था नीचारिमौढ्यं समुपाश्रिताश्चेत् ।**

**ते निष्फलाः कित्वशुभाङ्कसंस्थाः कष्टं फलं संविदधत्यनल्पम्**[2] **॥**

इत्युक्तविषयान्, तथा जन्मकाले ग्रहस्य शुभासत्त्वमित्यादिकं सर्वं समग्रतया विचार्य फलं कथनीयं भवति ।

एतदेव आह संहितायां मिहिरः -

“रविभौमौ पूर्वार्धे शशिसौरौ कथयतोऽन्त्यगौ राशेः । सदसल्लक्षणम् .....” ॥

आदौ यादृक् सौम्यः पश्चादपि तादृशो भवति.... ॥

---

[1] प्रश्नमार्गः २२.२२,४०.

सारावल्यामपि “स्वर्क्षस्वोच्चसुहृद्गृहेषु सुतरां शस्तं त्वनिष्टं समं स्वोच्चस्वामिगता दशापतिबलाद्धन्त्यष्टवर्गोद्भवम्” - ५२.९

[2] फलदीपिका २६.३१,३२ ; संहितायामप् – १०३.५२-५३ – “अशुभनिरीक्षतः शुभफलो बलिना बलवान् अशुभफलप्रदश्च शभदृग्विषयोपगतः । अशुभशुभावपि स्वफलयोर्व्रजतः समताम् .... :, “नीचेरिभेऽस्ते चारिदृष्टस्य सर्वं वृथा यत् परिकीर्तितम् । पुरतोऽन्धस्येव कामिन्याः सविलासकटाक्षनिरीक्षणम्” ॥ नीचादिषु अरिदृष्टे शुभं न भवति, अशुभमेव सिद्ध्यति ।

 ISSN – 2249-538X

आर्याणामपि कुरुते विनाशमन्तर्गुरुर्विषमसंस्थः .... षष्ठे दृष्टः स सर्वलघुतां जनं नयति[1] ॥

पुनश्च "**उपचयगृहमित्रस्वोच्चगाः पुष्टमिष्टं त्वपचयगृहनीचारातिगैर्नेष्टसम्पत्**[2]" इत्यष्टकवर्गे च ।

पुनश्चात्र मिहिरेण संहितायामन्ये नियमाः विशेषतः अभ्यधायि ।

**सूर्यसुतोऽर्कसमफलः चन्द्रसुतः छन्दतःसमनुयाति यथा ॥**
**सौरोऽर्करश्मियोगात् सविकारो लब्धवृद्धिरधिकतरम् ।**
**पित्तवदाचरति नृणां पथ्यकृतां न तु तथार्याणाम् ॥**
**यादृशेन ग्रहेणेन्दुर्युक्तः तादृग्भवेत्सोऽपि ।**
**मनोवृत्तिसमायोगाद्विकार इव वक्त्रस्य**[3] **॥**

शनिः रविसमानफलः, बुधः सौम्ययुक्तः सौम्यवत्, पापयुक्तः पापवदाचरति । शनिरस्तङ्गतः रवेः किरणोपतापात् पित्तं यथा आचरति अर्थात् लब्धवद्धिः अधिकतया अशुभफलं ददाति । चन्द्रोऽपि बुधवत् पापयुतः पापफलः, शुभयुक्तः शुभफलदो ज्ञेयः ।

---

[1] बृहत्संहिता १०३.४९-५१ । शुक्रस्यापि अत्रैव ग्रहणम् ।

[2] बृहज्जातकम् ९.८, यदि अत्रोक्तस्वोच्चादिस्थितिः चारविषया तर्हि सर्वस्यापि तद्ग्रहस्थितेः सामान्यत्वात् फले विशेषो न स्यात् । अतोऽत्रैवाह भट्टोत्पलः "शास्त्रेषु यानि वाक्यानि उच्चादिसंस्थानां शुभाशुभफलप्रवृत्तिप्रदर्शकानि तानि जन्मसमये ज्ञेयानि । यानि च शुभानामशुभानां वा फलानि ग्रहवशेनैव पुष्टिप्रदर्शकानि तानि चारवशात्फलदानकाले ग्रहस्य ज्ञेयानीति" । यदि चारविषया तर्हि बृहज्जातके "स्वोच्चत्रिकोणस्वसुहृद् ...[2]" इत्युक्तभावचिन्तनक्रमोऽपि गोचरे आश्रयणीयः इति में भाति । दशाध्याय्यान्तु "अत्र चारवशान्निरूपणीयोऽर्थो व्याख्यायते" इति चारपरार्थोऽत्र व्याख्यातः ।

[3] बृहत्संहिता १०३.५४-५६

पुनश्च गोचरस्य कथने अष्टवर्गस्यापि आश्रयणीयता अस्त्येव[1] । गोचरस्तु[2] चन्द्राद्ग्रहाणामिष्टानिष्टस्थानमाश्रित्य कथ्यते, अष्टकवर्गे तु लग्नसहितग्रहेभ्यः तत्तद्ग्रहेष्टस्थानानि पृथक् पृथक् कथ्यन्ते । उभयत्रापि सामान्यं जन्मकालिकग्रहस्थित्या इष्टानिष्टस्थानानि कल्प्यन्त इति । पुनश्च फलनिरूपणार्थम् इदानीन्तनग्रहाः समाश्रिता इति । तर्हि सप्तबिन्दुगतराशौ चन्द्रात् द्वितीये सञ्चार्यमाणे शनैश्चरे अष्टवर्गफलं भवति "**गिरिबिन्दुगृहे धनाढ्यः**[3]" इति । गोचरफलं भवति "**पुत्राद्यैः स्वजनैर्धनैश्च विगमः दूराटनं वा भवेत्**[4]" इति । एवं धननाश-धनप्राप्तिरूपसदृशफलयोः युगपत्सिद्धिः । तर्हि किं वक्तव्यमिति चिन्तनीयम् । **"एकग्रहस्य सदृशे फलयोः ......[5]"** इति नियमस्तु अस्त्येव इति चेत् बिन्दुद्वयफलं शनेः सारावल्यां "**लब्धोद्वेगरुजः**[6]" इत्यशुभम्, किन्तु इदं स्थानं चन्द्रात् एकादशमिति कृत्वा "**लाभस्थेऽन्यवधूसमागमधनायानप्रतापोदयाः**[7]" इति शुभम् इत्येवं विरोधः[8], एवं विरोधरूपफलसत्त्वेऽपि अष्टकवर्गं तारतम्यचिन्तनार्थम् उपयोजयेदिति

---

[1] यतः वराहोक्तिः "अधिकफलविपाकं जन्मभात् तत्र दद्युः" बृहज्ज्ञातकस्य अष्टकवर्गे ।

[2] गोचरो भिन्नः, अष्टकवर्गोऽन्यः । प्रायः ग्रन्थेषु अध्यायद्वयं पार्थक्येन भवति । अष्टवर्गाद् भावफलमपि चिन्त्यते ।

[3] जातकपारिजातः १०.३२

[4] प्रश्नमार्गः २२.१८

[5] बृहज्ज्ञातकम् ८.२३ । अष्टवर्गे असदृशयोरपि नाशो वाच्य इति भट्टोत्पलः । शुभाशभयोः अन्तरे यदवशिष्टं शुभं वाप्यशुभं तत्कथनीयं भवति ।

[6] सारावली ५४.९

[7] प्रश्नमार्गः २२.२१

[8] "अष्टकवर्गे शुभाशुभविरोधे तु असदृशफलयोरपि नाशो वक्तव्यः, अधिकस्य परिपाको वक्तव्यः" इति भट्टोत्पलः । बृहज्ज्ञातकव्याख्या ९.८

 ISSN – 2249-538X

मम मतिः । अशुभराशौ शुभबिन्द्वाधिक्ये अशुभह्रासः, शुभराशौ अशुभबिन्द्वाधिक्ये शुभह्रासः इत्यादिकं चिन्त्यम्[1] । एवं गोचरफलनिरूपणे अष्टकवर्गोऽप्याश्रयणीयः । दशाध्याय्यामपि "**अधिकफलविपाकमिति ग्रहचारेण वा दशायां चेष्टं फलम्, अष्टकवर्गेण चेष्टं चेत्तद्विशेषाच्छुभमेव भवति । उक्तविपरीतभावे विशेषादशुभमेव भवति**[2]" इत्याद्युक्तम् ।

पूर्वोक्तवत् अदृढदृढदृढादृढभेदवति पाके दृढं दशाभिः दृढादृढं योगेन, अदृढम् अष्टकवर्गगोचरैः निरूपयेत् इति जातकसूक्ष्मसङ्ग्रहः । अत्र सत् असत् सदसत् इति त्रिविधं कर्म एतैः दशादिभिः निरूपणीयमित्यस्ति, तत्कर्मस्वरूपस्य अस्फुटत्वात् तन्नोच्यते । अवश्यम् अनुभावि फलं दृढं भवति[3] । तच्च दशाभिश्चिन्त्यम् । **दशाफलं सर्वफलं नराणाम्**[4] इत्यतः भावस्थानालोकोद्भवानि यानि फलानि तानि सर्वाण्यपि फलानि दशायामेव भवितुमर्हन्ति । अष्टकवर्गोऽपि दशाकाले दीयमानफलस्य प्राप्तिकालनिर्देशे साह्यमाचरति । एवं चेत् गोचरफलं पृथक् कथं चिन्त्यते इति प्रश्नः समुदेति ।

---

[1] फलदीपिकायामप् "यत्राष्टवर्गेऽधिकबिन्दवः स्युस्तत्र स्थितो गोचरतो ग्रहेन्द्रः । तद्वत्फलं प्राह शुभं व्ययारिरन्ध्रस्थितो वापि शुभं विधत्ते" ॥ २६.४१

[2] बृहज्ज्ञातकस्य दशाध्यायीव्याख्या – ९.८.

विद्यामाधवीये "एवमुक्तगोचरफलं ग्रहाणां तत्तद्राशिसङ्क्रमणकालचन्द्रताराबलानुगुण्येन योज्यम् । तच्च वेधाष्टकवर्गाभ्यां तदनुगुणमवसेयम् ........" इत्याद्युक्तम् - १५.१२ ।

[3] विद्यामाधवीयव्याख्याने विष्णुशर्मकृते तु "तत्र दशापाकादिजः स्थिरः, गोचराष्टवर्गाद्यस्थिरं, दशारिष्टादि मिश्रम् । तत्र स्थिरम् अवश्यं भोक्तव्यं शान्त्याद्यसाध्यम् । मिश्रं तु शुभयोगदर्शानाद्यनुग्रहे शान्त्यादि साध्यं भवति । अस्थिरं तु शान्त्यादि साध्यं भवति । तस्मात् गोचरेणानिष्टो ग्रहः स्वपूजादिभिः शान्त इष्टं ददाति" १५.१२

[4] जातकपारिजातः १८.२

अतः गोचरफलमपि दशायामेव अन्तर्भवतीति[1] । अत्र रुद्रोक्तम् **"दृढकर्मनिमित्तानि फलानि दशान्तर्दशादिभिर्निर्देश्यानि । अदृढकर्मनिमित्तानि अष्टकवर्गगोचरफलानि तदविरोधेन तत्र तत्र निर्देश्यानि । परस्पराविरोधे तु द्विविधान्यपि सम्भवन्ति । परस्परविरोधे तु दशाफलान्येव प्रबलानि**[2]" इति । अतः दशाफलमेव प्रबलं भवति । तदनुरोधेन युक्त्या गोचरफलं योजयेत् । इष्टदशासु अनिष्टगोचरफलम् अधिकतया न सम्भवति, तथा अनिष्टदशासु इष्टगोचरफलम् अधिकतया न सम्भवतीति भावः । तदेव स्फुटीचकार मिहिरः संहितायाम् –

**अपि कालमपेक्ष्य च पात्रं शुभकृद्विदधात्यनुरूपम् ।**
**न मधौ बहु कं कुडवे वा विसृजत्यपि मेघवितानः**[3] ॥

यः शुभफलदाता ग्रहः स पुरुषस्य कालमर्थात् दशां, पुनः पुरुषमप्यपेक्ष्य तदनुरूपं फलं ददाति । अर्थात् शुभदशायां ग्रहगोचरफलानि शुभानि भवन्ति । अथवा पुरुषस्य यस्य यत् शोभनं फलं सम्भाव्यते तस्यैव शुभं प्रयच्छन्ति, नापात्रस्य । यथा - वसन्तर्तौ घनसमूहः जलं विसृजति । पात्रे कुडवे नाधिकं

---

[1] सत्याचार्यमतेन पाके द्वैविध्यात् गोचरस्यापि तत्रान्तर्भावो न दोषः । अत्र दशा-नैसर्गिकभेदेन द्वेधा पाकः । वराहमते तु त्रैविध्यमिति रुद्रः अष्टकवर्गान्त्ये श्लोके । पूर्वोक्तपाकद्वये अष्टकवर्गं योजयित्वा त्रिधा पाक इति । भाविफलस्वरूपाणि कादाचित्कानि कालानुगुणतया फलन्ति नैसर्गिकानीति तन्मतम् ।

[2] बृहज्जातकस्य रुद्रविवरणम् – ९.८ । अस्मिन्नेव भागे अपूर्वार्थप्रकाशिकायामपि "दशावशात् गोचरफलं विशेषतः चिन्त्यम् । परत्वेऽपि दशाफलविरुद्धस्य गोचरफलस्य असिद्धिश्च सूचिता । एवं दशागोचरयोः परस्पराविरोधे एकस्य फलमितरो विशिनष्टि । परस्परविरोधे तु दशाफलस्यैव प्राबल्यम् । गोचरग्रहस्य दशाकालाकाङ्क्षित्वमुक्तमाचार्येण संहिताया – अपि कालमपेक्ष्य ........" ।

[3] बृहत्संहिता १०३.४६

 ISSN – 2249-538X

वर्षति। तथा प्राप्तमपि जलं वसन्तकाले न पर्याप्तं भवति। एवमेव दशासु अन्वयः कार्यः। सारावल्यामपि "**दशापतिबलाद्धन्त्यष्टवर्गोद्भवम्**[1]" इति दशाफलस्यैव प्राधान्यं दत्तम्। मिहिरोऽपि यात्रायां "**प्रायशो न बहुसम्मतं त्विदं स्थूलमार्गफलदो हि गोचरः**[2]" इति गोचरफलस्य स्थूलत्वं प्रतिपादितवान्। संहितायामपि गोचरफलकथनारम्भे मिहिरः "**प्रायेण गोचरो व्यवहार्यः**[3] **अतस्तत्फलानि वक्ष्यामि**[4]" इति गोचरस्य व्यवहारविषयत्वं वदति।

एवं गोचरस्य प्रसिद्धिकारणमप्यत्र मिहिरभट्टोत्पलवचनाभ्यां व्यक्तं वर्तते। वराहकाले एव इदं गोचरफलं व्यवहारे आसीदिति ज्ञायते। यद्यपि गोचरस्यैव प्राधान्यं दत्त्वा फलनिर्देशः अशास्त्रीयः। किन्तु तत्त्याज्यं न। तदपि स्वीकृत्य आदेशः कार्यः। दशानां तत्प्रभेदानाञ्च सौक्ष्म्यं, तत्फले अज्ञानं, गोचरस्य सुलभतया शास्त्रज्ञानं विनापि फलकथनसौलभ्यं, चिन्तनानिरपेक्षता चेत्यादि अस्य प्राधान्ये हेतुभूतास्सन्ति। दशायाः

[1] सारावल्यां गोचरप्रकरणम् - ५२.९

[2] यद्यपीदं वचनं बृहज्ज्ञातकस्य भट्टोत्पलटीकातः स्वीकृतम्, अपूर्वार्थेऽप्यस्ति। मया प्राप्ते योगयात्रापुस्तके एतन्नोपलब्धम्। मिहिरेण अष्टवर्गफलानि यवनेश्वरादिवत् नाभिहितानि। अष्टवर्गे केवलं स्थाननिर्देशेने शुभाशुभत्वमेवोक्तम्। किन्तु प्रधानम् अष्टवर्गफलं हित्वा केवलं चन्द्रात् फलानि कथितानि। अस्माद् एतद् ज्ञायते – अष्टवर्गः यत् फलं पोषयति तदेव वक्तव्यमिति। अर्थात् अष्टवर्गवशात् गोचरफलं चिन्त्यम्। इदं गोचरफलं मिहिरेणोक्तं चेदपि परमतेन अङ्गीकृत्य उक्तमिति भट्टोत्पलः कथयति (बृहज्ज्ञातकस्य अष्टकवर्गे)।

[3] व्यवहार्यो व्यवहारविषयः (वाचस्पत्ये)।

[4] बृहत्संहिता - १०३.२. प्रायेण बाहुल्येन, यः कश्चिल्लोके ग्रहसंस्थां पृच्छति, अतो गोचरफलानि कथ्यन्त इति भट्टत्पलस्य विवृतिः।

अन्तर्दशाविदशादिभेदेन फलनिरूपणं न सुलभसाध्यम् । केवलं नक्षत्रसूची अपि गोचरफलकथने समर्थो भवतीति गोचरस्य प्राधान्यं लब्धं वर्तते ।

किन्तु गोचरफलानां त्याज्यत्वं न मया कथ्यते । तत्रापि विशिष्य शनेः फलम् अनुभवे प्राप्यते । प्रश्नमार्गे च उक्तम् "**द्वादशजन्माष्टमगाः पुंसां दिननाथभौमशनिजीवाः । वित्तक्षयं प्रवासं रोगान् जनयन्ति मरणभीतिं वा**"[1] ॥ गुरोः गोचरस्थितिः फलसम्भवकालनिरूपणे सहायकानि । पुनश्च "**लग्नं वा फलदातृगेहमथवा ....**[2]" इत्यादिना रविचन्द्रफलदातृग्रहैः गोचररीत्या फलदानकालो विचिन्तितः । अत्रोक्तः क्रमः बृहज्ञातकस्य "**अभिलषद्भिरुदयर्क्षमसद्भिः ........**"[3] इत्यादिना प्रोक्तस्य आहितगर्भायाः स्त्रियाः मृत्युलक्षणेन सदृशः वर्तते । पुनश्च प्रश्नमार्गे तु निर्याणशन्यादिभिः मरणकालोऽप्यभिहितः[4] । बृहज्ञातके "**कुजेन्दुहेतुप्रतिमासमार्तवम्......**"[5] इत्यादिना प्रोक्तस्य गर्भाधानक्षमस्य आर्तवस्य, गर्भाधानकालस्य च विज्ञानं तात्कालिकग्रहगोचरवशाद्भवति अर्थात् गोचरान्निरूप्यते । अरिष्टोक्तकालनिर्णयक्रमः "**योगे स्थानं गतवति बलिनः ....**" इत्येतदपि गोचरफलं कथयति । एतत् सर्वं वराहाद्युक्तगोचरफलस्थानानि नाम गोचरस्य उपयोगिता एषु स्थलेष्वपि भवति इति । पुनश्च ग्रहानुकूल्यं गोचरद्वारैव

---

[1] प्रश्नमार्गः १०.५६ (अत्र बहवः श्लोकाः गोचरपराः सन्ति), विद्यामाधवीये च १५.१२

[2] "लग्नं वा फलदातृगेहमथवा तस्योच्चभं वा यदा यायादिन्दुरिनोऽथवाथ फलदो वाच्यं तदा तत्फलम् । भूते वा समये भविष्यति यदा लग्नस्य पापान्वयः तत्कालेऽशुभमादिशेत् शुभसमायोगे शुभं पृच्छताम्" ॥ - प्रश्नमार्गः १४.८६

[3] बृहज्ञातकम् ४.६

[4] प्रश्नमार्गे दशमे अध्याये ११ श्लोकतः आरभ्य ।

[5] बृहज्ञातकम् ४.१ (रुद्रविवरणमत्र द्रष्टव्यम्)

 ISSN – 2249-538X

चिन्त्यम् । “**वटुकन्याजन्मराशेः त्रिकोणायद्विसप्तगः । श्रेष्ठो गुरः खषट्त्र्याद्ये पूजयान्यत्र निन्दितः**[1]” ॥ इति तदुक्तम् । मिहिरोऽपि “**प्रारब्धमसुस्थितैर्ग्रहैः यत् कर्मात्मविवृद्धये । विनिहन्ति तदेव कर्म तान् ........**” ॥, “**सौस्थित्यमवेक्ष्य यो ग्रहेभ्यः काले प्रक्रमणं करोति राजा । अणुनापि स पौरुषेण ...... याति**” ॥ इति ग्रहानुकूल्यस्य महत्त्वमाह ।

ग्रहे विषसंस्थिते एतानि न कार्याणीत्याह श्रीपतिः –

**अकालचर्यां मृगयां च साहसं सुदूरयानं गजवाजिवाहनम् ।**

**गृहे परेषां गमनं च वर्जयेद् ग्रहेषु राजन् विषमस्थितेषु**[3] ॥

एवं गोचरफलं दशानुगुणं शास्त्रानुगुणञ्च दैवविच्चिन्तयेत् । जनेषु भीतिं न जनयेत् । शास्त्रस्य समाजे हीनतापि न स्यात् । यदि ग्रहचारे दोषो दृष्टः तर्हि परिहारमपि वदेत् । तत्र युक्तं पूजादिकमपि कार्यम् । “**पूजाद्यैर्मुदितः करोति शुभमेवानिष्टगोऽपि ग्रहः**[4]” इत्यनेन पूजादिकेन शुभं प्राप्तुम् अनिष्टं निवर्तयितुं शक्यते । तथा ग्रहाणां रत्नादिधारणेन, धान्यादिदानेनापि ग्रहदोषः शान्तो भवतीति, अनिष्टस्थिताः अपि इष्टदा भवन्तीति ऋषिमतम् । मिहिरोऽप्याह “**शमयोद्गतां पापदृष्टिमपि विबुधविप्रपूजया ।**

**शान्तिजपनियमदानदमैः सुजनाभिभाषणाच्च**[5]” ॥

---

[1] मुहूर्तचिन्तामणिः ५.४६

[2] बृहत्संहिता १०३.५९,६०; संहितायां १०३.५८ - “प्रकृत्यापि लघुर्यच्च वृत्तबाह्ये व्यवस्थितः । स याति गुरुतां लोके यदा स्युः सुस्थिताः ग्रहाः” ॥

[3] रत्नमाला १०.१४

[4] प्रश्नमार्गः २२.२१

[5] बृहत्संहिता १०३.४८ ; जातकादेशमार्गे च ११.१४ – “पूजास्तुतिप्रणतिभिर्मुदिता ग्रहास्ते कुर्वन्त्यनिष्टगतयोऽपि जनस्य लक्ष्मीम्” ॥

एवं अनेकविधफलसत्त्वेऽपि अन्तिमतया “**कालो बलीयान्**[1]” इति न्यायेन स एव सर्वाणि फलानि पाचयतीत्यत्र नास्ति सन्देहः। किन्तु दैवज्ञः शास्त्रोक्तं कथयेत्। “**अथ नृपतिसमीपे दैववित्पृष्टमात्रः फलमुदयनिमित्तैस्तर्कयेच्छास्त्रबुद्ध्या**”। शास्त्रबुद्धि दैवज्ञः शास्त्रदृष्ट्या फलमादिशेत् न तु स्वेष्टतया। अतः गोचरस्य अपवादभूतानि दशाफलानि, गोचरस्य तत्क्रमेणैव उक्तान् अपवादान्, चारस्य जातकानगुणत्वं च मनसि निधाय उक्तप्रकाराणि दशाफलानि दृढकर्मोपार्जितानि गोचरफलान्यदृढकर्मोपार्जितानि कादाचित्कानि नैसर्गिकफलानि दृढादृढकर्मोपार्जितानि प्रायिकाणि त्रिविधान्यपि फलानि सम्यग् विचार्य परस्पराविरोधेन संयोज्य यथाबलं यथानिर्दिष्टं यथासम्भवं यथाकालं च कुशाग्रधिया सांवत्सरेण वक्तव्यानीति शम्।

**आधारग्रन्थाः**


| | |
|---|---|
| बृहज्जातकम् | जातकपारिजातः |
| फलदीपिका | ज्योतिषरत्नमाला |
| बृहत्पराशरहोराशास्त्रम् | मुहूर्तचिन्तामणिः |
| मुहूर्तमाधवी (विष्णुशर्मणो व्याख्या) | प्रश्नमार्गः |
| बृहत्संहिता | बृहद्योगयात्रा |
| सारावली | लघुजातकम् |
| वसिष्ठसंहिता | बृहस्पतिसंहिता |
| मुहूर्तसंहिता | जातकादेशमार्गः |


[1] रुद्रविवरणम्। पुनश्च दशाध्याय्यां “दृढादिकर्मत्रयकालमीश्वरः कालस्वरूपः प्रददाति देहिनाम्” इत्युक्तम् – १.३

# वास्तुशास्त्रानुसारं निर्मितं गृहं पुरुषार्थसाधकम्

**डा. सुधांशुकुमारनन्दा**
संविदाध्यापकः
राजीवगान्धीपरिसरः, शृङ्गेरी

वस्तुतः प्रत्येकस्य शास्त्रस्य अन्तिमं लक्ष्यं भवति मोक्षप्राप्तिः। इदमपि वक्तुं शक्यते चतुवर्गफलप्राप्तये एव शास्त्रस्य प्रवृतिः। प्रसङ्गेऽस्मिन् वास्तुशास्त्रानुमोदितगृहात् चतुवर्गफलप्राप्तिः भवतीति प्रतिपाद्यते। अवसरेऽस्मिन् **वास्तुशास्त्रानुसारं निर्मितं गृहं पुरुषार्थसाधकम्** इति विषयं त्रिधा विभज्यते। यथा वास्तुशास्त्रं किम् ? अस्यानुसारं निर्मितं गृहं कथं भवेत् ? पुनश्च निर्मितं गृहं पुरुषार्थसाधकं भवितुमर्हति वा इति ?

वास्तुशास्त्रं किम् –

वास्तु इति शब्दः वस् धातोः तुण्-प्रत्ययात् निष्पन्नः। तत्र वासोपयोगिस्थलं भवनभूखण्डं वा वास्तु। पुनश्च वसन्त्यस्मिन्निितिवास्तुः, वसन्ति प्राणिनो यत्र वेति। विश्वकर्मणः वास्तुशास्त्रे उच्यते –

**देवतानां नराणां च गजगोबाजिनामपि।**
**निवासभूमिश्शल्पज्ञैर्वास्तुसंज्ञमुदीरितम्।।** मयमतं पश्यामश्चेत् –
**अमर्त्याश्यैव मर्त्याश्च यत्र यत्र वसन्ति हि।**
**तद्व वस्त्विति मतं तज्ञैः.......।।**

अर्थात् निवासयोग्यभूमिः वास्तुः, तत्सम्बद्धं शास्त्रं वास्तुशास्त्रमिति। एवमपि वक्तुं शक्यते यदुपयुक्तस्थानस्य चयनं कृत्वा तदुपरि प्रकृत्यानुकूल्येन

गृहादीनां निर्माणाय मानवः यच्छास्त्रमाश्रयति तदेव वास्तुशास्त्रम्। अस्य स्थापत्यशास्त्रं, शिल्पशास्त्रं, वास्तुशास्त्रं एते पर्यायवाचिनः भवन्ति। अस्य शास्त्रस्य प्रमुखतः अष्टादशप्रवर्तकाः सन्ति। ते यथा –

**भृगुरत्रिर्वशिष्ठश्च विश्वकर्मा मयस्तथा।**
**नारदो नग्नजिच्चैव विशालाक्षः पुरन्दरः।।**
**ब्रह्मा कुमारो नन्दीशः शौनको गर्ग एव च।**
**वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती।।**
**अष्टादशैते विख्याताः शिल्पशास्त्रोपदेशकाः।।**

**वास्तुशास्त्रानुसारं निर्मितं गृहं कथं भवेत् ?**

वास्तुशास्त्रानुगुणं गृहं निर्मातुं उपयुक्तभूमेः आवश्यकता भवति। तस्याः भूमेः चयनं तु शास्त्रीयदृष्ट्या भवेत्। तत्र भूमेः आकारं, प्रकारं, प्लवत्वं च दृष्ट्वा पुनश्च भूमेः परीक्षा गन्धैः, वर्णैः, रसादिभिश्च करणीया। एतदतिरिच्य भूमौ गर्तं कृत्वा तस्य पूरणेन (जलेन मृर्तिकया वा), भूम्यामुत्पन्नैः कुशादिभिः तेषामङ्कुरणेन च भूमिपरीक्षा कार्या। तत्र स्थितैः वृक्षैः च भूम्याः अनुकूलता विचारणीया भवति। भूमेः परीक्षा अनन्तरं शल्यशोधनमपि कार्यम्। तदनन्तरं दिक्साधनं कृत्वा गृहस्य निर्माणार्थं प्रवर्तनीयम्। यतो हि दिक्साधनेन हीनं गृहं बहु अशुभफलं जनयति। उच्यते

**प्रासादे सदनेऽलिन्दे द्वारे कुण्डे विशेषतः।**
**दिङ्मूढे कुलनाशः स्यात्तस्मात्संशोधयेदिशः।।**


ISSN – 2249-538X

भूमिग्रहणावसरे त्याज्या भूमिः न स्वीकरणीया। तर्हि का भूमिः शास्त्रानुसारं त्याज्या भवति ? तदपि द्रष्टव्यम्। अस्याः लक्षणं मनुष्यालयचन्द्रिकायां एवं वर्णितमस्ति यत्

**वृतार्धेन्दुनिभा त्रि पञ्च रस कोणा शूलशूर्पाकृति-**

**र्मत्स्यानेकपकूर्मपृष्ठकपिलावक्त्रो(वक्रो?)पमा मेदिनी।**

**भस्माङ्गरतुषास्थिकेशचितिवल्मीकादिभिः संयुता**

**वर्ज्या मध्यनता सगर्भकुहरा विस्त्रा विदिक्स्थापि च॥**

अनया लक्षणया युक्तां भूमिं विहाय वर्गाकारयुक्ता, आयताकारयुक्ता वा भूमिः स्वीकरणीया। पुनश्च भूमेः प्लवत्वं पूर्वस्यां उत्तरस्यां वा स्यात्। गृहस्य निर्माणावसरे पश्चिमदक्षिणयोरपेक्षया पूर्वस्यां उत्तरस्यां च रिक्तस्थलम् अधिकं भवेत्। बृहद्वृक्षाणां स्थितिः, दीर्घभित्तिः, उच्चत्वं च पश्चिमस्यां याम्यायां वा स्यात्। मुख्यद्वारं तु पूर्वस्यां उत्तरस्यां वा अधिकं शुभदायकं भवति। एवञ्च गृहे यावन्ति द्वाराणि वातायनानि वा भवन्ति, तानि परिमाणेन समानानि भवेयुः।

इतः परं गृहस्य कस्यां दिशि किं करणीयम् तत् शास्त्राधारेण उच्यते

**ऐन्द्र्यां दिशि स्नानगृहमाग्नेयां पचनालयः।**

**याम्यां शयनं वेश्म नैऋत्यां शस्त्रमन्दिरम्॥**

**वारुण्यां भोजनगृहं वायव्यां धान्यमन्दिरम्।**

**भाण्डारसदनं सौम्ये त्वैशान्यां देवतालयम्।**

**इन्द्राग्न्योर्मथनं मध्ये याम्याग्न्योर्घृतमन्दिरम्।**

**यमराक्षसयोर्मध्ये पुरीषत्यागमन्दिरम्।**

**राक्षसजलयोर्मध्ये विद्याभ्यासस्यमन्दिरम्।**

**तोयेशानिलयोर्मध्ये रोदनस्य च मन्दिरम्।।**

**कामोपभोगशमनं वायव्योत्तरयोर्गृहम्।**

**कौबेरेशानयोर्मध्ये चिकित्सामन्दिरं सदा।।**

**गृहं शरीरयोर्मध्ये सर्ववस्तुष संग्रहम्।**

**सदनं कारयेदेवं क्रमादुक्तानि षोडश।।**

**पूर्वम्**

| | | | | |
|---|---|---|---|---|
| देवतागृहम् | सर्ववस्तुसंग्रहगृहम् | स्नानगृहम् | दधिमन्थनगृहम् | पाकशाला |
| औषधगृहम् | | | | घृतगृहम् |
| भण्डारगृहम् | उ | रिक्तस्थलम् | द | शयनगृहम् |
| रतिगृहम् | | | | शौचालयः |
| धान्यगृहम् | रोदनगृहम् | भोजनगृहम् | अध्ययनकक्ष्यः | शस्त्रागारः |

**पश्चिमम्**

**वास्तुशास्त्रानुशारं निर्मितं गृहं पुरुषार्थसाधकं भवितुमर्हति वा ?**

तत्र उच्यते **गृहस्थस्य क्रियास्सर्वा न सिद्ध्यन्ति गृहं विना** इति वास्तुरत्नावलीपुस्तकानुसारं गृहस्थस्य सर्वाः क्रियाः गृहमाश्रित्यैव प्रवर्तन्ते इति हेतोः गृहमनिवार्यं भवति। यतो हि

**स्त्रीपुत्रादिकभोगसौख्यजननं धर्मार्थकामप्रदं**

**जन्तूनां निलयं सुखास्पदमिदं शीताम्बुधर्मापहम्।**

**वापीदेवगृहादिपुण्यमखिलं गेहात्समुत्पद्यते**

**गेहं पूर्वमुशन्ति तेन विबुधाः श्रीविश्वकर्मादयः।।**

अर्थात् इदं गृहं पत्नीपुत्रादिसुखप्रदायकं, सुखसौविध्यनां च जनकं, धार्मिककृत्यानां पुण्यफलस्य च प्रदायकं, धनधान्यादिकानामुपार्जने संग्रहे च सौविध्यकारकम् अपि च पारिवारिकशान्तिप्राप्तेः सहायकं, मनुष्यपशुपक्ष्यादिप्राणिनामाश्रयस्थलम्, पुनश्च सुखप्रदायकमपि भवति, गृहं शीतवर्षाग्रीष्मादिकष्टानाम् अपहर्तृ भवति। वापीकूपजलाशय-देवालयनिर्माणस्य यत्पुण्यं तत्सर्वम् गृहनिर्माणात् समुपलभ्यते। अस्मात् कारणात् श्रीविश्वकर्मादयः विबुधाः सर्वप्रथमं गृहनिर्माणं कथयन्ति। तेन गृहेण पुरुषार्थसिद्धिः कथं जायते इति किञ्चिदालोचयामः।

धर्मार्थकाममोक्षाः पुरुषार्थचतुष्टयं भवति। तेषु धर्मः प्रथमपुरुषार्थः। ध्रियते लोकमनेन इति धर्मः। सम्प्रदायभेदेन प्रचलितस्य आचारस्य पालनमेव धर्मः। यतो हि आचारः परमः धर्मः इति उच्यते। पुनश्च धर्मः कश्चन नियमविशेषः इत्यपि वक्तुं शक्यते। किमपि वा भवतु धार्मिककार्यकलापमाचरितुं गृहमनिवार्यं भवति। तदर्थमुच्यते **गृहस्थस्य क्रियाः सर्वाः न सिध्यन्ति गृहं विना** । परन्तु गृहं तु अपरस्य न स्यात् अर्थात् स्वस्य भवेदित्यभिप्रायः। यतो हि

**परगेहे कृताःसर्वाः श्रौतस्मार्तक्रियादिकाः।**

**निष्फलाः स्युर्यतस्यातां भूमिशः फलमश्नुते।।**

द्वितीयपुरुषार्थः अर्थः। अस्य अर्थस्य सङ्ग्रहस्थलं गृहं भवति। पुनश्च धनाधिपतिः कुबेरः। तस्य आधिपत्यं उत्तरस्यां वर्तते। तदर्थं वास्तुशास्त्रोक्तरीत्या धनसंग्रहणं गृहं उत्तरस्यां क्रियते। तेन कुबेरस्य प्रीतिः एधते। धनधान्यानां च स्थितिः गृहे सुदृढा भवति। तदर्थं गृहं विना एषः पुरुषार्थोऽपि सार्थकतां न भजति।

तृतीय पुरुषार्थः कामः। अस्य अर्थः कामना। कस्य कामना इत्युक्ते विषयभोगस्य। अथवा एवमपि वक्तुं शक्यते विषयतृप्तेः इच्छा कामः। अस्याः इच्छायाः परिपूर्तेः भार्या एव मुख्यं कारणम् आवहति। पुनश्च **भार्यात्रिवर्गकरणं शुभशीलयुक्ता** इति अनया पंक्त्या भार्या एव त्रिवर्गस्य अर्थात् धर्मस्य अर्थस्य कामस्य च कारणं भवति। तया विना एकस्य वर्गस्यापि सिद्धिर्न जायते चतुर्वर्गस्य तु स्पप्नमेव। गृहमेव मानवस्य **स्त्रीपुत्रादिकभोगसौख्यजननं धर्मार्थकामप्रदं** इति वाक्यस्य सार्थकतां कारयति।

**न गृहं गृहमित्याहु गृहिणी गृहमुच्यते** इत्यस्मात् गृहादेव (गृहस्थाश्रमादेव) आश्रमचतुष्टयस्य सृष्टिः। उच्यते

**वानप्रस्थो ब्रह्मचारी यतिश्चैव तथा द्विजाः,**

**गृहस्थस्य प्रसादेन जीवन्त्येते यथा विधिः।**

**गृहस्थ एव यजति गृहस्थस्तप्यते तपः,**

**ददाति च गृहस्थस्य तस्माच्छ्रेयो गृहाश्रमी।।** यदि गृहमेव नास्ति गृहस्थाश्रमस्य परिकल्पना कुतः?

 ISSN – 2249-538X

चतुर्थः पुरुषार्थः मोक्षः। अस्य पुरुषार्थस्य साधनं किञ्चित् कष्टकरं भवति। मोक्षस्यार्थः मुक्तिः, उद्धारः परित्राणो वा। कस्मादित्युक्ते जन्ममृत्युबन्धनचक्रात्। अस्य चक्रस्य स्वरूपं यथा –

**पुनरपि जननं पुनरपि मरणं**

**पुनरपि जननीजठरे शयनम्.....**।। मानवः यदा अस्मात् चक्रात् बहिरागच्छति तदा मोक्षं विन्दति। पुनश्च सुखदुःखफलाननुसन्धानात् मुक्तिः। अथवा बहुषु कर्मणां विधानात् यत् सुकृतं समुपलब्धं तस्य फलस्याननुसन्धानात् मुक्तिः। साधारणतया तु मोक्षस्य स्वरूपम् एवं भवति। वास्तुशास्रे पश्यामश्चेत् –

**चतुवर्गफलप्राप्तिः सलोकश्च भवेद् ध्रुवम्।**

**शिल्पशास्त्रपरिज्ञानान्मर्त्येऽपि सुरतां ब्रजेत्।**

**इदं पवित्रं परमं रहस्यं यः पठेन्नरः।**

**स्यात्तस्यापि तथा वाणी सत्यं सत्यं वदाम्यहम्।।**

अस्याभिप्रायोऽयं यत् वास्तुशास्त्रस्य ज्ञानेन मानवः धर्मार्थकाममोक्षान् प्राप्नोति। इतः चिन्तयितुं शक्यते यत् अस्य शास्त्रस्य ज्ञानेन यदि मानवः एतादृशं फलं प्राप्तुं शक्नोति तर्हि अस्य प्रयोगेन अवश्यं मानवस्य मोक्षप्राप्तिः भवति। शास्त्रे तृणादिभिः गृहनिर्माणस्य फलं एवमुक्तं विद्यते। यथा

**कोटिघ्नं तृणजे पुण्यं, मृण्मये दशसंगुणम्।**

**इष्टिके शतकोटिघ्नं शैलेऽनन्तं फलं गृहे।।**

पुनश्च वास्तुशास्त्रे कर्मणः विभागद्वयमपि परिलक्षते। यथा इष्टकर्म

पूर्तकर्म च। पुनश्च इष्टकर्मणा स्वर्गलाभः, पूर्तकर्मणा मोक्षलाभः इत्यपि उच्यते। तद्यथा

**वितापेक्ष भवेदिष्टं तडागं पूर्तमुच्यते।**
**इष्टेन लभते स्वर्गं पूर्ते मोक्षं समश्नुते।।**
**पूर्तकर्मणः स्वरूपम् एवं भवति यथा**
**वापीकूपतडागादि देवतायतनानि च,**
**पतितान्युद्धरेद्यस्तु सः पूर्तफलमश्नुते।।**

तडागादीनां निर्माणेन जीर्णोद्धारेण च मानवः स्वर्गलोकं प्राप्तुं शक्नोति। यतो हि उत्यते

**यस्तडागं नवं कृत्वा जीर्णं वा नवतां नयेत्।**
**सर्वं कुलं समुद्धृत्य स्वर्गलोके महीयते।।**

वापीदेवगृहादिपुण्यमखिलं गेहात्समुत्पद्यते इत्यादीना गृहनिर्माणेन (वास्तुशास्त्रोक्तविधिना) एव पूर्तकर्मकरणस्य (वापीकूपतडागादिनिर्माणस्य) फलं प्राप्नोति। एवं च उक्तं विद्यते पूर्तेन मोक्षलाभः, तस्मात् सिद्ध्यति मोक्षः। पुनश्च वास्तुशास्त्रानुसारं निर्मितं गृहं पुरुषार्थसाधकम् इति वाक्यं सार्थकं भवति।

**आधारग्रन्थाः**


| | |
|---|---|
| बृहद्वास्तुमाला | वास्तु उद्धारधोरणी |
| समराङ्गणसूत्रधार | मुहूर्तचिन्तामणिः |
| वास्तुरत्नावली | मयमतम् |


***************

# शिक्षायां चिन्तनस्य सर्वोच्चस्थितिविशेषस्तर्कः

**डा. चन्द्रकान्तः**

शिक्षाशास्त्रिविभागाध्यक्षः

राजीवगान्धीपरिसरः, शृङ्गेरी

यदनुमीयते तत्तर्केणापि साध्यते । प्रमाणानामनुग्राहकस्तर्कः । विपक्षनिराकरणपूर्वकं स्वपक्षस्थापनं तर्कः। व्याप्यारोपेण व्यापकारोपस्तर्कः अथवा सिद्धव्याप्तिकयोर्धर्मयोः व्याप्याङ्गीकारेणानिष्टव्यापकप्रसञ्जन-रूपस्तर्कः। यथा यद्यत्र घटोऽभविष्यत्तर्हि भूतलमिवाद्रक्ष्यत् । भूतले तु न दृश्यते अत एव घटोऽत्र नास्ति इति । तथा च पर्वतोऽयं साग्निः उतानाग्निः ? इति सन्देहानन्तरं कश्चित् यदि वदेत् “ अयं पर्वतोऽनग्निः इति । यद्यनग्निरभविष्यत् तर्हि अयमधूमोऽप्यभविष्यत् अनग्निकत्वात् । किन्तु धूमवाँश्चायम् अतः पर्वतोऽयं वन्हिमान् इत्येवंरूपस्तर्कः । तर्क भाषायां – सोऽयं तर्कः प्रतीच्यन्यायशास्त्रे प्रसञ्जितमृषात्वसाधनमित्यभिहितम् । न चैवं विधस्तर्कः अभिमतः शिक्षायां शिक्षाविद्भिः । तथा हि चिन्तनस्य सर्वोच्चस्थितिविशेषः तर्कः इति । एवं चेत् चिन्तनं नाम किमिति चिन्त्यम् । चिन्तनं मनुष्यस्य केवालं ज्ञानात्मकव्यवहाराधारितं नास्ति अपि तु मनुष्यस्य क्रियात्मकभावात्मकयोः व्यवहारयोः आधारितमपि वर्तत इति । क्रियात्मकभावात्मकपक्षाः यदा स्वीक्रियन्ते तदा किञ्चिदुद्देश्यं तत्र निहितं भवति चिन्तने । तेन व्यक्तिगतसमस्यायाः समाधानार्थं थथा चिन्तनशक्तिः प्रयुज्यते तथैव सामाजिकवैज्ञानिक सांस्कृतिकानां समस्यानां

समाधानार्थमपि चिन्तनं प्रयुज्यत एव। यतो हि चिन्तनस्य फलरूपेण लोके कवितायाः, कलाकृतेः, वैज्ञानिकाविष्कारस्य च भूरिशः साक्षात्कारः दृश्यते। तस्मात् मोहिसन् महोदयेन यदुक्तं समस्यानां समाधानसम्बद्धाः केचनाव्यक्ताः मानसिकभावात्मकक्रियात्मकाश्च व्यवहारविशेषा एव चिन्तनमित्यभिधीयत इति तत्सत्यमेव वर्वर्ति।

एवञ्च तर्कोऽपि अव्यक्तक्रियाविशेषः वर्तते यस्य सम्बन्धः समस्यासमाधानेन सह वर्तते इति वक्तव्यमापतति। अतः अनयोः चिन्तनतर्कयोः प्रक्रियासु भेदस्य स्पष्टीकरणं जटिलायते। अतः एव चिन्तनस्य उच्चतमः स्थितिविशेषः तर्के इत्यङ्गीकर्तव्यमापतति।

अपि च तर्कः अथवा तार्किकचिन्तनम् एका जटिला मानसिकप्रक्रिया इति तु अभिमतम् किन्तु तर्के औपचारिकनियमानां अनुसरणम् पालनं वा तियमितरूपेण क्रियते। स्पष्टोमुद्देश्यम् अधिकृत्य संघटितं व्यवस्थितञ्च चिन्तनं एकभिन्नव्यक्तिषु यदा जायते तदा तत् तर्कशब्देन व्यपदिश्यते। तस्मादेव गेरेट् (Garret) महोदयेनोक्तं युक्तियुक्तं वर्तते यत् मस्तिष्के विद्यमानमुद्देश्यं वा लक्ष्यमधिकृत्य सोपानीकृतः चिन्तनस्य सर्वोच्चस्थितिविशेषः एव तर्क इति।

एवञ्च तर्कस्यास्य विशेषताः पट्टीक्रियन्ते यथा

1) तर्कस्य निरिचते लक्ष्योद्दश्ये भवतः।

2) तर्कः उपलक्षितक्रिया वर्तते।

3) तर्के समस्यायाः समाधानं निहितं वर्तते।

4) तर्के पूर्वज्ञानस्य पूर्वानुभवस्य च उपयोगः क्रियते।

 ISSN – 2249-538X

5) तर्के मानसिकान्वेषणं विद्यते।

6) तर्के सङ्केतानां, प्रतीकानां, भाषाणां, ज्ञानांशानाञ्च प्रयोगः क्रियते।

इत्येतासां विशेषतानां सङ्ग्राहेणापि ज्ञायते यत् चिन्तनस्य अन्तिमास्थितिः तर्करूपेण परिणमत इति।

एवञ्च अयं तर्कः द्विविधः निगनात्मकः आगमनात्मक श्चे ति । पूर्वजैर्यथा वादजल्पवितण्डाः प्रोक्ताः तदत्र शिक्षायां न चिन्त्यते । यतो हि शास्त्रे स्वरूपाधारेण प्रकाशाः प्रोक्ताः, शिक्षायां तु शीघ्रफलप्राप्युद्देश्येन प्रक्रियाधारितप्रकारा प्रोच्यन्ते।

निगमनात्मके तर्के व्यक्तिः पूर्वानुभवानां विश्वासानां सिद्धान्तानामाधारेण स्वकीयायाः समस्यायाः समाधानम् एतादृशेन तर्केणासादयति । निगमनस्य वस्तुतः अर्थः सामान्यसिद्धान्तानां स्वीकारेण समाधानान्वेषणम् इति । यथा-सर्वेऽपि प्राणवन्तः नश्वरा इति सामान्यसिद्धान्तः, एनं सिद्धान्तं स्वीकृत्य “रमेशोऽपि कश्चन प्राणिविशेषोऽस्ति अतः नश्वरः इति प्रतिपादनरूपः निगमनात्मकः तर्कः।

अयं तर्कः मुख्यपदार्थः, गौणपदार्थः निष्कर्ष इति त्रिपदान्वितः भवति सर्वदा । उपयुक्तोदाहरणेप्राणवन्तः नश्वराः इति मुख्यपदार्थः, रमेशः एकः प्राणिविशेष इति गौणपदार्थः । रमेशः नश्वरः इति निष्कर्षः । आगमनात्मकस्तर्कः अत्र व्यक्तिः स्वानुभवाधारेण सामान्यं कञ्चन नियमं प्रतिपादयति। अस्मिन् निरीक्षणं प्रयोग तथा सामान्यीकरणमिति प्रक्रियांशाः भवन्ति । व्यक्तिः आदौ तथ्यानामवलोकनं करोति | तदनन्तरं नियमस्य

कल्पनां वा प्रतिपादनं कृत्वा प्रयोगद्वारा कल्पितस्य नियमस्य सत्यापनं करोति। परिणामतः सः नियमः सामान्यीकृतो जायते।

व्यक्तिः प्रपञ्चे जायमानं मानवानां मरणं दृष्ट्वा जन्म प्राप्य सर्वे म्रियन्ते इति नियमं कल्पयति । अस्याधारेण प्रतिपादयति यत् मानवः मरणशीलः विशिष्टपरिस्थितिषु सत्यवचनस्य सामान्यीकृतं सिद्धान्तं प्रतिपादयति इत्युक्तं भवति।

एवं च तार्किकचिन्तनद्वारा व्यक्तिः स्वकीयम् उद्देशं मितव्ययेन व्यवस्थितरूपेण प्रभावपूर्णेन रूपेण, सहजरूपेण च सम्पूरयितुं समर्थो जायते। तस्मादेव कारणात् चिन्तनस्यान्तिमस्थित्यापत्नः क्रियाविशेषः तर्कः इति साधुतां भजते । एवञ्च फलवत् शिक्षणं सम्पादयितुं तर्कः शिक्षणस्य महत्त्वपूर्णः अविनाभूतः विषयविशेषः समजायत इत्यत्र नास्ति संशयः । शिक्षकः छात्राणां तर्कशक्तिविकासार्थं निरन्तरं प्रयतेत यदर्थं एकाग्रता – संलग्नता – आत्मनिर्भरतानिरीक्षणक्षमताश्च अनिवार्येणापेक्षिताः विद्यन्ते । तासां क्षमतानां विकासेन तर्कशक्तिविकासं सम्पादयेत् शिक्षक इति संक्षेपः।

**परिशीलितग्रन्थाः**


1) शिक्षामनोविज्ञानथ-2008- डा.एस्.एस्.मायुर-अगरवाल्-पब्लिकेशन् आग्रा

2) उच्चतरशिक्षामनोविज्ञान-2010-डा.एस्.पी.गुप्ता, डा.अलका गुप्ता, शारदापुस्तकभवन् इलाहाबाद

3) शिक्षामनोविज्ञान-2011-एस् के मङ्गल- PHI Learning Private Limited- New Delhi-01

4) शिक्षायाः मनोवैज्ञानिकाधाराः – डा.पि.बि.श्रीनीवास-2012-जगदीशसंस्कृत पुस्तकालय्

5) प्राचीन भारतीय मनोविज्ञानम्-1972-D.C.Bhattacharya

6) अर्वाचीनमनोविज्ञानम् मामराज दत्त कपिलः सम्पूर्णानन्द - 2002-J.N.Sir-Calcutta

***************

# व्यवहारः (Behaviour)

**डा. रामचन्द्रुलबालाजि**

सहायकाचार्यः, शिक्षाशास्त्रिविभागः

राजीवगान्धीपरिसरः, शृङ्गेरी

विंशतिशताब्द्यां व्यवहारवादीसम्प्रदायस्य विकासः जातः । प्रथमविश्वयुद्धानन्तरं अमेरिकामनोवैज्ञानिकेषु एकः समुहः मनोविज्ञानं व्यवहारविज्ञानरूपेण अङ्गीचकार। तेषु J.B. Watson (१८७८-१९५९) मुख्यः आसीत् । व्यवहारविचाराधारायाः स्वीकृतिकारणात् एव अस्य स्मूहस्य व्यवहारवादिनः (behaviourists)इति प्रसिद्धिः जाता । अयं वादः संरचनावादस्य, प्रकार्यवादस्य च विरोधी वर्तते, यतो हि ते अन्तर्दर्शनस्य चेतनायाश्च विचारं कुर्वन्ति । एते तु निरीक्षणयोग्यस्य (observable), मापनयोग्यस्य (Measurable) व्यवहारस्योपरि ध्यानमदुः।

व्यवहारवादिनः जन्मजातप्रवृत्तीनाम् अस्तित्वं दूरीकृत्य अधिगमस्योपरि बलं दत्तवन्तः । एतैः मानवव्यवहारमवगमनसाधनरूपेण पशुव्यवहाराध्यपनस्योपरि अधिकावधानं दत्तवन्तः। यद्यपि अस्य वादस्य प्रधानप्रवर्तकः John B. Watson महोदयः वर्तते चेदपि Clak Hull, Edward Tolman, B.F.Skinner इत्यादयः अस्य वादस्य कृते बहु योगदानं कृतवन्तः।

वस्तुतः J.B.Watson वर्यः स्वाविनयेन अध्यापकानां कृते क्लेशदायी सन् पश्चात् मनोविज्ञानी जातः। अनेन मनोविज्ञानस्य विज्ञानत्वं

 ISSN – 2249-538X

सम्पादयितुं महान् प्रयासः विहितः।

व्यवहारवादीनामयमाशययः वर्तते यत् मनोविज्ञाने अन्तर्वेक्षणं नापेक्षते । प्रयोगात् स्थावरादिनां दर्शने च यथा ज्ञानं प्राप्यते तथा जीवव्यवहारदर्शनेन अस्माभिः तज्ज्ञानं प्राप्यते। भौतिकरसायनशास्त्रेषु यथा अन्तरवेक्षणस्य नास्ति प्रयोगः एवम् अत्रापि अन्तरवेक्षणस्य अपेक्षा नास्ति। पशुपक्ष्यादीनां व्यवहारः तद्गतभावानां ज्ञानं विनापि अवगन्तुं शक्यः इति सर्वसम्प्रतिपन्नम् । एवञ्च यथा पशुपक्ष्यादीनां व्यवहारः एवमेव मनुजव्यवहारोऽपि परिशीलनीयः । अतएव एतैरुक्तं व्यवहार-परिशीलकंमनोविज्ञानमिति।

एतेषां चिन्तनानुसारं चैतन्यं मानसिकीस्थितिः इच्छा-कल्पना प्रभृतिपदानामुपयोगो नापेक्षते अस्मच्छात्रे । प्रेरकप्रतिक्रियारूपेण अभ्यासोत्पादनरूपेण अभ्यासानां संश्लेषसम्पादनरूपेण वा सर्वोऽपि व्यवहारः पूर्वोक्तः वर्णयितुं शक्यते ।एते वुद्धिविकासप्रक्रियायां वंशानुक्रमस्य भूमिकां तिरस्कृत्य केवलं वातावरणस्यैव महत्त्वं दत्तवन्तः । अधिगमः, अभिप्रेरणा, पुनर्बलनस्योपरि बलदानं व्यवहारवादीनाम् एका विशेषता।

मनोविज्ञानं चैतन्यमधिकृत्य न विचारयितुं प्रभवेत् किन्तु दृश्यमानानां जीवानां व्यवहारमाश्रित्यैव प्रवर्तते।

व्यवहारः शरीरचालनात्मकः (Motor activity), स्वररूप (Vocal activity) अन्तरवयव चेष्टामयः (Internal bodily activity) इति त्रिधा विभज्यते।

व्यवहारस्य निदानं प्रेरकमेव (Stimulus)। तेन च प्रतिक्रिया जायते

। अति प्रकाशे दृष्टे स्वतो जायमान अक्षिसंकोचः अत्रोदाहरणम् । तथा च व्यवहारे सर्वत्र प्रेरकप्रतिक्रिया सम्बन्धो दृश्यते। अस्मिन् सिद्धान्ते चैतन्यं, मनः, बिम्बनं, भावः इत्यादयः सत्तां न लभन्ते ।

अस्यां प्रणाल्यां बाह्यव्यवहाराणामवेक्षणमेव न तु अन्तरवेक्षणस्य प्राधान्यम् । चिराभ्यासेन प्रतिक्रियाः स्वतः अनयासं च जायन्ते । एवमनायासं प्रतिक्रियोत्पादनमेव शिक्षणमिति अयं सिद्धान्तः अभिप्रैति ।

**व्यवहारस्य प्रभावोत्पादककारकाणि** –

प्रधानतया व्यवहारे प्रभावोत्पादकं कारकद्वयं भवति । यथा –

१) आनुवंशिकता (Heredity)

२) वातावरणम् (Environment)

केचन मूलप्रवृत्तयः (Instincts) अपि कारकाः भवन्ति इति वदन्ति । मूलप्रवृत्तयः आनुवंशिकतायामेव अन्तर्भवन्ति इति केचन । प्रत्येकजनस्यापि जन्मतः केचन आनुवंशिकतागुणाः भवन्ति । ते अवश्यं व्यवहारस्योपरि प्रभावं जनयन्ति । जिज्ञासा, पलायनस्वभावः, कामप्रवृत्तिः, हासप्रवृत्तिः, याचनप्रवृत्तिः, रचनाप्रवृत्तिः इत्यादयः वंशपारम्पर्यगुणाः भवन्ति । एते सहजतया जन्मतः एव भवन्ति । एतदर्थं पुनः शिक्षणस्य वा अभ्यासस्य वा आवश्यकता नास्ति ।

यद्यपि केचन व्यवहारविशेषाः जन्मतः भवन्ति परन्तु सर्वेषां सहोदरजातानाम् एते गुणाः समानाः न भवन्ति । नाम एकस्मिन् गृहे एकोदरजातेष्वपि भिन्न-भिन्न-व्यवहाराः दृश्यन्ते । अतः व्यवहारविशेषनिर्णये वातावरणमेव मुख्यं कारणां भवतीति व्यवहारवादिनः । एतेषां मते

 ISSN – 2249-538X

व्यवहारसंरचने वातावरणमेव मुख्यं कारणं भवति । उत्तमवातावरणेन उत्तमव्यवहारः भवति । उत्तमवातावरणाभावे दुष्टः व्यवहारः भवतीति एतेषां विश्वासः । अतएव J.B. Watson महोदयः सधैर्यं वदति यत् -

Give me a dozen healthy individuals irrespective of their hereditary traits, I will make them doctor, engineer teachers, clergymen, and still if you need I will make them decoits and thieves.

उपर्युक्तवक्यैः ज्ञायते यत् वातावरणमेव मानवस्य व्यवहारस्थितिं निर्णयति । अतः उत्तमवातावरणे शिशूनां पोषणम् आवश्यकमिति । उपर्युक्तपर्यालोचनेन ज्ञायते यत् व्यवहारनिर्णये केवलम् आनुवंशिकता एवं केवलं वातावरणां वा कारणं न भवति, उभयत्रापि बहवो हि अपवादाः वर्तन्ते। अतः व्यवहारनिर्णये उभयोरपि कारणां भवतीति आधुनिकमनोवैज्ञानिकाः ।

**व्यवहारविषये केचन सिद्धन्ताः** –

**१. व्यवहारः परिवर्तनशीलः** –

व्यवहारः सर्वदा एकरूपेनैव भवति इति नियमः नास्ति । समयानुगुणं व्यवहारस्य परिवर्तनं भवति । एक एव पुरुषः भिन्न-भिन्न-स्थितिषु विभिन्नरूपेण व्यवहरति । अपि च भिन्न-भिन्नकार्येषु व्यवहारस्य परिवर्तनं दृश्यते ।

**२. व्यवहारः सापेक्षः –**

मानवस्यावश्यकतानुगुणं व्यवहारः भवति । अपेक्षानुगुणं प्रयत्नेन व्यवहारस्य परिवर्तनाय प्रयत्नः कर्तव्यः ।

**३. व्यवहारः अत्यन्तगभीरः –**

व्यवहारस्य अवगमनं न तावत् सुकरं न भवति । मानवस्य मनः अत्यन्तं गभीरं भावति । अतः केवलं आपाततः परिशीलनमात्रेण व्यवहारस्याध्ययनं नैव भवति।

सामान्यतया व्यक्तिः किमपि लक्ष्यमुद्दिश्य कार्यं करोति, व्यक्तेः सर्वाः क्रियाः अपि प्राथमिकावश्यकतानाम् इच्छानाम् अभिवृत्तीनां संवेगानाञ्च पूर्तये उपयुक्ताः भवन्ति। एतानि कार्यानि व्यक्तेः समाजस्य च मध्ये सामञ्जस्य सम्पादनाय सह कुर्वन्ति । एवं समाज-व्यक्त्योर्मध्ये उत्तमरूपेण जायमानः आदान-प्रदानात्मकः व्यवहारः तयोः सामञ्जस्यं सूचयति । कदाचित् असन्तुलनकारणेन सामञ्जस्यं नश्यति । कुसामञ्जस्येन पीडितः जनः सामाजिकनियमान् आदर्शाञ्च अतिक्रम्य व्यवहरति। तत् फलतः सुरक्षाभावः (Insecurity), व्याकुलता (anxiety), भग्नाशाः (frustrations) सम्भवन्ति । एते बहून् असामञ्जस्यव्यवहारान् जनयन्ति ।प्रायः किशोरावस्थायामेव एते अपसमान्यव्यवहाराः भवन्ति।

**४. केचन अपसामन्यव्यवहारः –**

छात्रेषु विविधप्रकारकाः व्यवहाराः भवन्ति प्रायः एते अपसामान्यव्यवहाराः छात्रेषु दृश्यन्ते। यथा –

क) असत्यकथनम्

ख) चौर्यम्

ग) निग्रहभावः

घ) अनावश्यककलहः

ङ) नखदंशनम्

च) शय्यार्द्रीकरणम् (Bedwetting)

छ) भाषणवैकल्यम्

ज) फोबिया

 ISSN – 2249-538X

झ) व्याकुलता

ञ) नकारात्मकचिन्तनम्

ट) मादकद्रव्यसेवनम् (Drug addiction)

ठ) मनोदौर्बल्यम् (Psychoneurosis)

**विद्यालयेषु प्रायः एते व्यवहारः भवन्ति –**

क) कार्यविमुखता (Truancy)

ख) परद्रव्यापहरणम् (Stilling)

ग) बालिकानां पराभावः (Eve teasing)

घ) उग्रव्यवहारः (Aggression)

ङ) मादकद्रव्यसेवनम् (Drug diction)

**एतादृश अपसामान्यव्यवहारस्य बहूनि कारणानि भवन्ति –**

१) अस्वास्थ्यम्

२) प्राथमिकावश्यकतानाम् अपूर्तिः

३) विद्यालयवातावरणम्

४) अज्ञानम्

५) अनुदेशस्याभावः

६) अनुकरणम्

७) दारिद्र्यम्

८) दुष्टसाङ्गत्यम्

९) अस्मितायाः प्रदर्शनम्

१०) पितृभ्याम् अधिकस्वातन्त्र्यदानम्

११) आलस्यम्

१२) जनसञ्चारमाध्यमानि

१३) पर्याप्तस्नेहादीनाम् अभावः

**व्यवहारिकदोषाणां चिकित्साप्रकाराः –**

१) मनोविश्लेषणपद्धतिः (Psychoanalytic theory)

२) सम्मोहनम् (hypnotism)

३) उचितनिर्देशनदानम् (proper instruction)

४) विश्रान्तिः (Relaxation)

५) योगाभ्यासः (Practice of Yoga Techniques)

**उपर्युक्त चिकित्साप्रकारैः साकं केचनमार्गाः स्वयं अनुसर्तव्याः भवन्ति –**

१) दृढनिश्चयः इच्छाशक्तिश्च (Firm determination & will power)

२) शीघ्रक्रियाभिः दृढारम्भः (Strong initiative with quick action)

३) स्वेच्छया अभ्यासः प्रयोगः (User voluntary practice)

४) दुष्टव्यवहाराणा स्थाने समाजे अङ्गीकृतव्यवहाराणां स्वीकरणम् (Substitution of the bad habbits by the appropriate socially approved behaviour)

५) दुष्टप्रवृत्तीनां मूलकारणानां दूरीकरणम् (To hit rout causes of the bad habbits)

 ISSN – 2249-538X

एते मार्गाः उत्तमव्यवहारसम्पदनार्थम् अत्यन्त उपयुक्ताः भवन्ति । एवम् एतादृशैः मार्गैः उत्तमव्यवहारः सम्पादनार्थं प्रयासः कर्तव्यः । विशिष्य बालकेषु उत्तमव्यवहारसम्पादने पितृनाम् अध्यापकानाञ्च योगदान अत्यन्तं वर्तते । उत्तमव्यवहारार्थम् आवश्यकानां स्नेह-दया-करुणादिगुणानां सम्पादने पितृणां पात्रम् अत्यन्तं वर्तते । आधुनिकप्रपञ्चे यत्र कुत्र पितरः उद्योगे कर्मणि अथवा धनार्जनकर्मणि वा व्यापृताः सन्ताः आत्मनः पुत्रैः साकं कालं यापयितुं शक्ताः नैव भवन्ति । अतः अन्यैः वृत्तैः अभिवर्तितः बालकः स्नेहादिगुणान् प्राप्तुं समर्थः नैव भवति । तेन बालकेषु व्यवहारदोषाः भवन्ति । एवमेव विद्यालये उत्तमस्य निष्पक्षपातवातावरणस्य निर्माणं यदि नैव क्रियते अध्यापकैः, तेन छात्रेषु व्यवहारसमस्याः भवन्ति । एवं परोक्षरूपेण अध्यापकाः अपि छात्रापसामान्यव्यवहारस्य कारकाः भवन्ति । अतः अध्यापकाः स्वयं अनुशासिताः सन्तः छात्रेषु उत्तमव्यवहारसम्पादनाय प्रयत्नं कुर्युः । तेन उत्तमनागरिकाणां निर्माणं भवति इति । शम् ॥

सन्दर्भग्रन्थसूची –

१) शिक्षामनोविज्ञानम् – एस्. के. मङ्गल

२) शिक्षा मनोविज्ञान की अध्ययन विधियाँ –सुशील गुप्ता & अलका गुप्ता

३) शिक्षा मनोविज्ञान – डा. ए. बी. भट्नागर & others

४) शिक्षामनोविज्ञानम् – ई. एस्. वेङ्कटराघवाचार्य

# मुक्तसाहचर्यम्

**डा. हरिप्रसादः के.**

सहायकाचार्यः, शिक्षाशास्त्रिविभागः

राजीवगान्धीपरिसरः, शृङ्गेरी

मनुष्यस्य व्यक्तित्वपरीक्षणार्थं मनोवैज्ञानिकैः बहवो हि विधयः आविष्कृताः । अन्तर्दर्शनविधिः (Introspection Method) वैय्यक्तिकरूपेण स्वस्य परिष्कारार्थं स्वयमेव अनुसर्तुं योग्यः कश्चन विधिः । बहिर्दर्शनविधयः(Extrospection Methods) बहवो हि सन्ति येषु प्राधान्येन प्रयोगात्मक(Experimental Method)विधिः, व्यक्तिवृत्ताध्ययनविधिः, अवलोकनविधिश्चेति त्रयः विधयः सन्ति । एतान् विहाय व्यक्तित्वस्य अध्ययनाय पाश्चात्यैः प्रक्षेपणविधयः(Projection Method) आविष्कृताः येषां काचित् भिन्ना एव कोटिः या च पूर्वतनकौटौ नान्तर्भवति । एतादृशभिन्नकोटिकविधीन् अतिरिच्य कश्चन अन्यः प्रकारः यः वर्तते तस्य नाम साहचर्यम् । अस्मिन् विधौ प्रयोगात्मकविधिवत् नियन्त्रितपरिस्थितिः भवति । प्रक्षेपकविधिवत् व्यक्तित्वस्य अनवगततया एव प्रक्षेपणम्(Projection) अपि भवति । अवलोकनविधिवत् व्यवहारस्याध्ययनमपि अल्पमात्रेण भवति । सर्वेषां विधिप्रकाराणां स्वभावं भागशः स्वीकृत्य स्वतन्त्रविधित्वेन व्यक्तित्वस्य अध्ययनार्थम् उपयोक्तुं शक्यः विधिः “साहचर्यम्” इति पदेनाभिधीयते । एतस्य साहचर्यस्य द्वैविध्यम् अस्ति – मुक्तसाहचर्यं, बद्धस्साहचर्यञ्चेति ।

 ISSN – 2249-538X

मुक्तसाहचर्यम् कश्चन प्रविधिः यश्च मनोविश्लेषणवादिभिः प्रयुक्तो वर्तते। मनोविश्लेषणसिद्धान्तस्य प्रतिपादकः सिग्मण्ड्-फ्राइड् अस्य प्रविधेः विषये इत्थं भणति[1] – "मुक्तसाहचर्यस्य कारणतः मनोरोगिणः मनोविश्लेषकस्य विचाराणां आवर्तनापेक्षया स्वस्य विषये एव अधिकं वक्तुम् आरभन्ते। ते स्वीयैः उपकरणैः सहैव (स्वसामग्रिभिः) कार्यं कुर्वन्ति न तु इतरेषां परामर्शानुगुणम्।" इति ।

सिग्मण्ड्-फ्राइड् एनं प्रविधिं हिप्नोसिस् इत्यस्य पर्यात्वेन विकासितवान्। यतो हि हिप्नोसिस् इत्येततत् अधिकविश्वासार्हं न भवति, इति तस्य विचारः।

Francis Galton इत्याख्यः मनोविज्ञानी सर्वादौ 1897 तमे इसवीयवर्षे साहचर्यस्य तत्वं स्वीकृत्य प्रयोगम् अकार्षीत्।

एकसम्बन्धिज्ञानं अपरसम्बन्धिस्मारकम् इति शास्त्रोक्त्यनुसारं विधेरस्य प्रवृत्तिर्जायते। सामान्यतः मानवस्य मनः चञ्चलं अस्तीत्यतः एकत्रैव बहुकालं यावत् न स्थिरीभवति। मनः सदा एकस्मात् ध्येयवस्तुनः अपरं वस्तु सञ्चरत् भवति । मनसः ईदृशः सञ्चारः द्वयोः (द्व्यधिकानां वा)वस्तुनोः सम्बन्धस्य गभीरताम् (गाढताम्) अनुसृत्य भवति । तत्तद्व्यक्तिविशेषस्य मनोसञ्चारस्य आधारभूतानि वस्तूनि समानमात्रया परस्परं सम्बद्धानि न भवन्ति । यस्मिन् व्यक्तिविशेषे ययोः वस्तुनोः गाढः सम्बन्धो भवति सः

[1] "The importance of free association is that the patients spoke for themselves, rather than repeating the ideas of the analyst; they work through their own material, rather than parroting another's suggestions"

व्यक्तिविशेषः तत्र अन्यतरं वस्तुविषेषं सर्वादौ स्मरति। तद्विपरीततया यस्मिन् व्यक्तिविशेषे ययोः वस्तुनोः गाढः सम्बन्धो न भवति सः व्यक्तिविशेषः तत्र अन्यतरं वस्तुविषेषं आदौ स्मर्तुं न प्रभवति। तत्तद्व्यक्तिविशेषे द्वयोः वस्तुनोः सम्बन्धस्य गाढता तस्य तस्य व्यक्तिविशेषस्य व्यक्तित्वमाश्रित्य भवतीति पार्थक्येन वक्तव्यं न भवेत्।

यथा – "रामः" इत्यस्य उद्दीपकशब्दस्य प्रतिक्रियारूपेण कश्चन जनः सीता इति प्रतिक्रियात्मकं शब्दं वदेत्, रावणः इति वा वदेत्, कैकेयी इति वा वदेत्, पुरुषोत्तमः इति वा वदेत्। राम इति पदेन सह तत्तद्व्यक्तिविशेषस्य व्यक्तित्वानुसारं प्रतिक्रियात्मकशब्दस्य उच्चारणं सम्भवति। किन्तु कीदृशस्य प्रतिक्रियात्मकशब्दस्य उच्चारणेन प्रतिक्रियाकर्ता(प्रयोज्यः) कीदृशव्यक्तित्ववानिति कथनं सुकरं नास्ति। इत्युक्ते रामः इति उद्दीपकशब्दं श्रुत्वा कश्चन रावणः इति प्रतिक्रियाशब्दं उच्चारयति चेत् शब्दयोः परस्परं विरोधसम्बन्धकारणतः प्रतिक्रियाकर्ता दुष्टः इति निश्चेतुं न शक्यते। किन्तु इदं तु निश्चयेन वक्तुं शक्यते यत् कश्चन प्रयोज्यः उद्दीपकशब्दानाम् आवल्याः अधिकाधिकशब्दानां प्रतिक्रियारूपेण विरोधसम्बन्धमाश्रित्य एव प्रतिक्रियात्मकशब्दान् उच्चारयति चेत् तस्य व्यक्तित्वं असन्तुलितमस्तीति। किञ्च प्रतिक्रियात्मकशब्दानां उच्चारणात्परं प्रयोज्यस्य भावमवगन्तुं, तस्मात् अन्तःसूचनारूपेण एकं वाक्यं प्रतिक्रियात्मकशब्दसम्बन्धितया पृच्छ्यते। अनेन वाक्येन प्रायः इदं तु निश्चेतुं शक्यते यत् समत्वसामीप्यविरुद्धसम्बन्धेषु कं सम्बन्धमाश्रित्य वाक्यं प्रयोज्यः प्रायुङ्क्त इति।

 ISSN – 2249-538X

मुक्तसाहचर्यस्यापि प्रयोगविधिद्वयं वर्तते – शब्दावलीविधिः निरन्तरविधिश्चेति । शब्दावलीविधौ एकैकशः शब्दं उच्चार्य प्रतिक्रिया प्रयोज्यात् प्राप्यते चेत् निरन्तरविधौ एकं उद्दीपकशब्दं उच्चार्य निरन्तररूपेण पञ्चषान् शब्दान् प्रतिक्रियारूपेण वक्तुं प्रयोज्यः निर्दिश्यते।


अधः शब्दावलीविधेरेकं प्रारूपं प्रादायि -



साहचर्यम्
शब्दावलीविधेः एकं प्रारूपम्

| क्र.सं | उद्दीपकः शब्दः | अनुक्रियात्मकः शब्दः | प्रतिक्रिया-कालः | अन्तःसूचना (वाक्यरूपेण) | सम्बन्धः |
|---|---|---|---|---|---|
| १ | रामः | सीता | 76 Seconds | रामेण सह सीता वनं गच्छति। | समता/साम्यम् |
| २ | उद्यानम् | पुष्पाणि | 80 Seconds | उद्याने पुष्पाणि विकसन्ति। | समीपता/साम्यम् |
| ३ | जीवनम् | दुस्तरम् | 69 Seconds | साम्प्रतं जीवनं दुस्तरम्। | विरोधिता |
| ४ | वृक्षः | फलम् | 32 Seconds | वृक्षे फलं नास्ति। | विरोधिता |
| ५ | नारी | पूज्या | 39 Seconds | यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः। | --------- |
| ६ | आसन्दः | उत्पीठिका | 65 Seconds | आसन्दस्य पुरतः उत्पीठिका वर्तते। | समीपता |
| ७ | माला | रुद्राक्षम् | 87 Seconds | ऋषिः रुद्राक्षमालां धारयति। | साम्यम् |
| ८ | लेखनी | असमीचीना | 54 Seconds | समीचीनाः लेखन्यः अत्र न मिलन्ति। | विरोधिता |
| ९ | कंसः | दुष्टः | 58 Seconds | कंसः दुष्टः अस्ति। | साम्यम् |
| १० | आनन्दः | दुःखम् | 59 Seconds | शिक्षाशास्त्रिकक्ष्यायां सुखमेव नास्ति। | विरोधिता |

Dr.Hariprasad.K Asst.Professor
Rastriya Sanskrit Sansthan



साहचर्यप्रयोगस्य निरन्तरविधिः

| क्र.सं | उद्दीपकः शब्दः | अनुक्रियात्मकः शब्दः | प्रतिक्रिया-कालः(क्षणेषु) | अन्तःसूचना (वाक्यरूपेण) | सम्बन्धः |
|---|---|---|---|---|---|
| १ | रामः | | | | |
| २ | उद्यानम् | | | | |
| ३ | जीवनम् | | | | |
| ४ | वृक्षः | | | | |
| ५ | नारी | | | | |
| ६ | आसन्दः | | | | |
| ७ | माला | | | | |
| ८ | लेखनी | | | | |
| ९ | कंसः | | | | |
| १० | आनन्दः | | | | |

Dr.Hariprasad.K Asst.Professor Rastriya Sanskrit Sansthan

**साहचर्यप्रयोगस्य निरन्तरविधिः**

| क्र.सं | उद्दीपकः शब्दः | अनुक्रियात्मक-शब्दसंख्या | अनुक्रियात्मकः शब्दः | अन्तःसूचना (वाक्यरूपेण) | सम्बन्धः |
|---|---|---|---|---|---|
| ०१ | करोति | ०१<br>०२<br>०३<br>०४<br>०५ | | | |
| ०२ | पठति | ०१<br>०२<br>०३<br>०४<br>०५ | | | |

Dr.Hariprasad.K Asst.Professor
Rastriya Sanskrit Sansthan

## साहचर्यस्य नियमाः

1. समत्वस्य नियमः (Law of Similarity)
2. विरोधस्य नियमः (Law of Contrast)
3. सामीप्यस्य नियमः (Law of Contiguity)

एतान् पूर्वोक्तान् नियमान् आश्रित्य कस्यचित् रोगिणः/प्रयोज्यस्य व्यक्तित्वादीनां अध्ययनं क्रियते।

## साहचर्यस्य उपयोगिता

1. अपराधिनामन्वेषणे एतस्य उपयोगः क्रियते।
2. भावनात्मकग्रन्थीनामन्वेषणे प्रविधिरयं उपयुज्यते।
3. व्यक्तित्वस्य अध्ययने एतस्य उपयोगः भवितुमर्हति।

 ISSN – 2249-538X

इत्थं साहचर्यम् व्यक्तित्वादीनाम् अध्ययनं कर्तुं मनोवैज्ञानिकप्रपञ्चे उपयुज्यमानः कश्च उत्तमः प्रविधिरिति वक्तुं शक्यते । प्रयोगप्रक्रिया विस्तरेण आकरग्रन्थेषु द्रष्टव्या ।

सन्दर्भाः


- उच्चतरशिक्षामनोविज्ञान, डा.एस्.पि.गुप्ता
- शिक्षामनोविज्ञान, पी.डी.पाठक
- शिक्षामनोविज्ञानम् डा. वेङ्कटराघवाचार्याः


***************

# मनोमयं जगत्सर्वम्

**डा. गणेश ति. पण्डितः**
सहायकाचार्यः, शिक्षाशास्त्रविभागः
राजीवगान्धीपरिसरः, शृङ्गेरी

अथ मनो नाम किमित्येषा जिज्ञासा सार्वकालिको सार्वजनीना चास्ति। मनसः स्वरूपम् आश्रित्य तदीयचेष्टाः अधिकृत्य तद्गुणलक्षणानि च समाश्रित्य पौरस्त्यैः पाश्चात्यैश्च दार्शनिकैः गभीरम् अनुसन्धानम् अद्यावधि कृतं क्रियमाणं च वर्तते। किन्तु मनसः विषये न कस्यापि दार्शनिकस्य मतम् एकविधं दृश्यते। अत्र कारणं मनसः अथवा मानसिकक्रियाणाम् अस्थिरता अस्पष्टता एव स्यादिति मन्यामहे।

मनसः सामान्यगुणधर्माणां निरूपणाय शास्त्राणि शास्त्रवचनानि च नितरां साहाय्यमाचरन्ति। लौकिकालौकिकशास्त्रेषु पाश्चात्यसिद्धान्तेषु च मनसः स्वरूपं गुणलक्षणानि कार्याणि वैशिष्ट्यानि च सूपपादितानि सन्ति। तेषां मतपरिशीलनेन मनसः स्वरूपवर्णनं गुणलक्षणनिरूपणं वा सुकरं सिध्यतीति मे मतिः।

अधुना "मनोमयं जगत्सर्वम्" इत्येतस्य शीर्षकस्य औचित्यं कथं सिध्यतीति सन्देहः समुत्पद्यते सुमनसां मनस्सु। सर्वादौ तदेव स्पष्टीक्रियते। उक्तमपि योगवासिष्ठे –

मनो हि जगतां कर्तृ मनो हि पुरुषः परः।
मनः कृतं कृतं लोके न शरीरकृतं कृतम्॥ इति

 ISSN – 2249-538X

अत्र मनो हो जगतां कर्तृ इतीदं वाक्यं कथं सिध्यतीति संशयः समुत्पद्यते । किञ्च विश्वस्य कर्ता भुवनस्य गोप्ता इति श्रुतिवाक्यमनुसृत्य जगत्कर्ता ईश्वरः उत ब्रह्म इत्युक्ते क्वचित् सन्देहो वा विवादो न स्यात् । परन्तु मनसः कर्तृत्वं वा "मनोमयं जगत्सर्वम्" इत्येतद्वा कथं वा अभ्युपगन्तुं शक्यते इति कश्चित् जिज्ञासुः पृच्छति चेत्तर्हि चरकोऽत्र ब्रूते –

चेतनवान् यतश्चात्मा ततः कर्ता निरुध्यते ।
अचेतनत्वाच्च मनः क्रियावदपि नोच्यते ॥ इति ।

यद्यपि मनः अचेतनपदार्थः तथापि तत् क्रियाशीलमित्यतः लोकेन तस्मिन् कर्तृत्वमारोप्यते वस्तुतः जगतः कर्तृत्वम् आत्मनः अथवा ईश्वरस्यैव भवति इत्यत्र चरकमतमाश्रिय समाधानं वक्तुं शक्यते । किन्त्वन्ये न मन्यन्ते मतमिदम् । नैतत् युक्तिसङ्गतं मतमिति मनोविश्लेषणवादिनां राद्धान्तः ।

मनोविश्लेषणवादिनां मते मनसः स्तरत्रयं वर्तते चैतन्योपचैतन्याचैतन्यभेदेन । अयं हि मनसः संरचनात्मकपक्षः इति तेषां वादः । [सूत्ररूपेण वक्तव्यं चेत् त्रितयं मनः ।] पुनस्तैरेव "अहं मतिः" "अध्यहं मतिः", विशिष्टाहं मतिः इति मनसः क्रियात्मकपक्षोऽपि प्रकारत्रयेण प्रतिपाद्यते । एतेषां त्रयाणां प्रकाराणां योगेन सामञ्जस्येन च मनः अथवा व्यक्तित्वं जायते इति मनोविश्लेषणवादिनाम् अभिप्रायः ।

यथा अहम् – अध्यहम् – विशिष्टाहम् इति मनसः त्रैविध्यं मनोविश्लेषणवादिनः निगदन्ति तथैव वेदव्यासोऽपि मनः बुद्धिः हृदयम् इति त्रयः कर्महेतवः सन्तीति निरूपयति । यथोक्तं तेन

मनो विसृजते भावं बुद्धिरध्यवसायिनो।

हृदयं प्रियाप्रिये वेद त्रिविधा कर्मचोदना॥ इति।

अहं स्थाने मनः, अध्यहं स्थाने बुद्धिः, विशिष्टाहं स्थाने हृदयस्य परिकल्पनम् औचित्यं भजेत क्वचित् इति मे मतिः।

लोके मानवः मनसा एव शृणोति मनसा एव पश्यति इत्यत्र श्रुतिवाक्यमपि प्रमाणं वर्तते। यथोक्तं बृहदारण्यकोपनिषदि "अन्यत्र मना अभूव नादर्शमन्यत्र मना अभूवं ना शौषमिति मनसा ह्येव पश्यति मनसा शृणोति" कृष्णद्वैपायनोऽपि इदं प्रमाणयति। तद्यथा –

चक्षुः पश्यति रूपाणि मनसा न तु चक्षुषा।

मनसा व्याकुले चक्षुः पश्यन्नपि न पश्यति॥ इति।

मननात् एव मानवः मानवपदवीं लभते अन्यथा सः मृगपदवाच्यः भवतीत्यपि योगवासिष्ठे उल्लिखितमस्ति। तद्यथा –

तरवोऽपि हि जीवन्ति जीवन्ति मृगपक्षिणः।

स जीवति मनो यस्य मननेनोपजीवति॥ इति।

मनः एव बन्धाय मोक्षाय च कारणमिति अमृतबिन्दूपनिषदि उट्टङ्कितमस्ति। यथा तत्र

मन एव मनुष्याणां कारणं बन्धमोक्शयोः।

बन्धाय विषयासङ्गि मोक्षे निर्विषयं मनः॥ इति।

 ISSN – 2249-538X

मानवः स्वस्य परेषां च मनसः परिज्ञानेन एव लौकिकालौकिकं सुखं प्राप्तुं शक्नोति। अध्यात्मविद्याबलेन स्वस्य अनुभवबलेन परेषां मनः विज्ञातुं शख्यते। इतरेषां मनोविज्ञानं मनुना अपि प्रोक्तम्। तद्यथा –

अकारैरिङ्गितैरीत्या चेष्टया भाषितेन च।
नैत्रवक्त्रविकारैश्च गृह्यतेन्तर्गतं मनः॥ इति।

एवं मनसः निरूपणाय नानाविधानि शास्त्राणि मतानि च उपकुर्वन्ति इत्यलं विस्तरेण।

***************

# भाषाशिक्षणसिद्धान्ताः

**डा. वेङ्कटरमणभट्टः**
सहायकाचार्यः, शिक्षाशास्त्रविभागः
राजीवगान्धीपरिसरः, शृङ्गेरी

भाषणं चिन्तनक्षमताञ्च अधिगम्य मनुष्यः पशुभ्यः भिद्यते । चिन्तनशक्त्या मनुष्यः भाषां ससर्ज । अथ भाषां विचारशक्तेः विकासाय अन्वेषणाय च साधनत्वेन उपयोक्तुं समारब्धवान् । मानवः सङ्घजीवी वर्तत इति समाजशास्त्रज्ञाः निगदन्ति । समाजमन्तरा मानवः उषितुं न शक्नोति । समाज-मनुष्ययोः सम्बन्धः अविनाभावः विद्यते । सामाजिकजीवनस्य श्रेयसे भाषा नितान्तमावश्यकी । समाजे जीवमानाः पशवः आहारनिद्राभयमैथुनादिक्रियाभिः आत्मानं व्यापारयन्ति । मानवस्य तावत् विवेको वर्तत इति कृत्वा मानव इतरेभ्यः भिद्यते । तदेव पद्येनानेन ज्ञायते यत्

**आहारनिद्राभयमैथुनञ्च सामान्यमेतत्पशुभिर्नराणाम् ।**
**धर्मो हि तेषामधिको विशेषः धर्मेण हीनः पशुभिः समानः ॥**

धर्माधर्मयोः विवेचनं कर्तुमर्हति मानवः । तस्य बुद्धिशक्तिरेव गरीयसी तत्र । पशूनां तावत् बुद्धिशक्तेरभाव इति कारणेन धर्माधर्मयोः भेदज्ञानाभावात् । यः मनुष्यजन्मनि उत्पन्नः सः धर्माधर्मयोः भेदज्ञानं प्राप्नोति । मनुष्यजन्मनि उत्पन्नोऽपि धर्माधर्मयोः भेदज्ञानं यः न प्राप्नोति सः पशुरेव इति तात्पर्यम् । भाषामाध्यमेन कृत्स्नोऽपि लोकव्यवहारः जायते । “वाचामेव प्रसादेन लोकयात्रा भवष्यति” इति दण्डिनः अभियुक्तवचनानुसारं लोकव्यवहारः


ISSN – 2249-538X

सर्वोऽपि भाषायाः प्रभावेण प्रवर्तते। भाषया परस्परं मानवेषु विचारविनिमयः सम्पद्यते। पारस्परिकं आदानप्रदानमपि अनयैव सिध्यति। मनुष्याणां परस्परं सम्बन्धोऽपि भाषयैव दृढीयान् भवति। सामाजिक सम्बन्ध अनेन माध्यमेन विकासमेति । भावनात्मकः विकासः अनेन शक्यते । ज्ञानविज्ञानप्रविधितन्त्रांशादयः भाषया एव विकसिताः। नैकानि संशोधनानि भाषया सम्प्रवृत्तानि।

भाषाज्ञानमन्तरा मानवजीवनं तमस्येव पतितं भवेदित्युक्तौ नातिशयोक्तिः स्यात्। तद्यथा –

**इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।**

**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥**

भाषां विना संस्कृति-सम्प्रदाय-आचार-विचाराः न विकसन्ति स्म। मनुष्याणां भावचिन्तनकल्पनादि स्वप्नाः भाषामाध्यमेन प्रफुल्लिता अभूवन्। इत्थं मानवजीवने भाषायाः स्थानं महदित्यवगम्यते।

भाषाया इतिहासः मानवजीवनस्य इतिहासवत् अत्यन्तं प्राचीनः। कस्मिंश्चित् कालघट्टे पशुरूपेण जीवमानो मानवः स्वीयविचारशक्त्या भाषामाविर्भावयित्वा अधुना मङ्गलग्रहगमनोत्सुकः वर्तत इति तु विस्मयकरः विचारः वर्वर्ति। एतादृशप्रोन्नतौ सत्स्वपि बहुषु कारणेषु भाषाविकास एव प्रधानतमं कारणमिति निश्चप्रचं ब्रूते भाषाविदां समवायः। प्राथमिकरूपेण मानवानामस्तित्वमेव सङ्केतयतीयं भाषा।

भाषाधिगमप्रक्रिया काचित् स्वाभाविकी विद्यते। भाषारहितं समाजं ऊहितुमेव न प्रभवामो वयम्। मुहुर्तमेकं भाषाया अभावं प्रपञ्चे कल्पयामश्चेत्

भाषायाः माहात्म्यं वेत्तुं शक्नुमः । समेऽपि लोकव्यवहाराः स्थगिताः भवेयुः । सर्वा अपि भावनाः भाषामाध्यमेन यावत् प्रकाशयामः तावत् माध्यमेनान्येन केनचन अपि प्रकाशयितुं नार्हाम इति भाषायाः वैशिष्ट्यं विद्मः । भाषा सागरायते । सागरः रत्नाकरः । नैकाः सम्पत्तयः ज्ञानविज्ञानरूपाः भाषायामेव विलसन्ति । नियतपदानि उपयुज्य अपरिमितानि वाक्यानि मनुष्यः संरचयति प्रयुङ्क्ते च । अद्यत्वे यावन्त आविष्काराः प्रपञ्चे समभूवन् तत्र भाषायाः योगदानं अत्यधिकम् इति मन्यामहे । आधुनिकयुगस्य जटिलसमस्यामपि भाषया परिहर्तुं शक्यते । भाषयैव मानवजीवनं वर्णरञ्जितं जातमस्ति ।

आधुनिककाले मनोविज्ञानस्य प्रसिद्धिः प्रत्यहं एधमाना दरीदृश्यते । क्षेत्रेऽस्मिन् भाषाशिक्षणस्यापि गवेषणं प्राचुर्येण प्रवर्तते । गवेषणानेन सम्प्राप्ताः केचित् परामर्शाः अनुत्तमाः संस्कृतशिक्षणेऽपि क्रियान्वयनं कर्तुं शक्यन्ते । कस्यचित् कार्यविशेषस्य निर्वहणात् प्राक् लक्ष्याणां निर्धारणं यावदावश्यकं, तस्य कार्यविशेषस्य निर्वहणेन सम्बन्धिन्याः प्रक्रियायाः सिद्धान्तानां ज्ञानमपि तावदेव आवश्यकम् । सिद्धान्तज्ञानं विना प्रक्रियानिर्वहणं सुगमं रोचकं प्रभावपूर्णं च कर्तुं न शक्यते । भाषाशिक्षणमपि काचन प्रक्रिया वर्तते । प्रक्रियाया अस्या अपि केचन सिद्धान्ताः विलसन्ति । अतस्तेषां सामान्यसिद्धान्तानां ज्ञानम् आवश्यकं भवति । भाषाशिक्षणस्य इमे सिद्धान्ताः प्रोक्ताः । ते यथा –

१. स्वाभाविकतायाः शिक्षणस्य सिद्धान्तः

२. अभ्यासस्य सिद्धान्तः

३. रुचेः सिद्धान्तः


ISSN – 2249-538X

४. सक्रियतायाः सिद्धान्तः

५. मौखिककार्यस्य सिद्धान्तः

६. अनुपातस्य क्रमस्य च सिद्धान्तः

७. बहुमुखी सिद्धान्तः

८. स्वतन्त्रतायाः वैयक्तिकभिन्नतायाश्च सिद्धान्तः

**उपसंहारः**

एतान् सिद्धान्तान् अतिरिच्यापि अन्येपि सिद्धान्ताः प्रकीर्तिताः स्युः। भाषायाः श्रवण-भाषण-वाचन-लेखनकौशलानि चत्वारि भाषाधिगमप्रक्रियायां प्राधान्यं भजन्ते । तानि कौशलानि उपयुज्य भाषाशिक्षणसिद्धान्ताः भाषाविद्भिः प्रत्यपादिषत । इतोऽपि क्षेत्रेऽस्मिन् अनुसन्धानानि विधेयानि।

**परिशीलितग्रन्थाः -**

१. संस्कृतशिक्षणं नवीनप्रविधयश्च। प्रो.चलनाशर्मा प्रो.पतेहसिंहश्च। आदित्यप्रकाशनम्, जपुरम्। २००८

२. संस्कृत शिक्षण। डा. रघुनाथ सफाय। हर्याणा साहित्य अकाडमी। २०११

३. ಸಂಸ್ಕೃತ ಭಾಷಾಶಾಸ್ತ್ರ ಮತ್ತು ಸಾಹಿತ್ಯ ಚರಿತ್ರೆ. ಲೇ- ಡಾ. ಕೆ. ಕೃಷ್ಣಮೂರ್ತಿ, ವಿ| ಎನ್. ರಂಗನಾಥ ಶರ್ಮಾ, ವಿ| ಹೆಚ್. ಕೆ. ಸಿದ್ಧಗಂಗಯ್ಯ – ಪಠ್ಯಪುಸ್ತಕಗಳ ಇಲಾಖೆ, ಕರ್ನಾಟಕ ಸರ್ಕಾರ, -೧೯೯೨

४. ಮಾತೃಭಾಷೆ ಕನ್ನಡ - ತತ್ವ ಮತ್ತು ಬೊಧನಾ ಮಾರ್ಗ- ಅನುಸೂಯಾ ವಿ. ಪರಗಿ. ವಿವೇಕ ಪ್ರಕಾಶನ, ಚಿಕ್ಕಬಳ್ಳಾಪುರ- ೨೦೦೫

***************

# अधिगमप्रक्रियाविवेचनम्

**डा. नारायण वैद्य**

अतिथिप्राध्यापकः, शिक्षाविभागः

राजीवगान्धीपरिसरः, शृङ्गेरी

अधिगमप्रक्रिया निरूप्यते....

अभ्यासेन अनुभवेन वा ज्ञाने व्यवहारे वा सापेक्षं स्थायिपरिवर्तनम् अधिगमः इति वक्तुं शक्यते । अयमधिगमः सर्वजीवसाधारणः धर्मः वर्तते । अथापि प्राणिमनुष्ययोर्मध्ये बुद्धिशक्त्यनुसारं भेदः दृश्यते । यतः मानवैः विशिष्टः धर्मः अनुस्रियते । प्राणिनां धर्माधर्मविवेकः न भवति । प्रसिद्धोक्तिः श्रूयते -

"धर्मो हि तेषामधिको विशेषः धर्मेण हीनः पशुभिः समानः" इति ।

अयमधिगमः एका प्रक्रिया विद्यते । इयं प्रक्रिया तदा सम्भवति यदा व्यक्तेः ज्ञाने व्यवहारे वा अभ्यासेन अनुभवेन वा स्थायिपरिवर्तनं जायते । अथवा एवमपि अधिगमप्रक्रिया भारतीयैः प्रपञ्चिता अस्ति –

आचार्यात् पादमादत्ते पादं शिष्यस्वमेधया ।
पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च ॥ इति ।

कन्नडसाहित्ये इयं प्रक्रिया एवं प्रदर्शिता अस्ति –

ಕೆಲವಂ ಬಲ್ಲವರಿಂದ ಕಲ್ತು
ಕೆಲವಂ ನೋಡುತಂ ಕಲ್ತು
ಕೆಲವಂ ಸುಜ್ಞಾನದಿಂದ ಕಲ್ತು

 ISSN – 2249-538X

ಕೆಲವಂ ಮಾಳ್ಪವರಿಂದ ಕಲ್ತು
ಕೆಲವಂ ಶಾಸ್ತ್ರಗಳಿಂದ ಕಲ್ತು
ಕೆಲವಂ ಸಜ್ಜನಸಂಗದಿಂದ ಅರಿಯಲ್ ಸರ್ವಜ್ಞನಪ್ಪನಂತೆ

- ಪುಲಗೇರಿ ಸೋಮನಾಥ

अनेन ज्ञायते अधिगमप्रक्रिया आजीवनं प्रचाल्यमाना निरन्तरप्रक्रिया इति ।

सामान्यतया व्यवहारे अद्य पाठितांशानां कण्ठपाठं कृत्वा श्वः गुरोः समीपं गत्वा रटितांशानां यथायथम् उपस्थापनमिति वर्तते । इयम् अधिगमप्रक्रिया सङ्कुचितप्रक्रिया अस्ति । यत अधिगमप्रक्रियासु श्रवणभाषणपठनलेखनादीनि चत्वारि कौशलानि अपि उपयुज्यन्ते ।

कोब्स् महोदयः अधिगमप्रक्रियायाः प्रत्यक्षज्ञानं प्रक्रिया चेति विभागम् अकरोत् । प्रत्यक्षज्ञानं नाम येन मार्गेण वयं ज्ञानम् अर्जयामः । इदं च प्रत्यक्षज्ञानम् आत्ममनइन्द्रियार्थात्मकानां चतुर्णां सन्निकर्षात् सम्पद्यते । सूचनाभिः सह अस्माकं सम्पर्कः प्रक्रिया इत्युच्यते ।

एवं द्विधा विभक्ता प्रक्रिया पुनः चतुर्धा जायते यथा -

1. **अभिमुखीप्रक्रिया** - अस्यां प्रक्रियायाम् अधिगमकर्ता कस्यापि विषयवस्तुनः वस्तुनिष्ठं ज्ञानम् आप्नोति । यस्योत्तरम् आम् उत न इति भवति ।

2. **विचलनप्रक्रिया** - अनुभवानां सङ्घटनमस्याम् प्रक्रियायां जायते ।

3. **आत्मसात्करणप्रक्रिया** - अस्यां प्रक्रियायाम् अधिगमकर्ता नवीनं ज्ञानमर्जयति ।

4. **सुनम्यप्रक्रिया** - अस्यां प्रक्रियायां पूर्वानुभवेन अर्जितसिद्धान्तानां अर्जितज्ञानस्य वा

नवीनपरिस्थितौ अनुप्रयोगः जायते।

इत्थं कोब्स् महोदयः अधिगमप्रक्रियां चतुर्धा विभज्य विश्लेशयामास । एतादृशी अधिगमप्रक्रिया उपनिषदि लभ्यते । यथा - **आत्मा वा अरे दृष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्यश्च** इति।

उपर्युक्तविवेचनेन अधिगमप्रक्रियायाः स्वरूपं वास्तविकमिति वक्तुं शक्यते । अर्थात् अधिगमप्रक्रियायां द्वौ ध्रुवौ भवतः । यौ परस्परं आन्तरिकज्ञानस्य बाह्यज्ञानेन सह सम्बन्धं संस्थाप्य नवीनं सम्प्रत्ययं आविष्कुरुतः।

इ. एल्. थारनडइकवर्यः प्रयोगं कृत्वा अधिगमप्रक्रिया यत्नपराजयप्रक्रिया इत्याह । इयं यत्नपराजयप्रक्रिया न्यायशास्त्रे व्याप्तिस्वरूपनिरूपणे दृश्यते। यथा –

ननु अनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः ? न तावदव्यभिचरितत्वम्, तद्धि न साध्याभाववदवृत्तित्वम्, साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम्, साध्यवत्प्रति-योगिकान्योन्याभावासामानाधिकरण्यम्, सकलसाध्याभाववन्निष्ठा-भावप्रतियोगित्वम्, साध्यवदन्यावृत्तित्वं वा केवलान्वयिन्यभावात् इत्यादि लक्षणमुक्त्वा सिद्धान्तव्याप्तिलक्षणं निरूपयति"अत्रोच्यते 'प्रतियोग्य-समानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्त':" इति। अत्र निषेधमुखेन अधिगमः जायते । एवं थारनडइकवर्येण निरूपितरीत्या बहिरिन्द्रियाणा-मेवाधिगमः जायते न तु आन्तरिकेन्द्रियाणाम्।

आन्तरिकेन्द्रियाणाम् अधिगमाय कोह्लर्, कोफ्का प्रभृतयः

परिज्ञानसिद्धान्तं न्यरूपयन् । अस्यैव अन्तर्दृष्टिसिद्धान्तः इत्यपि नामान्तरं वर्तते। अन्तर्दृष्ट्यधिगमो नाम समस्यानां परिहाराय स्वयमन्विष्टं समाधानम् । इदं समाधानं शान्तचित्तेन चिन्तनं क्रियते चेत् प्राप्यते । एषा अन्तर्दृष्ट्यधिगमप्रक्रिया अन्नम्भट्टेन तर्कसङ्ग्रहे सङ्गृहीतो विद्यते । यथा – अनुमानं द्विविधं स्वार्थं परार्थं चेति । तत्र स्वार्थं स्वानुमितिहेतुः । तथा हि स्वयमेव भूयो दर्शनेन “यत्र धूमस्तत्राग्निः” इति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ संदेहानः पर्वते धूमं पश्यन् व्यप्तिं स्मरति “यत्र धूमस्तत्राग्निः” इति । तदनन्तरं “वन्हिव्याप्यधूमवानयं पर्वतः” इति ज्ञानमुत्पद्यते। अयमेव लिङ्गपरामर्श इत्युच्यते । तस्मात् “पर्वतो वन्हिमान्” इति ज्ञानमनुमितिरुत्पद्यते । तदेतत्स्वार्थानुमानम् ।

एतावता व्यवहारवादिनां मतानुसारं, संज्ञानात्मकवादिनां मतानुसारं च अधिगमप्रक्रिया निरूपिता अस्ति । अस्याः प्रक्रियायाः सप्तसोपानानि वर्तन्ते । यथा –

1. अभिप्रेरणम् / आवश्यकता
2. लक्ष्यम्
3. तत्परता
4. अधिगमस्थितिः
5. अन्तःक्रिया
6. सामञ्जस्यम्
7. परिवर्तनम्
8. स्थिरत्वम्

अत्र अनुकरणात्मिका भवति अधिगमप्रक्रिया इति व्यवहारवादिन वदन्ति । अनुकरणम् अधिगमप्रक्रियायां न भवतीति संज्ञानात्मकवादिनः निरूपयन्ति इत्यभ्यादाय वाक्कुसुमं समर्पयामि ।

सन्दर्भग्रन्थसूची


1. **व्याप्तिपञ्चकम् –** पूर्णप्रज्ञासंशोधनमन्दिरम्, पूर्णप्रज्ञाविद्यापीठम्, बेङ्गलूरु – 28
2. **सिद्धान्तलक्षणम् –** चौखम्बा संस्कृत भवन, वारणासी
3. **तर्कसङ्ग्रहः** - मोतीलाल बनारसीदास, वारणासी
4. **शिक्षामनोविज्ञानम् –** आदित्यप्रकाशनम्, जयपुर
5. **शिक्षा मनोविज्ञान –** डा. रामशकल पाण्डेय, आर्. लाल्. बुक्. डिपो, मेरठ – 03.
6. **शिक्षण कला –** डा शालिग्राम त्रिपाठी, राधा पब्लिकेशन्स्, नई दिल्ली


****************

# छात्रशिक्षणम्

**डा. अरविन्दकुमारसोमदत्तः**
अतिथिप्राध्यापकः, शिक्षाविभागः
राजीवगान्धीपरिसरः, शृङ्गेरी

- छात्राय प्रशिक्षणं दत्वा तं प्रभावशाल्यध्यापकं कर्तुं तन्निहितगुणानां कौशलानां च विकासः करणीयः । शिक्षकाः जन्मजाताः भवन्ति इति कथयन्ति किन्तु तस्य प्रभावशाल्यध्यापकरूपेण विकासाय समुचितवातावरणस्य आवश्यकता वर्तते ।

छात्रशिक्षणे शिक्षणेन सह अधिगमविषयोऽपि प्रामुख्यं दीयते । छात्रशिक्षणे छात्रसामर्थ्यस्य विकासाय अधिकप्राधान्यं दीयते । छात्रं प्रभावशालीअध्यपकरूपेण परिवर्तयितुं तस्य सामर्थ्ययोग्यतयोः विकासस्य आवश्यकता अस्ति ।

- **छात्रशिक्षणस्य परिवर्तनशीलसम्प्रत्ययाः**

परिवर्तमानकालानुसारं छात्रशिक्षणस्य सम्प्रत्ययोऽपि परिवर्तनशीलः भवति । भाविशिक्षकनिर्माणप्रक्रिया अन्यपाठ्यक्रमेभ्यः भिन्ना इति चिन्तनीयम् ।

इदानीं छात्रशिक्षणे पाठनियोजनं, अधिगमसहायक सामाग्रीन् प्रयुज्य पाठस्य पाठनं क्रियते ।

- **'छात्रशिक्षणस्य' आधुनिकसम्प्रत्ययः**

छात्राध्यापकैः शिक्षणाधिगमयोः मूलभूतक्रियाणां अवगमनं, प्रयोगकरणं छात्राशिक्षणकार्यक्रमस्य प्रारूपं भवति । एतदेव न छात्राध्यापकवास्तविकशिक्षणसमस्यानां ज्ञानं प्राप्नोति । छात्रशिक्षणे शिक्षणकौशलेषु स्वामित्वसम्पादनं प्रधानं भवति।

छात्राध्यापकेन एतानि पन्थाह्वानानि अनुकूलदृष्ट्या स्वीकृत्य तेषां समाधानार्थं प्रयतनीयम् । तेषां समाधानार्थं छात्राध्यापकेन उपलब्धिशिक्षणप्रविधीनां उपयोगाय प्रयासः करणीयः। छात्राशिक्षणे शिक्षणकौशलानां शिक्षणसमस्यानाम् एवं निर्देशनादिक्रियाः सम्मिलिताः भवन्तिः । छात्रशिक्षणे छात्राध्यापकः पर्यवेक्षणं विनैव एतासां क्रियाणां नियोजनं सम्पादनं च करोति । स कक्ष्याशिक्षणास्य समस्यानां समाधानप्राप्तये क्रियात्मकानुसन्धानस्य प्रयोगं कृत्वा समस्यायाः वैज्ञानिकसमाधानमन्विष्याति।

- **छात्रशिक्षणस्य वैशिष्ट्यानि –**

1) व्यवसायिकानुभवः

छात्रशिक्षणे व्यवसायिकानुभवस्य सम्पादनं भवति, यत्र शिक्षासिद्धान्ताः व्यवहारिकरूपेण प्रदर्शयितुं शक्यन्ते, अपि च तेषां सम्पादनकौशलानां विकासः कर्तुं शक्यते।

2) निर्देशनानुभवः

छात्रशिक्षणकाले छात्र एकं समूहमधिगमाय उन्मुखीकरोति, एतदर्थं निर्देशनं प्रददाति। स छात्रसमूहस्य


ISSN – 2249-538X

अधिगमक्लेशानां निवारणं कृत्वा विकासात्मकशिक्षणस्य व्यवस्थापनं करोति ।

3) शिक्षणाधिगम परिस्थितिः –

छात्राध्यापकः छात्रं समूहिकरूपेण अधिगन्तुं समुचितपरिस्थितिमुत्पादयति । अनेन स स्वीयमधीते ।

4) शिक्षणाभ्यास स्वरूपम् –

छात्राध्यापकेभ्यः शिक्षणाभ्यासात् प्राक् सैद्धान्तिकज्ञानं प्रदीयते । एतदनन्तरं शिक्षणाभ्यासः कार्यते । छात्राध्यापकेषु प्रभावशाली शिक्षणकौशलानां एवं योग्यतायाः विकासः शिक्षणाभ्यासस्य प्रमुखमुद्देश्यं भवति । शिक्षणाभ्यासे निम्नलिखितक्रियाः सम्मिलिताः भवन्ति ।

1) प्राशिक्षणविभागे स्थितप्रशिक्षकेभ्यः एवं सहयोगिविद्यालयानां योग्याध्यापकेभ्यः आदर्श पाठप्रदर्शनं क्रियते छात्राध्यापकैः आदर्शपाठानां निरीक्षणं क्रियते ।

2) पाठयोजनार्थं आवश्यकसहायसामाग्री एवं अनुदेशनसहाय सामाग्री -नां निर्माणं तेषां व्यवस्थापनञ्च ।

3) विद्यालयविषयेषु विषयद्वयस्य चयनं तस्य पाठ्यसामाग्री विज्ञाय तेषां पाठनाय पाठयोजनायाः निर्माणं परीक्षिणं च ।

4) शिक्षणकौशलानाम् विकासाय सूचनाप्रदानम् ।

5) आदर्शपाठप्रस्तुतीकरणानन्तरं छात्राध्यापकेषु तद्विषये चर्चा कार्या

- **उद्देश्यानां वर्गीकरणमाधारीकृत्य छात्रशिक्षणम्**

उद्देश्यानां वर्गीकरणं छात्रशिक्षणकार्यक्रमः, छात्राध्यापकानां ज्ञानत्मक, भावात्मक, क्रियात्मकपक्षानाञ्च विकासेन सम्बद्धः भवति।

1) ज्ञानात्मक पक्षः –

छात्राध्यापकेभ्यः सर्वप्रथमं शिक्षणविधीनां, शिक्षणोद्देश्यानां, शिक्षणसहायकसामाग्रीणां, पाठयोजनाप्रारूपस्य, एवं मूल्याङ्कन विधीनाम् अवगमनं कारयन्ति। एतैः ज्ञानात्मक पक्षस्य विकासः भवति।

ज्ञानात्मकपक्षस्य विशिष्टरूपाणां यथा अभिज्ञानम्, पुनस्स्मारणं, तुलना, विश्लेषणं, सामान्यीकरणं एवं अनुमानादिक्रियाणामवगमनं कारयन्ति । अस्मिन् शिक्षणक्रियाणां, प्रशंसा, विवेचनम्, विमर्श, इत्यादयः सम्मिलिताः भवन्ति । अस्मिन् सैद्धन्तिकतथ्यानामबोधः जायते । पक्षस्यास्य सीमा बोधनपर्यन्तमेव न, अपितु नूतन परिस्थितिषु तथ्यानां, प्रत्ययानां च प्रयोगपर्यन्तं भवति। छात्रशिक्षणे ज्ञानप्रयोगयोः विशेषमहत्वं भवति।

अस्मिन् छात्राध्यापकेन करणीयानि अधोलिखितानि ज्ञानात्मकार्याणि अन्तर्भवान्ति

1) सम्बद्धपुस्तकानां सामाग्रीणां च चयनम्।
2) शिक्षणबिन्दुषु पाठ्यवस्तुनः विश्लेषणम्।
3) सम्बद्धक्रियाणां, विधीनाम् एवं सहायकसामाग्रीणां चयनम्।
4) विधीनां, सामाग्रीणां, एवं सहायकसामाग्रीणां, उपयुक्तता विषये निर्णयस्वीकरणम्।

 ISSN – 2249-538X

5) अनुदेशनसामाग्रीणां, मूल्याङ्कनोपकरणानां, गृहकार्यादीनां च चयनम् ।

6) छात्रपरिणामस्य विश्लेषणम् ।

7) छात्राणामुपलब्धेः विमर्शः ।

- भावात्मक पक्षः

भावात्मकपक्षे शिक्षणव्यवसाय एवं परीक्षणप्रक्रियासम्बद्ध उचिताभिरुचीनां अभिवृत्तीनां, मूल्यानां च विकासः क्रियते । पक्षेऽस्मिन् छात्राध्यापकेन करणीयानि (अधोलिखितानि) भावात्मककार्यणि अन्तर्भवन्ति ।

1) छात्रैः सह सहानुभूतिपूर्णव्यवहारः ।
2) सहयोगी आध्यापकानामेवं अधिकारीणांमादरः ।
3) सहयोगभावनायाः विकासः ।
4) व्यवसयिक भावनयाः विकासः ।
5) व्यवसायिकपत्रिकासु योगदानम् ।
6) शिक्षापुस्तकानाम् एवं शैक्षिकपाठ्यवस्तुनः लेखनम् ।
7) व्यवसायि सङ्घेषु सदस्यता ।
8) व्यवसायिकनीतिसंहितायाः सम्मानम् ।

- क्रियात्मक कौशलानि –

छात्राध्यापके अपेक्षितव्यवसयिकक्षमतानां कौशलानांच विकासः छात्राशिक्षणस्य प्रमुखं कार्यमस्ति ।

पक्षेऽस्मिन् छात्राध्यापकेन अधोलिखितकौशलानि अन्तर्भवन्ति

1) पाठयोजनाया एवं सहायकसामाग्री निर्माणम् ।

2) उपकरणानां प्रयोगः ।

3) श्यामपट्टस्य एवं सुधाखण्डस्योपयोगः ।

4) प्रदर्शनमेवं प्रयोगः ।

5) व्यवहारः एवं तस्य ज्ञानार्थं परीक्षणम् ।

6) सहकारदानम् ।

7) छात्रक्रियाणां पर्यवेक्षणम् ।

8) कक्ष्यायांमनुशासनस्यानु रक्षणम् ।

9) पाठ्यसहगामिक्रियाणां व्यवस्थापनम् ।

10) चिकित्सात्मकानुर्दशनस्य अयोजनम् ।

- छात्राशिक्षण कार्यक्रमस्य प्रक्रियाः

1) छात्रव्यवहारस्य निरीक्षणम् ।

2) उत्तमपाठानां निरीक्षणम् ।

3) कक्षाशिक्षणे वादविवादः, समयासमाधानम्, एवं प्रयोगत्मक अथवा प्रदर्शनोपागमाः सम्मिलिताः स्युः ।

4) कार्यशाला, प्रयोगशाला, क्षेत्रे प्रयोगात्मक कार्यस्य व्यवस्था, मार्गदर्शनञ्च ।

5) पाठ्यसहगामिक्रियाणां अयोजनं तेषु भागग्रहणञ्च ।

6) प्रयोगशालमुपकरणानां नियोजनं, निरन्तरसौकर्यप्रदानञ्च ।

 ISSN – 2249-538X

7) पुस्तकालयानां, निर्देशनसेवानां, मध्याहनभोजनव्यवस्थेत्यादि विभिन्नविद्यालयसेवानां विमर्शनात्मकमध्यापनम् एवं विकासा योजना निर्माणम्।

8) दृश्यश्रव्य सहायक सामाग्रीणां निर्माणम् एवं प्रयोगः।

9) सञ्चिताभिलेखनिर्माणं, व्यक्तिवृत्ताध्ययनमित्यादि प्रविधीनां प्रयोगः।

10) गृहकार्ये नियोजनम् एवं शुद्धिकार्यम्।

11) मूल्याङ्कनप्रक्रियानां विकासः निर्माणञ्च।

12) विद्यालयसभा, अध्यापकमेलनम्, एवम् इतर प्रमुखक्रियासु भागग्रहणम्।

13) विद्यालयस्य कार्यालयानां विभागानां च व्यवस्थापनम्।

14) समुदायस्य साधनानामध्ययनम्, एवं तेषां कक्ष्याशिक्षणे विद्यालयस्य कार्यक्रमेषु च उपयोगः।

- **छात्रशिक्षणस्य व्यवस्थापनम् –**

यस्यकस्यापि शिक्षाव्यवस्थायाः सफलता प्रायः शिक्षकाणां गुणवत्ताम् आधृत्य तिष्ठति। अध्यापनप्रशिक्षण सस्थाः शिक्षकेभ्यः शिक्षणं दत्त्वा शैक्षिकव्यवस्थायाः संवर्धनार्थम् अत्यन्तं महत्वपूर्णां भूमिकां निर्वहान्ति। छात्रशिक्षणं शिक्षकाणांनिर्माणे महत्वपूर्ण पक्षः अस्ति। प्रत्येकस्यां शिक्षणसंस्थायां समुचितरूपेण छात्रशिक्षणस्य, संघटनपर्यवेक्षणयोः व्यवस्था करणीया।

छात्रशिक्षणं प्राकसेवाशिक्षकप्रशिक्षणकार्यक्रमस्य केन्द्रबिन्दुः भवति। अस्मिन् छात्राध्यापकैः सैद्धान्तिक कक्षासु अधिगततथ्यानां व्यवहारिकानुभवप्राप्तये अवसरः लभ्यते।

- **छात्रशिक्षणस्य उद्देश्यानि –**

1) शिक्षणकलायाः शिक्षणम् ।

2) कक्ष्यासु समाजिक, भावात्मकाधिगमवातावरणस्य निर्माणम् । एतया दृष्ट्या छात्रशिक्षणस्य मुख्योद्देश्यं छात्राध्यापकानां प्रभावीशिक्षकरूपेण परिवर्तनम्।

3) छात्रशिक्षणे सर्वविधावश्यकसैद्धान्तिक विषया एवं व्यवहारिक विषयाः भवेयुः ये च छात्राध्यापकान् प्रभावी शिक्षकरूपेण परिवर्तयितुं शक्नुवन्ति । छात्रशिक्षणस्य मुख्योद्देश्यं विभिन्नविषयेषु शिक्षकानां निर्माणमेव।

4) शिक्षणस्तरानुसारं पाठयवस्तुनः व्यवस्थापनयोग्यतायाः विकासः ।

5) विभिन्नक्षेत्रसम्बद्ध भिन्नभिन्न परिस्थितीनां अनुभवप्रदानम् ।

6) छात्राध्यापकेभ्यः शिक्षणविधेः चयनम्, कौशलस्य विकासः, ज्ञानस्य प्राप्तिः, विधेः वैकल्पिकप्रयोगस्य अवबोधः, एवं गृहकार्यदानम् इत्यादिविषयेषु ज्ञानप्रदानम्।

7) समुचितविधीनां, प्रविधीनां शिक्षणसहायकसामाग्रीणाञ्च निर्मणं पाठयोजननिर्माणयोग्यतायाः च विकासः।

8) छात्राध्यापकेभ्यः मूल्याङ्कनप्रक्रियासु प्राशिक्षणम् । अस्मिन् मूल्यङ्कनं नाम किं ? अस्य महत्वं किं ? अस्यप्रविधयः के ? एतेषां प्रविधीनां

 ISSN – 2249-538X

केन प्रकारेण, कुत्र, कदा निर्माणं प्रयोगश्च करणीयः ? इत्यादयः प्रश्नाः अन्तर्भवन्ति।

9) अध्यापकशिक्षार्यक्रमे एतादृशवातावरणस्य निर्माणं करणीयं येन छात्राध्यापकेषु अनुकूलस्वस्थ दृष्टिकोणस्य च विकासः भवति, अर्थात् एतादृशवातावरणस्य निर्माणं करणीयं येन छात्राध्यापकः पाठनियोजने यथार्थं रूचिं स्वीकर्तुं शक्नुयात्।

10) छात्राध्यापकैः तीव्र, सामान्य, मन्द, अधिगन्तृणां, लाभः यथा भवेत् तथा पाठयोजना लेखनीया।

11) छात्राध्यापकेषु वास्तविक, यथार्थ, कक्षयापरिस्थितेः अवबोध दूरदृष्टेः च विकासः करणीयः।

12) प्रभावपूर्णशिक्षणाधिगमाय कक्ष्याप्रबन्धयोग्यतायाः विकासः करणीयः।

***************

ISSN – 2249-538X

योऽनूचानः स नो महान्।

राष्ट्रियसंस्कृतसंस्थानम्

# राष्ट्रियसंस्कृतसंस्थानम्

(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'ए' श्रेण्या प्रत्यायितम्

## राजीवगान्धीपरिसरः

शृङ्गेरी – ५७७ १३९